आर.एन.आई. सं.58951/94
ISSN 0975 - 0061

# आरण्यकम्

अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका
(Bi-annual Refereed Sanskrit Research Journal)

विश्वविद्यालयानुदानायोगस्य ( UGC ) यत्सूच्याम् ( Carelist ) अन्तर्भुक्ता

संस्कृतप्रसारपरिषद्
आरा (विहारः)

त्रयस्त्रिंशं वर्षम्-प्रथमोऽङ्कः
मार्च 2025

# ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकी शोधपत्रिका संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्क-मपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (200) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (100) रूप्यकाणि।
4. आजीवनं ग्राहकताशुल्कं द्विसहस्रं (2000) रूप्यकाणि।
5. शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 8102327064
   Email-**nilmanipathak19@gmail.com**

   **( ii ) बैंक ड्राफ्ट ‘संस्कृतप्रसारपरिषद्’** इति नाम्ना
   आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रेषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
6. आरण्यकस्य बेबसाईट-**www.aranyakam.in**
7. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
8. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
9. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशः ई-मेल संकेतः, दूरभाषसंख्या च उल्लिखिताः स्युः।
10. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
11. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
12. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
13. ‘आरण्यक’सम्बद्धा सर्वविधा जिज्ञासा
   **प्रो. गोपबन्धु मिश्रः, संस्कृतविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी ( उ.प्र. )-221005 इति सङ्केतेन** (चल.) 9450870788 विधेया।
14. शोधलेखसम्प्रेषणं तत्सम्बद्धपत्रव्यवहारश्च
   Email- **gopabandhuh@gmail.com**
   **aranyakam94@gmail.com** इत्यनयोरन्यतरेण सङ्केतेन विधातव्यः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका
विश्वविद्यालयानुदानायोगस्य( UGC )यत्नसूच्याम्( Carelist )अन्तर्भुक्ता

वर्षाङ्कौ - त्रयस्त्रिंशं वर्षम् - प्रथमोऽङ्कः

चैत्रः, वि.सं.२०८२

मार्च २०२५

प्रतिवर्षं प्रकाशनकालः
चैत्रः, आश्विनः-विक्रमाब्दः
मार्च, सितम्बर

*प्रत्यङ्कम् - 100 रूप्यकाणि*
*संयुक्ताङ्कः - 200 रूप्यकाणि*
*वार्षिकं शुल्कं 2000 रूप्यकाणि*

**परामर्शदात्री समितिः**

डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. राय अश्विनी कुमारः, बोधगया

❀

संस्थापकः

**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❀

सम्पादकः

**प्रो.गोपबन्धु मिश्रः**

वरिष्ठ आचार्यः, संस्कृतविभागः
काशीहिन्दूविश्वविद्यालयः, वाराणसी
पूर्वकुलपतिः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् (गुजरात)
gopabandhuh@gmail.com

❀

सह-सम्पादकौ

**डॉ. सञ्जय कुमार चौबे**

sanjaychaubey.lbs@gmail.com

**डॉ. सुनीलकुमार प्रधानः**

sunilkumarp435@gmail.com

❀

प्रकाशिका

**संस्कृतप्रसारपरिषद्**

रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

❀

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

**'अस्त्युत्तरस्यां दिशि देवतात्मा**
**हिमालयो नाम नगाधिराजः।'**

इति कुमारसम्भवमहाकाव्यस्य मङ्गलश्लोकं श्रुत्वा अस्माकं समेषां मनसि नगाधिराजस्य हिमालयस्य दिगन्तविसारि चित्रम् उद्भासते, तत्समकालमेव तस्मात् हिमालयप्रदेशाद् अस्माकं दक्षिणदिशि विद्यमानत्वमपि स्पष्टीभवति। कथं तत्सम्भवति इति चेत् उत्तरदिशो निश्चये अवधिभूतस्य कस्यचित् तन्निश्चेतुः अस्मदादेः अपेक्षया तस्य अवधिमत्त्वं नियम्यते इति हेतोः। एतस्मिन् कस्य नियामकत्वं स्यादिति विमर्शे दिग्रूपा शक्तिरेव तन्नियामिकेति वदति वाक्यपदीयकृदाचार्यो भर्तृहरिः –

**व्यतिरेकस्य यो हेतुरवधिप्रतिपाद्ययोः।** (वा.प. 3.6.2)

एषा दिक् शक्तिः वस्तुतः एकापि स्वकीयैः आदित्यसंयोगादिभिः भिन्ना प्राच्यादिभेदेन बहुविधेति लोके व्यवह्रियते। अर्थात् लोके अयं पूर्वः अयं च पर इति व्यवहारः दिङ्निमित्तकः, किं च तादृशो व्यवहारः एव दिक्शक्तेः लिङ्गमिति आचार्यो भर्तृहरिः। मूर्तानां घटादीनाम् अव्यापकानाम् 'इदं पूर्वमभूत्, इदं तु परं भविष्यति' इति क्रियापौर्वापर्यं कालक्रमेण कालशक्त्या निरूप्यते, किं च तेषु 'अयं पूर्वः अयं परः' इति व्यवहारभेदः दिक्शक्त्या सिद्ध्यतीत्यतः शब्दब्रह्मणः काल इव दिगपि एका शक्तिरेवेति विनिश्चित्य क्षित्यादिषु नवसु पदार्थेषु पदार्थविशेषरूपेण दिशः य उल्लेखः वैशेषिकदर्शने विधीयते तन्मतं निरस्यते वैयाकरणैः। तत्र हि हेतुं दर्शयता तस्मिन् वाक्यपदीये एव दिक् नियता न भवति, अपितु सर्वथा पूर्वपश्चिमादिव्यवहारकर्तुः अवस्थानहेतुसापेक्षा भवतीत्यतः सा शक्तिरेव शक्तिमदाश्रिता परतन्त्रैवास्ति इति विवेचितम्, तद्यथा–

**स्वाङ्गाद् व्यवस्था या लोके न तस्यां नियता दिशः।**
**प्रत्यङ्मुखस्य तत्पश्चात् तत्पुरस्ताद् विपर्यये।।** (वा.प. 3.6.8)

तत्र च पूर्व-परादिव्यवहारेण भागभेदादिव्यवहारेण च कार्येण दिग्रूपकारणस्यानुमानं 'चैतन्य' दृष्टान्तत्वेन आचार्यो भर्तृहरिरुपस्थापयति –

**चैतन्यवत् स्थिता लोके दिक्कालपरिकल्पना।**
**प्रकृतिं प्राणिनां तां हि कोऽन्यथा स्थापयिष्यति।।** (वा.पा. 3.6.8)

अर्थात् यथा प्राणिनः दृष्ट्वा तेषु चैतन्यमस्तीति परिकल्प्यते तथैव पूर्वपरादिव्यवहारं दृष्ट्वा तत्र दिग्रूपा शक्तिरवश्यमेव परिकल्पनीयेति यावत्।

उपर्युक्तरीत्या पूर्वपश्चिमादयः दश दिशः लोके व्यवहारपथि आयान्तीति शक्तिरूपेण दिशं स्वीकुर्वाणा वैयाकरणा अपि लोकमनुसृत्य दिशस्तद्भेदान् अनुमन्यन्ते –

**विकल्पातीततत्त्वेषु सङ्केतोपनिबन्धनाः।**
**भावेषु व्यवहारा ये लोकस्तत्रानुगम्यते॥** (वा.प. 3.6.25)

दिक्शक्तेरेतस्याः कारणेन कश्चिद् यदि 'मम पुरतः वृक्षः' इति व्यवहरति, स एव वृक्षपराङ्मुखो भूत्वा 'मम पृष्ठतः वृक्षः' इति व्यवहरति। अतः पूर्वपरादेः नियतत्वाभावात् द्रव्यरूपेण दिशमपरिगणय्य शक्तिरूपेण तस्याः परिकल्पना शाब्दिकैः विहितेति विशेषः।

कालशक्त्या वैदिकवाङ्मयं पूर्वमभूत् तदनु रामायणादि लौकिकं वाङ्मयमिति संस्कृत-वाङ्मयस्य ऐक्ये विद्यमानेऽपि पौर्वापर्यं विनिश्चीयते, तद्वत् उपलब्धवाङ्मयस्य एकत्वेऽपि केरलेषु कलिङ्गेषु मागधेषु वेति अथवा उत्तरस्यां कश्मीरेषु दक्षिणेषु कर्णाटकेषु वेति व्यवहारभेदः दिक्शक्त्या साक्षात् क्रियमाणः अस्त्येव।

महाभाष्यकृत् महर्षिः पतञ्जलिरपि– 'शवतिर्गतिकर्मा **कम्बोजेष्वेव** भाषितो भवति, विकार एनमार्या भाषन्ते 'शव' इति। हम्मतिः **सुराष्ट्रेषु**। रंहतिः **प्राच्यमध्येषु**। गमिमेव त्वार्याः प्रयुञ्जते। दातिर्लवनार्थे **प्राच्येषु**। दात्र**मुदीच्येषु**।' (म.भा., पस्पशाह्निकम्)

तथा च 'प्रियतद्धिता **दाक्षिणात्याः**'– 'यथा लोके वेदे चे'ति प्रयोक्तव्ये 'यथा लौकिकवैदिकष्विति प्रयुञ्जते। (म.भा., पस्पशा.)

लोके पौरस्त्याः, पाश्चात्याः इत्यादिदिग्भेदाधारिताः प्रयोगविशेषा अपि दिशः शक्तित्वस्वीकरणे लिङ्गमिति आचार्यभर्तृहिरेरभिमतमिति पूर्वं मन्त्रितमत्र। एतेन दिशः स्वरूपलक्षणनिश्चये यथा प्रतिपत्तिः प्रवर्तते, तथा संस्कृतवाङ्मयस्य व्यापकत्वं तन्नाम पूर्वपश्चिमादिषु सर्वेषु प्रदेशेषु प्रादुर्भूतत्वं, नानाकाव्यशास्त्रादीनां विमर्शः, अध्यापनं, सूत्रभाष्यादिसरंचनमित्यादि भूयिष्ठतया प्रवर्तमानमासीदित्यपि प्रमाणितं भवत्येव। कालशक्तेः प्रभावात् समुद्भूतानां विमृष्टानां ताडपत्रादिसाधनेषु हस्तलिखितरूपेण उल्लिखितानां तत्तत्स्थलेषु शिलालेखमन्दिरभित्त्यादिषु उट्टङ्कितानां विपुल-साहित्यानां नाशः, मालिन्यम् तदवगमनसामर्थ्यवतामभावादयः प्रसङ्गा अपि आगताः।

सद्यःकाले यत् किञ्चित् कालस्य क्रूरकरालकटाक्षप्रभावात् आत्मानं रक्षितवत् वाङ्मयमुपलभ्यते, आधुनिकयान्त्रिकपद्धत्या मुद्रण-दृश्यश्रव्यादिमाध्यम-यान्त्रिकीकरणादिरीत्या वा संरक्षितं संरक्ष्यमाणं च विद्यते, तस्य वाङ्मयस्य पूर्वपश्चिमादिदिङ्निर्विशेषेण विमर्शं समीक्षणं वा विधातुं प्रवर्तितुम् आचार्याः तत्तच्छास्त्राध्येतारः शोधच्छात्रादयः यतमाना भवन्तु इतीच्छया **आरण्यकमिदं** संस्कृतशोधपत्रं तेषां विदुषां शोधलेखान् समाकलय्य प्रकाशयितुं प्रयतमानमस्ति। वर्तमानेऽस्मिन् आरण्यकस्य कलेवरे येषां विदुषामाचार्याणां शोधलेखप्रस्तोतॄणां च लेखाः प्रकाश्यमानाः सन्ति तेषां कृते साधुवादा विज्ञाप्यन्ते, किं च शोधप्रत्रस्य पाठकाः समीक्षकाश्च तद्विषये स्वाभिमतं प्रकटय्य शोधपत्रस्यास्य दिशं सूचयेयुरिति संप्रार्थ्यन्ते च।

विदुषां वशंवदः
गोपबन्धु मिश्र
सम्पादकः, आरण्यकम्

# सूचीपत्रम्


| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 1. | **वैयाकरणभूषणसारदिशा अपभ्रंशानां शक्तिविमर्शः** | डॉ. अभिजित् घोषः<br>असिस्टेंट प्रोफेसर, संस्कृतविभागः<br>चिन्मयविश्वविद्यापीठम्<br>केरलम् - 686667 | 1-8 |
| 2. | **श्रीमद्भागवतपुराणे तत्त्वस्वरूपम्-भगवत्सन्दर्भानुसारमेकमालोचनम्** | डॉ. अञ्जना शर्मा<br>एसोशियेट प्रोफेसर, संस्कृतविभागः<br>एक-गार्गीनिवासः, वनस्थलीविद्यापीठम्<br>राजस्थानम् - 304022 | 8-14 |
| 3. | **वेदत्रयी अथर्ववेदश्च** | डॉ. जितेन्द्र कुमारः<br>सह-आचार्यः, संस्कृतविभागः<br>राजकीय महाविद्यालयः, बयाना,<br>भरतपुरम् (राजस्थानम्) | 14-26 |
| 4. | **प्रौढमनोरमाशब्देन्दुशेखरयोरुक्त-दिशाऽर्थवत्त्वस्वरूपविचारः** | डॉ. तुलसी कुमार जोशी<br>संस्कृतविभागः,<br>वसन्त कालेज, राजघाट,<br>काशीहिन्दूविश्वविद्यालयः,<br>वाराणसी। | 27-33 |
| 5. | **किञ्चिद् रामायणीयम्** | | 34 |
| 6. | **शृङ्गारप्रकाशदिशा सर्वकारकाणां सर्वविभक्तिवाच्यत्वम्** | विष्णुपदपालः<br>सहायकाध्यापकः,<br>संस्कृतपालिप्राकृतविभागः<br>विश्वभारती (केन्द्रीयविश्वविद्यालयः),<br>शान्तिनिकेतनम्, पश्चिमवङ्गः। | 35-43 |
| 7. | **किञ्चिद् रामायणीयम्** | | 44 |

| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 8. **हेतुमण् णिचोऽर्थः प्रेषणादिः** | डॉ. अवधेश कुमारः<br>सहायकाचार्यः (संस्कृतम्)<br>मानविकीविद्यापीठम्<br>इन्दिरा गान्धी राष्ट्रीय मुक्त विश्वविद्यालयः<br>मैदान गढ़ी, नई दिल्ली-110068 | 45-50 |
| 9. **पतञ्जलिकृते महाभाष्ये निग्रहस्थानम्** | रिशित देसाई, डॉ.भाग्यश्री बवरे च<br>भाारतीयसंस्कृतिपीठम्<br>क.जे.सोमैया धर्म अध्ययन केन्द्रम्<br>सोमैया विद्याविहार विश्वविद्यालयः<br>मुंबई | 51-57 |
| 10. **किञ्चिद् रामायणीयम्** | | 58 |
| 11. **भाष्यचतुष्टयानुरोधेन सन्ध्याधिकरणसमीक्षणम्** | बुद्धदेव दासः<br>शोधच्छात्रः, संस्कृतविभागः<br>रामकृष्ण मिशन विवेकानन्द विश्वविद्यालयः<br>वेलूरमठम्, पश्चिमवङ्गः - 711202 | 59-71 |
| 12. **किञ्चिद् रामायणीयम्** | | 72 |
| 13. **बौद्ध-वैशेषिकयोः कारणवादः** | राजेशः रमणः राणुः<br>शोधच्छात्रः, संस्कृतविभागः<br>कलासङ्कायः, दिल्लीविश्वविद्यालयः<br>दिल्ली | 73-79 |
| 14. **किञ्चिद् रामायणीयम्** | | 80 |
| 15. **समानवाक्योपात्तानां तिङन्तानां परस्परान्वयसमीक्षणम्** | प्रलय-नन्दी<br>शोधच्छात्रः, संस्कृतविभागः<br>रामकृष्ण मिशन विवेकानन्द विश्वविद्यालयः<br>वेलूरमठम्,पश्चिमवङ्गः-711202 | 81-90 |


*

# वैयाकरणभूषणसारदिशा अपभ्रंशानां शक्तिविमर्शः

**डॉ. अभिजित् घोषः**

**सारसंक्षेपः–** पदशास्त्रस्य शाब्दिकार्थिकाभेदमुल्लिख्य 'बोधकतारूपा शक्तिः' इति ग्रन्थकृता शक्तिस्वरूपं भृशं समालोचितम्। तदनु अपभ्रंशानां साक्षात् वाचकत्वमस्त्येव इति शाब्दिकसिद्धान्तः उपस्थापितः। येन गाव्यादीनामसाधुशब्देष्वपि शक्तिः स्वतः सिद्ध्यति। एवमितरेषां शाब्दिकाचार्याणां मतानि चोल्लिख्य तार्किकानामाक्षेपं युक्त्या निराकृत्य ग्रन्थकर्तुः स्वीयसिद्धान्तः यथामति विश्लेषितः।

**कुञ्चिकाशब्दाः–** अपभ्रंशः, शक्तिः, वैयाकरणभूषणसारः, कौण्डभट्टः, वाक्यपदीयं, वाचकत्वं चेति।

**उपोद्घातः–** पुण्यापुण्यप्रयोजकशब्दापशब्दधीमते पदशास्त्रं नूनमुपयुज्यते। सुविदितं यत् शास्त्रमिदं शाब्दिकार्थिकाभेदेन द्विधा विभज्यते। तत्र शाब्दिकग्रन्थाः प्रक्रियाभिः शब्दसाधुत्वं निर्मान्ति, तथैव आर्थिकग्रन्थाः दार्शनिकांशरूपेण स्वीयं महिमानं प्रकाशयन्ति। पाणिनीयव्याकरणे ये दार्शनिकसिद्धान्ताः चर्चिताः आसन्, तान् सर्वान् सिद्धान्तान् आकलय्य पदवाक्यप्रमाणज्ञः भर्तृहरिः वाक्यपदीये प्रकटयामास। सोऽयं वाक्यपदीयमिति ग्रन्थरत्नविशेषः शाब्दिकसिद्धान्तनये नायकोऽपि विनायकत्वं भजते। वाक्यपदीयमिति ग्रन्थमनुसृत्य षोडशके ख्रीस्ताब्दे श्रीमता भट्टोजिदीक्षितेन चतुःसप्तति–कारिकासु वैयाकरणसिद्धान्ताः मिताक्षरैः निरूपिताः। ते च सिद्धान्ताः भाष्याब्धेः शब्दकौस्तुभे समुद्धृताः। इमाः चतुःसप्तति–संख्याकाः कारिकाः श्रीकौण्डभट्टेन वैयाकरणभूषणसारे विशदीकृताः। एवं शाब्दिकनिकाये वैयाकरणभूषणसारग्रन्थरत्नस्य महिमा विलक्षणो विद्यते। समग्रोऽयं वैयाकरणभूषणसारग्रन्थः चतुर्दशप्रकरणेषु विभक्तो वर्तते। तानि च प्रकरणानि– धात्वर्थनिर्णयः, लकारार्थनिर्णयः, सुबर्थनिर्णयः, नामार्थनिर्णयः, समासशक्तिनिर्णयः, शक्तिनिर्णयः, नञर्थनिर्णयः, निपातार्थनिर्णयः, भावप्रत्ययार्थनिर्णयः, देवताप्रत्ययार्थनिर्णयः, अभेदैकत्वसङ्ख्यानिर्णयः,

सङ्ख्याविवक्षादिनिर्णयः, क्त्वाद्यर्थनिर्णयः, स्फोटनिर्णयश्चेति। प्रकृते शक्तिनिरूपण-प्रकरणस्थः साध्वसाधुविवेकः मिताक्षरैः विमृश्यते।

**शक्तिस्वरूपम्–** शक्तिनिर्णयस्य पूर्वस्मिन् समासशक्तिप्रकरणे व्यापेक्षालक्षणैकार्थीभाव–सामर्थ्ययोः एकार्थीभावपक्षः सिद्धान्तितः श्रीकौण्डभट्टेन। उक्तञ्च तत्र–

**समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।।**
**बहूनां वृत्तिधर्माणां वचनैरेव साधने।**
**स्यान्महद् गौरवं तस्मादेकार्थीभाव आश्रितः।।**[1]

तत्र शक्तिर्नाम किमिति चेत् पदेन सह पदार्थस्य सम्बन्धः। अर्थे पदसङ्केतः शक्तिरिति दर्पणटीकाकारः श्रीहरिवल्लभः। स च सङ्केतः अस्मात् पदादयमर्थो बोद्धव्य इत्यर्थविशेष्यकेश्वरेच्छारूपः, इदं पदममुमर्थं बोधयतु इति पदविशेष्यकेश्वरेच्छारूप इति तार्किकाः। परन्तु नव्यास्तु न तथा, तेषां नये ईश्वरेच्छा, ज्ञानं, कृतिर्वा शक्तिरित्युच्यते।

शक्तिस्वरूपनिरूपणावसरे श्रीकौण्डभट्टस्याशयस्तु यथा चक्षुरादीन्द्रियाणां रूपादिविषयकज्ञानजनने अनादिर्योग्यता विद्यते तथैव शब्दानामर्थेऽपि अनादिसम्बन्ध एव योग्यता। यथोक्तं ग्रन्थकृता शक्तिनिर्णयप्रकरणारम्भे–

**शक्तिप्रसङ्गात् तस्याः स्वरूपमाह–**

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।**[2]

लोके शक्तिपदं सामर्थ्यविशेषे एव व्यवह्रियते। तथैव शास्त्रविद्भिरपि शक्तिशब्द आदौ तादृशसामर्थ्यविशेषे एव प्रयुज्यते। तस्य पर्यायरूपेणाभिधा, व्यापारः इति पदद्वयमपि स्वीकृतम्। एवं गच्छता कालेन भर्तृहरिकुमारिलभट्टादीनां समये सम्बन्धज्ञानस्यैव शाब्दबोधकारणत्वं, तस्यैव शक्तिप्रकारकत्वं च दृष्ट्वा सम्बन्धे शक्तिपदव्यवहारः प्रारब्धः। तदनु समेऽपि शक्तिवाचकशब्दाः जाताः। अतः शक्तिः, अभिधा, व्यापारः, लक्षणा, व्यञ्जना इत्यादिशब्दैः बोध्यमानः पदपदार्थसम्बन्धः एवेति विज्ञेयः। सोऽयं सम्बन्धः वाच्यवाचकभावः इति मीमांसकानां शाब्दिकानां चाभिप्रायः। वेदान्तिषु द्वैताद्वैत-विशिष्टाद्वैतवादिनः पदवाक्यशास्त्रविदो मतं समर्थयन्ति। योगशास्त्रज्ञास्तु पदपदार्थयोः इतरेतराध्यासमूलकं तादात्म्यमेव सम्बन्धतया अङ्गीकुर्वन्ति। तत्र वाक्यपदीये ब्रह्मकाण्डे श्रीहरिवृषभेण कश्चन शाब्दिकपक्षः प्रतिपादितः, यस्मिन् पदपदार्थयोस्तादात्म्यसम्बन्ध इत्युक्तः। तत्र तार्किकाभीष्टा ईश्वरेच्छा सम्बन्धः इति मतमपि न रमणीयम्। यतो हि

नव्यनैयायिकैः इच्छायाः सम्बन्धत्वे समागतानां दोषाणां निवारणाय महान् प्रयत्नः आचरितः। तथापि तस्याः सम्बन्धपदव्यवहार्यता नास्त्येव। किमिदं सम्बन्धस्वरूपमिति विवेचयन् पदवाक्यप्रमाणज्ञः भर्तृहरिः प्राह–

**नाभिधानं स्वधर्मेण सम्बन्धस्यास्ति वाचकम्।**
**अत्यन्तपरतन्त्रत्वाद् रूपं नास्यापदिश्यते॥**[3]

एवम् 'इन्द्रियाणां स्वविषयेष्व..' इत्यनया कारिकया शक्तिस्वरूपे स्वीकृते सति बोधकारणत्वमनादिभूतं न शक्तिः किमर्थमिति चेत् आधुनिकदेवदत्तादिपदे तदभावात्। तदा आधुनिकनाम्नि नानादित्वमिति धिया अनादिपदं परित्यज्य बोधकारणत्वं शक्तिः इत्येवं लक्षणं भवतु। तदा एकादशे अहनि पित्रादीनां सङ्केताज्ञानेऽपि शाब्दबोधप्रसङ्गः जायते। पुनरपि आक्षेपः जायते यत् लाक्षणिकशब्देऽपि (गङ्गायां घोषः) अतिव्याप्तिः। अतः अतिव्याप्तिदोषवारणाय शक्तिस्वरूपं निरूपितं '**सङ्केतज्ञानसहकृतबोधकारणत्वं शक्तिः**' इति।

एवं सङ्केतः शक्तिरिति नेष्टम्। यतः सङ्केतः न हि शाब्दबोधकारणम्। यथा घटपदे सङ्केतमजानतामपि शाब्दबोधाभावात्। न तु सामान्यतः सङ्केतज्ञानं शाब्दबोधकारणम्। तथैव ईश्वरसङ्केतत्वेन ज्ञानं न कारणम्। ईश्वरम् अमन्यमानानां मीमांसकानां चार्वाकादीनां च ईश्वरसङ्केतत्वेन सङ्केतज्ञानाभावेऽपि शाब्दबोधः जायते। परन्तु तस्मिन् सङ्केतज्ञाने व्यभिचारदोषः जायते। यथोक्तं ग्रन्थकृता 'तत्तदर्थबोधजनकत्वग्रहवतामेव बोधोदयेन व्यभिचारात्' इति। अतः सङ्केतत्वेन सङ्केतज्ञानं शाब्दबोधे न कारणम्। अत्र मीमांसकाः सङ्केतज्ञानस्य शाब्दबोधे न कारणत्वमिति अङ्गीकृत्य बोधजनकतावच्छेदकत्वेन सङ्केतज्ञानं शाब्दबोधे कारणमिति मतं प्रकटयन्ति। तन्मतं निराकर्तुं ग्रन्थकारेण प्रतिपादितं 'तथाहि– पदविशेष्यकशक्तिज्ञानाव्यवहितोत्तरजायमानबोधं प्रति पदविशेष्यकशक्तिज्ञानं कारणमिति विवेकः। तस्मादर्थबोधजनकता शक्तिः, सङ्केतस्तु तद्ग्राहकः, अतः संकेतज्ञानाभावे शाब्दबोधोपपत्तिः न स्यात्।'[4] इत्थञ्च 'बोधकारणत्वमेव शक्तिः' इति शाब्दिकाभिप्रायः।

**असाधुशब्दानां शक्तिविमर्शः**– ननु बोधजनकत्वस्य शक्तित्वाङ्गीकारे अपभ्रंशेभ्यः शाब्दबोधः दरीदृश्यते। यतो हि बोधकतारूपा शक्तिः अपभ्रंशेष्वपि वर्तते। अतः अपभ्रंशानामपि शक्तत्वात् साधुतापत्तिः, शक्तस्यैव साधुत्वप्रतिपादनात्। साधुत्वं हि 'प्रयोगोत्पत्त्यशास्यत्वाच्छब्देषु न व्यवस्था स्यात् इति सूत्रे अनादिवाचकत्वं साधुत्वं तद्विपर्ययश्च साधुत्वमिति।'[5] अतः बोधजनकता न शक्तिरिति चेत् ग्रन्थकृता समाधीयते – गाव्यादयः शब्दाः न साक्षाद्वाचकाः, अपि तु साधुशब्दं संस्मृत्य परम्परया गाव्यादयः अपभ्रंशशब्दाः

बोधकाः भवन्ति। यथा विविधानां लिपीनां न वाचकत्वमपि तु केवलशब्दस्मरणे एवोपयोगो भवति। तथैव अपभ्रंशानामपि न साक्षाद्वाचकत्वमपि तु साधुशब्दस्मारकत्वमेव। अन्यः पन्थास्तु साधुशब्दाः यथा साक्षात् वाचकाः तथैव अपभ्रंशाः अपि। परन्तु तस्य नियमे भेदः वर्तते। यथोक्तं कारिकायाम्–

**असाधुरनुमानेन वाचकः कैश्चिदिष्यते।**
**वाचकत्वाविशेषे वा नियमः पुण्यपापयोः॥**[6]

एवं साधुशब्दप्रयोगाय पुण्यमसाधुशब्दप्रयोगाय पापमिति। शास्त्रदीपिकायामप्युक्तम्– 'यद्यपि अमीषामवाचकत्वं, यद्यपि च मुख्याभावे गौणलाक्षणिकयोरप्यसम्भवस्तथापि वाचकताशक्तिजन्यतया मूलशब्दोपस्थापकत्वेन प्रत्यायकत्वं भविष्यति'[7] इति।

सन्दर्भेऽस्मिन् ग्रन्थकृता हरिकारिकाः उल्लिखिताः। ताश्च–

**ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।**
**तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशकाः॥**[8]
**न शिष्टैरनुगम्यन्ते पर्य्याया इव साधवः।**
**ते यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः॥**[9]
**अम्बाम्बेति यदा बालः शिक्षमाणः प्रभाषते।**
**अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः॥**[10]
**एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।**
**तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते॥**[11]

एवञ्च अपभ्रंशानां साक्षादवाचकत्वमिति। यद्यपि शक्तिग्राहकेषु शक्तिग्राहकशिरोमणिना वृद्धव्यवहारेण अपभ्रंशानामपि वाचकत्वं साध्यते। तथापि देशभेदेन विविधेषु अपभ्रंशेषु शक्तिस्वीकारे गौरवम्। परन्तु संस्कृते न तथा, तत्र सर्वत्रैकानुपूर्वीकत्वं वर्तते। यत् खलु शाब्दबोधे महते लाघवाय, अतः तत्रैव शक्तिकल्पनं योग्यमिति।

अत्र ग्रन्थकृद्भिः श्रीकौण्डभट्टैः अपभ्रंशानामपि वाचकत्वमविशेषेण स्वीक्रियते। परन्तु तस्य नियमे फलं भिन्नं प्रतिपाद्यते। यथा साधुशब्दप्रयोगे तस्यार्थबोधे पुण्यम्, असाधुशब्दानां प्रयोगे च पापमिति। एवम् अपभ्रंशेभ्यः शक्तत्वं न जायेत तदा साधुशब्दानजानतां बोधः न स्यात्। परन्तु लोके तु साधुशब्दस्मरणं विनापि बहुधा बोधः दृश्यते। अतः अपभ्रंशेषु शक्तिः अङ्गीकार्या। एवं साधुशब्दस्मरणात् अपभ्रंशानां बोधः इति न मन्तव्यम्। यतो हि साधुशब्दाज्ञानवतां पामराणामपि बोधानुदर्शनात्। भगवता भाष्यकृताऽपि

साधुशब्दासाधुशब्दाभ्याम् अर्थावगमनं समानरूपेण अङ्गीकृतम्। यथोक्तं पस्पशाह्निके '**समानायामर्थावगतौ शब्देन चापशब्देन च शास्त्रेण धर्मनियमः क्रियते**' इति। एवं नव्यवैयाकरणधुरन्धरः नागेशभट्टः मञ्जूषायां भगवतः भाष्यकारस्य मतं समर्थयन् अपभ्रंशेषु शक्तिं स्वीकरोति।

अत्र तार्किकानामाशयः शक्तिभ्रमाद् अपभ्रंशानामर्थबोधः जायते। परन्तु तार्किकानामिदं कथनं नोचितमिति शाब्दिकाः। यतो हि अपभ्रंशानां बोधजनकतायां न कामपि विप्रतिपत्तिं विना बोधजनकत्वज्ञानस्य भ्रमत्वप्रतिपादनम् असम्भवम्। एवं यैः 'ईश्वरेच्छा अपभ्रंशः' इत्यनुमीयते तेषां मतेऽपि सत्तामात्रस्य विषयत्वस्वीकारे सति ईश्वरेच्छारूपः अपभ्रंशशब्दः विषयी भवति। अतः अपभ्रंशविषयिणी ईश्वरेच्छारूपा शक्तिः इत्यत्र न कोऽपि बाधः। एवम् 'इदं पदममुमर्थं बोधयतु' इति शक्तेः पदपदार्थविशेषघटितत्वात् भ्रमत्वासम्भवः। एवं 'घटपदं घटे शक्तं' 'पटपदं पटे शक्तम्' इत्येवंप्रकारिका या पदार्थविशेषघटिता शक्तिः, इत्यत्र कथं वा शक्तिभ्रमत्वम्? अतः तत्तदर्थनिरूपितेभ्यः अपभ्रंशेभ्यः उत्पन्ना शक्तिः भ्रमजन्या इति कथनं न योग्यम्। यथोक्तं हरिकारिकायाम्–

**पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु।**
**प्रसिद्धिमागता येषु तेषां साधुरवाचकः॥**[12]
**दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः।**
**अनित्यदर्शिनां त्वस्मिन्वादे बुद्धिविपर्ययः॥**[13]

एवं वक्तुः जिह्वादिदोषहेतोः अपभ्रंशशब्दाः पारम्पर्यात् यस्मिन्नर्थे ख्यातिं प्राप्नुवन्ति, तस्यार्थस्य साधुशब्दः अवाचकः। यद्यपि यस्मिन् अर्थे अपभ्रंशशब्दः प्रयुक्तः, तस्यार्थस्य वाचकः साधुशब्दः भवतीति सर्वसम्मतं मतम्। परन्तु असाधुशब्देन स्मारितः साधुशब्दः अवाचकः, अपि तु साक्षात् असाधुशब्दः तत्तदानुपूर्वीरूपः वाचकः भवति। एवं वक्तॄणामसामर्थ्यात् इयं दैवीवाक् सङ्कीर्णा। एवं शब्दमनित्यं मन्यमानैः तार्किकैः शक्तिविचारनिरूपणे 'केवलं साधुशब्दाः एव वाचकाः, न तु अपभ्रंशाः' इत्यनुमीयते। अत्र शाब्दिकैः कथ्यते तार्किकानाम् इत्थं चिन्तनं केवलं बुद्धिविपर्ययमात्रम्। 'अवाचकः नाम अबोधकः, बुद्धिविपर्ययो नाम एते एव वाचकाः नान्ये इति विपर्यय इत्यर्थः।'[10] वस्तुतः साध्वसाधुशब्देषु समानरूपतायां बोधजनकता अस्त्येव। इत्थञ्च विनिगमनाविरहात् अपभ्रंशेष्वपि शक्तिः नूनम्।

तत्र पुनरपि शङ्का जायते– अपभ्रंशाः विविधाः इति हेतोः शक्तिरिपि नैकविधा स्यात्। तेन तासां नानात्वं दोषः। तत्र समाधानमाह 'विनिगमनाविरहाद् भाषायामपि शक्तिः।

न चोक्तं गौरवं, संस्कृतवन्महाराष्ट्रभाषायां शक्तेर्दुष्परिहरत्वात्। तस्याः सर्वदेशे एवैकत्वात्। एतेन भाषान्तरैर्विनिगमनाविरहान्नैकत्र शक्तिरिति परास्तं, संस्कृतेऽपि प्रत्येकं विनिगमना-विरहात्'[11] इति। एवम् अपभ्रंशानां वाचकत्वस्वीकारे अन्या युक्तिः– पदे अर्थबोध-जनकताऽस्ति, अतः तस्यावच्छेदिका आनुपूर्वी भवति। यथा– 'घट' इति पदस्य घकारोत्तर-वर्त्तिनी अकारोत्तरवर्त्तिनी टकारोत्तरवर्त्तिनी अकाररूपा आनुपूर्वी अवच्छेदिका। एवं घटपदस्य गगरी–घाघरादयः नैके अपभ्रंशाः। तथैव कुम्भकलशादयः अनेके शुद्धपर्यायाः। अस्यां स्थितौ शुद्धशब्दापभ्रंशयोः कः भेदः इति शास्त्रविद्भिः विवेकः कर्तव्यः। तथा च शुद्धशब्दवत् अपभ्रंशानां सर्वत्रैकत्वेन प्रत्येकं शब्दः शक्तः एव। तथा हि कोशादौ साधुशब्दानामेव ग्रहणं विभागाभिधानात्। अतः अपभ्रंशपर्यायाः गणयितुं न शक्याः कोशाभावात्।

एवं सति अपभ्रंशेषु शक्तिस्वीकारेऽपि न तेषां साधुत्वम्। यतो हि शक्तिग्रहे जाते अर्थबोधः, अर्थबोधे जाते साधुत्वं, साधुत्वे जाते पुण्यम्। तस्मात् साध्वसाधुशब्दानां समानार्थेऽपि घटादयः साधुशब्दाः प्रयोक्तव्याः, न तु गगर्यादयः। अतः पुण्योत्पत्तिं मनसि निधाय अर्थबोधाय नितरां सुतरां च साधुशब्दाः प्रयोक्तव्याः। तथाहि वेदपुरुषस्य आज्ञा– 'साधुभिर्भाषितव्यम्' इति। एवम् असाधुशब्दाः पापोत्पत्त्या सह अर्थबोधं जनयन्ति। अतः निषेधः क्रियते 'नासाधुभिः' इति। इत्थञ्च पुण्यजननयोग्यत्वं साधुत्वम्। पापजननयोग्यत्वमसाधुत्वं, तत्र जनकताऽवच्छेदिका च जातिः। तज्ज्ञापकञ्च कोशादि व्याकरणादि च।

एवमेव राजसूययज्ञः क्षत्रियेभ्यः फलजनकत्वं जनयति, न तु ब्राह्मणेभ्यः। तथाहि श्रुतिः 'राजा राजसूयेन यजेत' इति। तथैव गवादिशब्दानाम् अश्वादौ न साधुत्वं सङ्गच्छते। एवमाधुनिकदेवदत्त–रामकृष्ण–मैत्रादिनाम्नामपि 'द्व्यक्षरं चतुरक्षरं वा नाम कुर्यात्' इति भाष्यवचसा व्युत्पादितत्वात् साधुत्वम्। इत्थञ्च यः शब्दो यत्रार्थे पदशास्त्रे व्युत्पादितः स तत्र साधुरिति अवगन्तव्यम्। अतः साध्वसाधुनिर्णये व्याकरणशास्त्रमेव परमं प्रमाणम्। 'सिंहो माणवकः' इत्यादौ सिंहगतशौर्यादिगुणाः माणवके आरोप्यन्ते। तद्वत् गौणानां गुणे व्युत्पादनात् तत्पुरस्कारेण प्रवृत्तौ साधुत्वम्। तत्र गौणपदस्य व्याख्यानं क्रियते दर्पणटीकायां 'गौणपदस्य निरूढलाक्षणिकपदोपलक्षणत्वाच्च न 'गङ्गायां घोषः' इत्यादौ गङ्गादि-पदानामसाधुत्वमिति भावः।'[12] एवमाधुनिकलाक्षणिकशब्दानाम् असाधुत्वमिष्टमेव। अत एव 'ब्राह्मणाय देहि' इत्यर्थे 'ब्राह्मणं देहि' इत्यादिकं प्रयोगलक्षणयाऽपि न साधुत्वं सम्भवेत्। प्रकृतविचारोऽयं विस्तरेण प्रपञ्चितः वैयाकरणभूषणे।

एवं व्याकरणकोशाद्यतिरिक्तशक्तिग्रहोपायः प्रकटितः कारिकायाम्। तथाहि –

**सम्बन्धिशब्दे सम्बन्धो योग्यतां प्रति योग्यता।**
**समयाद् योग्यतासंविन्मातापुत्रादियोगवत्॥**[13]

शक्तिग्रहे कोशव्याकरणादि अतिरिच्य अन्यः कश्चन उपायः व्यवहारः। सर्वैः वाग्व्यवहारे अपभ्रंशशब्दाः प्रयुज्यन्ते। अतः नः दिनचर्य्यायाम् अपभ्रंशेभ्यः व्यवहारकारणात् बोधकता शक्तिः तत्रापि अस्त्येव नात्र कापि संशीतिः। एवं शक्तिज्ञानस्य नैके उपायाः भवन्ति– यथा 'व्याकरण–उपमान–कोश–आप्तवाक्य–व्यवहार–वाक्यशेष–विवरण–प्रसिद्धपदस्य समीपता' चेति। तेषु शक्तिग्रहशिरोमणिः व्यवहारः। अतः भट्टोजिदीक्षितेन अस्यां कारिकायां शक्तिज्ञानस्य उपायत्वेन व्यवहारः स्वीकृतः। सम्बन्धो विषयः, योग्यतां प्रति योग्यता सम्बन्धिशब्दं प्रति योग्यता विषय इति। कारिकायां समयात् नाम व्यवहारात्, योग्यतासंवित् नाम शक्तिग्रहः। अत्र दृष्टान्तः मातापुत्रादियोग्यतावत्। एवं घटपदमत्र योग्यमेतत्सम्बन्धीति व्यवहारतः स्वीकर्तव्या। प्रकृतविचारः दर्पणटीकायां सुष्टु प्रतिपादितः। तथाहि– 'अन्ये त्विदं हरिपद्यमित्थं व्याचक्षते सम्बन्धिशब्दे अयमेतत्सम्बन्धीति व्यवहारे। योग्यतां प्रति अर्थबोधजनकताऽवच्छेदकधर्मवत्त्वरूपयोग्यताव्यवहारनिरूपितो यस्तादात्म्य-लक्षणोऽन्यो वा सम्बन्धः स एव योग्यताऽपरपर्यायो विषय इति शेषः। स चानादिः, वृद्धव्यवहारापरपर्यायोऽस्मदादिसमयान्निश्चीयते, न तु बोधजनकत्वमेव शक्तिः, तत्तद्बोधजननेऽयं योग्य इति व्यवहारात्।'' अत एवैतच्छेषे–

**सति प्रत्ययहेतुत्वं सम्बन्ध उपपद्यते।**
**शब्दस्यार्थे यतस्तत्र सम्बन्धोऽस्तीति गम्यते॥**[14]

**उपसंहृतिः–** इत्थञ्चापभ्रंशेष्वपि शक्तिरस्त्येव। तथापि साध्वसाधुशब्दयोर्मध्ये फले पृथक्त्वं दर्शयति। तत्र साधुशब्दप्रयोगेण पुण्यम्, असाधुशब्दप्रयोगेण पापम्। अतः अस्माभिः नूनं साधुशब्दप्रयोगाय प्रयत्नः विधेयः। एवमपभ्रंशेष्वपि शक्तिसत्त्वेऽपि 'साधुशब्दैरेव भाषितव्यं नासाधुशब्दैरिति' इति भगवतः भाष्यकारस्य वचनं संस्मृत्य विरम्यते विस्तरात् इति शिवम्।।

*

## सन्दर्भाः


1. वैयाकरणभूषणसारः, समासशक्तिनिर्णयः, पृ. 234
2. तत्रैव, शक्तिनिर्णयः, पृ. 267
3. वाक्यपदीयम् 3.3.4
4. इदञ्चार्थधीजनकत्वं पित्रादिसंकेतज्ञानादेव गृह्यते, अतस्तज्ज्ञानात् पूर्वं न बोधः, वै. भू. सा. (शक्तिनिर्णयः)
5. भूषणसार–परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा, शक्तिस्वरूपविमर्शः, पृ.195
6. वै. भू. सा., शक्तिनिर्णयः, का. 38
7. भूषणसार–परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा, शक्तिस्वरूपविमर्शः, पृ. 195
8. वाक्यपदीयम् 1.140-143
9. तत्रैव 1.144, 145
10. वै. भू. सा, शक्तिनिर्णयः, पृ. 284
11. वै. भू. सा पृ. 70
12. वै. भू. सा. शक्तिनिर्णयः, पृ. 287
13. शक्तिनिर्णयः, कारिका - 39
14. वाक्यपदीयम् 3.3.37


*

# श्रीमद्भागवतपुराणे तत्त्वस्वरूपम्-भगवत्सन्दर्भानुसारमेकमालोचनम्

**डॉ. अञ्जना शर्मा**

वैष्णववेदान्तदर्शनेषु अचिन्त्यभेदाभेदवादस्य प्रतिष्ठापको जीवगोस्वामी रससिद्धः कविर्महावैयाकरणो महादार्शनिकश्च। दार्शनिकक्षेत्रे तेनैव विरचितभागवतसन्दर्भः प्रसिद्धो ग्रन्थोऽस्ति। ग्रन्थोऽयं षट्सन्दर्भः इति नाम्नापि प्रख्यातः, येषु तत्त्वानि भगवान् परमात्मा कृष्णः भक्तिः प्रीतिश्च सन्ति। अस्य ग्रन्थस्य भागवतसन्दर्भस्य नाम्नैव ज्ञायते यदस्मिन् ग्रन्थे श्रीमद्भागवतपुराणमाश्रित्य तत्त्वविवेचनं कृतम्। जीवगोस्वामिना श्रीमद्भागवतपुराणं समाश्रित्य स्वकीयमतं प्रस्तुतम्। द्वितीयभगवत्सन्दर्भे श्रीमद्भागवतस्य तत्त्वस्वरूपं निरूपितम्। श्रीमद्भागवतस्य प्रथमस्कन्धे तत्त्वं वर्णितम् –

**वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।**
**ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥**[1]

अत्र किं स्वरूपं तद्वस्तुतत्त्वमित्याह– 'वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्' इति। अद्वयज्ञानं स्पष्टयन् जीवगोस्वामी भगवत्सन्दर्भे कथयति यद् ज्ञानं चिदेकरूपम्। अद्वयत्वञ्चास्य स्वयं सिद्धतादृशातादृशतत्त्वान्तराभावात्, स्वशक्त्येकसहायत्वात्, परमाश्रयं तं विना तासामसिद्धत्वाच्च। 'तत्त्वम्' इति परमपुरुषार्थताद्योतनया परमसुखरूपत्वं तस्य बोध्यते। अत एव तस्य नित्यत्वञ्च दर्शितम्।[2]

अग्रे भगवत्सन्दर्भे[3] जीवगोस्वामी अद्वयज्ञानलक्षणं तत्तत्त्वं सामान्यतो लक्षयित्वा पुनरुपासक-योग्यता-वैशिष्ट्येन प्रकटितनिजसत्ताविशेषं विशेषतो निरूपयति।

जीवगोस्वामिनः मतानुसारेण श्रीमद्भागवताख्यमेव शास्त्रे क्वचिदन्यत्रापि तदेकं तत्त्वं त्रिधा शब्द्यते– क्वचिद् ब्रह्मेति, क्वचित् परमात्मेति, क्वचिद्भगवानिति च। ब्रह्म–भगवतोर्व्याख्यातयोः परमात्मा स्वयमेव व्याख्यातो भवतीति प्रथमतस्तावेव प्रस्तूयेते। ब्रह्मस्वरूपं

लक्षयति यत् 'तमेकमेवाखण्डानन्दस्वरूपं तत्त्वं थुत्कृत–पारमेष्ठ्यादिकानन्दसमुदायानां परमहंसानां साधनवशात्तादात्म्यमापन्ने सत्यामपि तदीयस्वरूपशक्तिवैचित्र्यां तद्ग्रहणासमर्थे चेतसि यथा सामान्यतो लक्षितं तथैव स्फुरद्वा तद्वदेवाविविक्तशक्तिशक्तिमत्ताभेदतया प्रतिपाद्यमानं वा ब्रह्मेति शब्द्यते'।[4] अथ भगवतः स्वरूपं लक्षयति यत् 'तदेकं तत्त्वं स्वरूपभूतयैव शक्त्या कमपि विशेषं धर्तृ परासामपि शक्तीनां मूलाश्रयरूपं तदनुभवानन्दसन्दोहान्तर्भावितादृशब्रह्मानन्दानां भागवत–परमहंसानां तथानुभवैकसाधकतम– तदीयस्वरूपानन्दशक्तिविशेषात्मक–भक्तिभावितेष्वन्तर्बहिरपीन्द्रियेषु परिस्फुरद्वा तद्वदेव विविक्त–तादृशशक्ति–शक्तिमत्ताभेदेन प्रतिपाद्यमानं वा भगवानिति शब्द्यते'।[5] यथाहि श्रीमद्भागवते श्रीजडभरतेन उक्तम्–

**ज्ञानं विशुद्धं परमार्थमेक–**
**मनन्तरं त्वबहिर्ब्रह्म सत्यम्।**
**प्रत्यक् प्रशान्तं भगवच्छब्दसंज्ञं,**
**यद्वासुदेवं कवयो वदन्ति।।**[6]

श्रीध्रुवं प्रति श्रीमनुना च–

**त्वं प्रत्यगात्मनि तदा भगवत्यनन्त**
**आनन्दमात्र उपपन्नसमस्तशक्तौ।**
**भक्तिं विधाय परमां शनकैरविद्या-**
**ग्रन्थिं विभेत्स्यसि ममाहमिति प्ररूढम्।।**[7]

एवञ्चानन्दमात्रं विशेष्यम्, समस्ताः शक्तयो विशेषणानि, विशिष्टो भगवानित्यायातम्। तथा चैवं वैशिष्ट्ये प्राप्ते पूर्णाविर्भावत्वेनाखण्डतत्त्वरूपोऽसौ भगवान्। ब्रह्म तु स्फुटमप्रकटितवैशिष्ट्याकारत्वेन तस्यैवासम्यगाविर्भाव इत्यायातम्।

**तत्त्वाविर्भावे योग्यता–**

योग्यतावैशिष्ट्येनाविर्भाववैशिष्ट्यमिति स्पष्टयितुं श्रीमद्भागवतमुद्धृत्य ब्रह्माविर्भावे योग्यतामाह, यथाहि दशमस्कन्धे ब्रह्मस्तुतौ पद्यमिदम्–

**तथापि भूमन् महिमागुणस्य ते**
**विबोद्धुमर्हत्यमलान्तरात्मभिः।**
**अविक्रियात् स्वानुभवादरूपतो**
**ह्यनन्यबोध्यात्मतया न चान्यथा।।**[8]

अस्य व्याख्यां कुर्वन् जीवगोस्वामी लिखति यदत्र ब्रह्मा श्रीकृष्णं स्तौति[9]– यद्यपि ब्रह्मत्वे भगवत्तत्त्वे च दुर्ज्ञेयत्वमुक्तम्, तथापि हे भूमन्! स्वरूपेण गुणेन चानन्त! ते तव अगुणस्य अनाविष्कृतस्वरूपभूतगुणस्य यो महिमा महत्त्वं बृहत्त्वं ब्रह्मत्वमिति यावत्– 'अथ कस्मादुच्यते ब्रह्म बृंहति बृंहयति च' इति श्रुतेः, स तव महिमा अमलान्तरात्मभिः शुद्धान्तःकरणैर्जनैर्विबोधुमर्हति तेषां बोधे प्रकाशितुमर्हति समर्थो भवतीत्यर्थः। कस्मान्निमित्तात्? तत्राह–स्वानुभवात् शुद्धत्वम्पदार्थस्य बोधात्। नन्वनुभवः खल्वन्तःकरणवृत्तिः, सा च स्थूल-सूक्ष्मदेहविकारमय्येव सती कथं निर्विकारं त्वम्पदार्थं विषयं कुर्वीत? तत्राह–अविक्रियात् त्यक्त–तत्तद्विकारात्। ननु विषयाकार एवानुभवो विषयमुपाददीत, शुद्धत्वम्पदार्थस्तु न कस्यापि विषयः स्यात्, प्रत्यग्रूपत्वात्? तत्राह–अरूपतो रूप्यते भाव्यत इति रूपो विषयः, तदाकारतारहितात्। देहद्वयावेशविषयाकारताराहित्ये सति स्वयमेव शुद्धत्वम्पदार्थः प्रकाशत इति भावः। ननु सूक्ष्मचिद्रूपत्वम्पदार्थानुभवे कथं पूर्णचिदाकाररूपमदीयब्रह्मस्वरूपं स्फुरतु? तत्राह–अनन्यबोध्यात्मतया चिदाकारतासाम्येन शुद्धत्वम्पदार्थैक्यबोध्यस्वरूपतया? यद्यपि तादृगात्मानुभवानन्तरं तदनन्यबोध्यताकृतौ साधकशक्तिर्नास्ति, तथापि पूर्वं तदर्थमेव कृतया सर्वत्राप्युपजीव्यया साधनभक्त्याराधितस्य श्रीभगवतः प्रभावादेव तदपि तत्रोदयत इति भावः। प्रमाणमत्र श्रीमद्भागवते 'वदन्ति' इत्यादिपद्यानन्तरमेव पद्यम्[10]–

**तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया।**
**पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया॥**[11]

तादृशाविर्भावमाह सार्द्धेन ब्रह्मा नारदं प्रति द्वितीयस्कन्धे–

**शश्वत् प्रशान्तमभयं प्रतिबोधमात्रं,**
**शुद्धं समं सदसतः परमात्मतत्त्वम्।**
**शब्दो न यत्र पुरुकारकवान् क्रियार्थो**
**माया परैत्यभिमुखे च विलज्जमाना॥**
**तद्वै पदं भगवतः परमस्य पुंसो।**
**ब्रह्मेति यद्विदुरजस्रसुखं विशोकम्॥**[12]

अत्र जीवगोस्वामी अर्थं करोति[13]–सर्वतो बृहत्तमत्वाद् ब्रह्मेति यद्विदुस्तत् खलु परमस्य पुंसो भगवतः पदमेव, निर्विकल्पतया साक्षात्कृतेः प्राथमिकत्वात्। ब्रह्मणश्च भगवत एव निर्विकल्पसत्तारूपत्वाद् विचित्ररूपादिविकल्पविशेषविशिष्टस्य भगवतस्तु साक्षात्कृतेस्त-दन्तरजत्वात् तदीयस्वरूपभूतं तद्ब्रह्म तत्साक्षात्कारास्पदं भवतीत्यर्थः। निर्विकल्पब्रह्मणस्तस्य स्वरूपलक्षणमाह, प्रतिबोधमात्रमिति, अजस्रसुखमिति च। जडस्य दुःखस्य च प्रतियोगितया

प्रतीयते यद्वस्तु, यच्च नित्यं तदेकरूपम्, तद्रूपमित्यर्थः। यदात्मतत्त्वं सर्वेषामात्मनां मूलम्; आत्मा हि स्वप्रकाशरूपतया निरुपाधिपरमप्रेमास्पदतया च तत्तद्रूपेण प्रतीयत इत्यर्थः। अथ तस्य सुखरूपस्याजस्रत्वे हेतुमाह, शश्वत् प्रशान्तं नित्यमेव क्षोभरहितं तद्वदभयं भयशून्यं विशोकं शोकरहितञ्चेति। न च सुखरूपत्वे तस्य पुण्यजन्यत्वं स्यादित्याह – शब्दो न यत्रेति। यत्र क्रियार्थो यज्ञाद्यर्थः पुरुकारकवान् शब्दो न प्रवर्तत इत्यर्थः। किन्तु ''औपनिषदः पुरुषः'' इत्यादिरीत्या केवलमुपनिषदेव प्रकाशिका भवतीत्यर्थः। पुनः स्वसुखरूपत्वे चेन्द्रियजन्यत्वं व्यावर्त्तयति–शुद्धमित्यादिना। तत्र शुद्धं दोषरहितम्, सममुच्चावचताशून्यम्, सदसतः परं कारणकार्यवर्गादुपरिस्थितम्। किं बहुनेत्याह–माया च यस्याभिमुखे यदुन्मुखतया स्थिते जीवन्मुक्तगणे विलज्जमानेव परैति पलायते, ततो दूरं गच्छतीत्यर्थः।

अथ श्रीभगवदाविर्भावे योग्यतामाह[14] –

**भक्तियोगेन मनसि सम्यक् प्रणिहितेऽमले।**
**अपश्यत् पुरुषं पूर्णं मायां च तदुपाश्रयम्।।**[15]

तदाविर्भावमाह सार्द्धदशभिः श्रीमद्भागवतपुराणे–

**तस्मै स्वलोकं भगवान् सभाजितः**
**सन्दर्शयामास परं न यत्परम्।**
**व्यपेतसंक्लेशविमोहसाध्वसं**
**स्वदृष्टवद्भिः पुरुषैरभिष्टुतम्।।**
**प्रवर्तते यत्र रजस्तमस्तयोः**
**सत्त्वञ्च मिश्रं न च कालविक्रमः।**
**न यत्र माया किमुतापरे हरे-**
**रनुव्रता यत्र सुरासुरार्चिताः।।**
**श्यामावदाताः शतपत्रलोचनाः**
**पिशङ्गवस्त्राः सुरुचः सुपेशसः।**
**सर्वे चतुर्बाहव उन्मिषण्मणि-**
**प्रवेकनिष्काभरणाः सुवर्चसः।**
**प्रवालवैदुर्य्यमृणालवर्चसः**
**परिस्फुरत्कुण्डलमौलिमालिनः।।**

भ्राजिष्णुभिर्यः परितो विराजते
लसद्विमानावलिभिर्महात्मनाम्।
विद्योतमानः प्रमदोत्तमाद्युभिः
सविद्युदभ्रावलिभिर्यथा नभः॥
श्रीर्यत्र रूपिण्युरुगायपादयोः
करोति मानं बहुधा विभूतिभिः।
प्रेङ्खं श्रिता या कुसुमाकरानुगै–
र्विगीयमाना प्रियकर्म गायती॥
ददर्श तत्राखिलसात्वतां पतिं
श्रियः पतिं यज्ञपतिं जगत्पतिम्।
सुनन्दनन्दप्रबलार्हणादिभिः
स्वपार्षदाग्र्यैः परिषेवितं विभुम्॥
भृत्यप्रसादाभिमुखं दृगासवं
प्रसन्नहासारुणलोचनाननम्।
किरीटिनं कुण्डलिनं चतुर्भुजं
पीतांशुकं वक्षसि लक्षितं श्रिया॥
अध्यर्हणीयासनमास्थितं परं
वृतं चतुःषोडशपञ्चशक्तिभिः।
युतं भगैः स्वैरितरत्र चाध्रुवैः
स्व एव धामन् रममाणमीश्वरम्॥
तद्दर्शनाह्लादपरिप्लुतान्तरो
हृष्यत्तनुः प्रेमभराश्रुलोचनः।
ननाम पादाम्बुजमस्य विश्वसृग्
यत् पारमहंस्येन पथाधिगम्यते॥
तं प्रीयमाणं समुपस्थितं कविं
प्रजाविसर्गे निजशासनार्हणम्।

**बभाष ईषत्स्मितशोचिषा गिरा**
**प्रियः प्रियं प्रीतमनाः करे स्पृशन्॥**[16]

पद्येष्वेतेषु श्रीभगवदाविर्भावं वर्णितवान्। श्रीभगवदाविर्भावस्य हेतुः भक्तिरिति। भक्तिस्तदीयस्वरूपानन्दशक्तिरेव। एवमेवमुपासकयोग्यतावैशिष्ट्येन तत्त्वाविर्भाव इति सिद्धम्।

उपर्युक्तविवेचनेन स्पष्टं यद्भगवत्सन्दर्भे जीवगोस्वामिना श्रीमद्भागवतपुराणस्य तत्त्वं सम्यक्तया प्रकाशितम्। अद्वयज्ञानलक्षणं तत्त्वमेकमेव। तदेकं तत्त्वं त्रिधा शब्द्यते–क्वचिद् ब्रह्मेति क्वचित् परमात्मेति क्वचिद् भगवानिति च। भगवद्रूपपूर्णाविर्भावं तत्तत्त्वं जीवादिनियन्तृत्वेन स्फुरद्वा प्रतिपाद्यमानं वा परमात्मेति शब्द्यते। आनन्दमात्रं विशेष्यम्, समस्ताः शक्तयो विशेषणानि, विशिष्टो भगवान्। पूर्णाविर्भावत्वेनाखण्डतत्त्वरूपोऽसौ भगवान्। ब्रह्म तु स्फुटमप्रकटितवैशिष्ट्याकारत्वेन तस्यैवासम्यगाविर्भाव इति। यद्यप्येते ब्रह्मादिशब्दाः प्रायो मिथोऽर्थेषु वर्तन्ते तथापि तत्र तत्र प्राधान्यविवक्षयेदमुक्तम्।

तत्त्वमेकमुपासकयोग्यतावैशिष्ट्येन निजसत्ताविशेषं प्रकटयति। जीवगोस्वामी तत्त्वाविर्भावाय सप्रमाणमुपासकयोग्यतां प्रस्तुत्य तत्त्वमेकस्य सविशेषं निर्विशेषं च स्वरूपं प्रतिपादयति।

*

## सन्दर्भाः


1. श्रीमद्भागवतपुराणम्, 1.2.11
2. तत्त्वसन्दर्भः जीवगोस्वामी, व्रजगौरव-प्रकाशनम्, वृन्दावनम्, पृ.175
3. भगवत्सन्दर्भः, पृ.2
4. तत्रैव, पृ.3
5. तत्रैव, पृ.3
6. श्रीमद्भागवतपुराणम्, 5.12.11
7. तत्रैव, 4.11.30
8. श्रीमद्भागवतपुराणम्, 10.14.6
9. भगवत्सन्दर्भः, पृ.18
10. भगवत्सन्दर्भः, पृ.19
11. श्रीमद्भागवतपुराणम्, 1.2.12
12. श्रीमद्भागवतपुराणम्, 2.7.47
13. भगवत्सन्दर्भः, पृ.21
14. भगवत्सन्दर्भः, पृ.23
15. श्रीमद्भागवतपुराणम्, 1.7.4
16. श्रीमद्भागवतपुराणम्, 2.9.9-18


*

# वेदत्रयी अथर्ववेदश्च

**डॉ. जितेन्द्र कुमारः**

ज्ञानागाराणि वेदाः। एतेषु विविधविद्यानां मूलतः समावेशोऽस्ति। तस्मादेव महर्षि-र्मनुर्वेदसम्बन्धे **''सर्वज्ञानमयो हि सः''** इति भावं प्रकटयति। महाभारतादनन्तरं आचार्यसायणो वेदपरम्परां पुनरुज्जीवयितुं प्रयेते। आचार्यश्शंकरोऽपि **''शास्त्रयोनित्वात्''** इति सूत्रं व्याख्यायन् वेदः सर्वज्ञस्य विभोः कृतिरिति उच्चार्यास्यापौरुषेयत्वं संसाधयामास। वेदविषये सायणाचार्यादनन्तरं यत्कार्यमभूत् तत्सर्वं सायणानुकरणमात्रमिति वक्तुं शक्यते। किन्तूनविंशत्यां शताब्द्यां यदा महर्षिदयानन्दो वेदेषु ध्यानमददात् तदा स्वामी दयानन्दः पूर्णविश्वासेन तर्कैः प्रमाणैश्चैवमुवाच **''वेदः सर्वेषां सत्यज्ञानस्य पुस्तकम् अस्ति, वेदस्य पठनम्, अध्यापनं, श्रवणं च सर्वेषाम् आर्याणां परमधर्मः अस्ति।''** इत्युद्घोषणानन्तरं यावत् कार्यमभूत् वेदविषये न तावत् तस्मात् पूर्वम्। **चत्वारो वै वेदाः**, ते च ऋग्, यजुः, साम, अथर्व इति संहितारूपेण महत्त्वभाजः इति महर्षिर्दयानन्दः। अन्येषामपि विदुषामेवं मतम्। किन्तु केचित्पाश्चात्त्यविद्वांसः तेभ्यः प्रभावितानां पौर्वात्यविदुषां चैषा धारणा यत् ''त्रयीविद्या'' इत्युक्तत्वात् त्रय एव वेदा इति, ते च ऋग्, यजुः सामाभिधेयाः।

विषयेऽस्मिन् निम्नाङ्कितानि प्रमाणानि प्रस्तुवन्ति ''अग्निवाय्वादित्यनामभ्य ऋषिभ्यः क्रमशः ऋग्वेद, यजुर्वेद, सामवेद इति वेदत्रयी प्रादुर्बभूवेति।''[1] शतपथब्राह्मणे त्रयाणां वेदानामुत्पत्तिर्वर्ण्यते–अग्नेः ऋग्वेदः, वायोर्यजुर्वेदः, सूर्यात् सामवेद इति।[2] शतपथ-ब्राह्मणेऽन्यत्राऽपि त्रयीविद्येत्यनेन ऋग्यजुस्साम्नामेवोल्लेखः क्रियते।[3] छान्दोग्योपनिषदि निम्नविधा विद्योत्पत्तिर्वर्णिता–ऋग्वेदोऽग्नेः, यजुर्वेदो वायोः, सामवेदश्चाऽऽदित्यात्।[4] तैत्तिरीयब्राह्मणेऽपि त्रयाणां वेदानां ज्ञातार इत्युक्तमस्ति। नामोल्लेखः च ऋग्यजुस्साम्नां कृतोऽस्ति।[5] गोपथब्राह्मणे त्रिभ्यो देवेभ्यो वेदत्रय्या उत्पत्तिर्विवर्ण्यते।[6] बृहदारण्यकोपनिषदि ''त्रिवेदज्ञो हि जयति'' इत्युक्त्वा त्रिवेदाः प्रतिपाद्यन्ते।[7] निरुक्तेऽपि त्रिवेदमेव वर्णयन्नुच्यते ऋग्भिः प्रशंसन्ति, यजुर्भिर्यजन्ति, सामभिश्च स्तुवन्ति।[8]

महाभारतेऽपि त्रयीविद्यया त्रयाणां वेदानामेव ग्रहणं चकार।[9] मनुस्मृतावपि त्रयीविद्येत्युक्त्वा श्लोक आयाति–यज्ञसिद्ध्यर्थमग्निवायुरविभ्यः क्रमशः ऋग्वेदो यजुर्वेदः सामवेदश्च अजायत।[10]

वेदा अप्यस्मिन्विषये साक्षिभूताः क्रियन्ते। चतुर्वेदोल्लिखितेऽस्मिन्मन्त्रे परमेश्वरादेव छन्दोबद्धानां त्रयाणां वेदानां प्रादुर्भावो वर्ण्यते नामोल्लेखपूर्वकम्– ऋग्वेदो यजुर्वेदः सामवेदश्च।[11]

रथनाभाविवाराः यस्मिन्मनसि ऋचो यजूंषि सामानि प्रतिष्ठितानि सन्ति तन्मे मनः शिवसंकल्पमस्त्वित्यपि वेदे।।[12] एवं विविधैः प्रमाणैः त्रयीविद्याया अभिप्रायः त्रयो वेदा इति साधयितुं प्रयतन्ते विद्वांसः।

1. त्रयीविद्यया ऋग्यजुःसाम्नामेव ग्रहणम्। यदि चतुर्थोऽथर्ववेदोऽस्ति तर्हि कथं तस्य नामग्रहणं न क्रियेत। एतस्मात् कारणात् अर्वाचीनोऽथर्ववेद इति प्रतीयते।

2. सहैषामृग्यजुःसाम्नां नामानि प्राप्यन्ते नाऽथर्ववेदस्यातो ज्ञायतेऽथर्ववेदः ऋग्वेदादेः पश्चाद्भावीति।

3. अथर्ववेदः त्रिवेदापेक्षया भाषयाऽर्थेन च सरलोऽतः ऋग्वेदाद्यनन्तरकृतिरिति प्रतिभासते।

4. अथर्ववेदे यदि ऋग्यजुस्सामभिस्सहाथर्ववेदस्य नाम स्यात् तथाप्यनेन न सिध्यते यत् अथर्ववेद ऋग्वेदादिसहज एव। यतोहि परवर्त्तिग्रन्थेषु महत्त्वभाजां पूर्वग्रन्थानां नामग्रहणं क्रियत एव।

ये विद्वांसः त्रयीविद्याया अभिप्रायं त्रीन् वेदान् गृह्णन्ति तेषां तत्र मिथ्याधारणामपाकर्तुं पूर्वमत्र तस्या अभिप्रायः स्पष्टीक्रियते। चतुर्णां वेदानां तस्य कारणम्। पद्यरचना ऋचा नाम्ना प्रसिद्धाऽऽसीत्, गद्यात्मकं यजुः, गेयञ्च साम। यतोहि पद्यगद्यगानेभ्यः अतिरिक्ता न काऽप्यन्या रचनाऽतः ऋग्यजुःसामाथर्वसंहितासु ऋग्यजुस्सामातिरिक्ता न काचिद्रचनाशैली मन्त्राणां नयनविषयो भवति। पद्यगद्यगेयभिन्नाऽन्या रचना न कदापि रचिता, नाप्यद्यत्वे विद्यते, कथं तर्हि ऋग्यजुःसामभिर्भिन्ना रचना वैदिकी सञ्जायेत? तस्मादुवाच महर्षिजैमिनिः- येषां मन्त्राणामर्थसंहिता पादव्यवस्था ता ऋचः। यानि गीयन्ते तानि सामानि। शेषा यजूंषि। सरलाश्च चतुर्था अथर्वाणः।[13]

सर्वानुक्रमण्या वृत्तिभूमिकायामाचार्यष्षड्गुरुशिष्यो विचारमेनं संचारयामास।[14]

वेदचतुष्टय्यामृग्यजुःसामानि एवंविधानि प्राप्यन्ते। अहेर्बुध्नीयमन्त्रेषु एषामेवोल्लेखः।

पादनिबद्धा मन्त्रा ऋचः, गीतात्मकानि सामानि, गद्यात्मकानि च यजूंषि। चतुर्षु वेदेष्वेषां त्रिप्रकारकाणां मन्त्राणां विनियोगः।[15] ''वेदैरशून्य'' इत्यादिषु मन्त्राणां त्रिविधता उररीकृता। ''यज्ञपरिभाषागत'' ''सर्वैर्ब्रह्मेति'' मन्त्रेऽपि चतुर्भिरित्युक्त्वैष एव निर्णयो निर्णीतः।[16]

प्रस्तुतै ऋगादिभिः ऋग्यजुस्सामान्येव प्रयोजनम्। तदेव च सूत्रकारणम्। ऋचात्मक-मन्त्रबाहुल्येनैव ऋग्वेदः सम्पन्नः। एवमेवाऽन्येऽपि वेदाः।[17] अथर्ववेदे शान्तिपुष्ट्यादिकर्मणां ब्रह्मवर्गविषयाणां तथा च प्रणवविद्यायाः प्रतिपादनमस्ति। ऋचां यजुषां च तत्राधिक्यम्।[18] यद्यपि सामसंहितायाः स्तोमं गानं च मूलत ऋगाधृतमेव स्तोमाश्च यजूंषि तथापि साम्नामाधारभूमिर्न कुत्रचिदन्यत्र प्राप्यते। त्रिधा रचना भवन्ति पद्यं, गद्यं, गीतञ्चैवं त्रिप्रकारकेण रचनाविभागेन क्रमशः ऋग्संहिता, यजुःसंहिता, सामसंहिता इति त्रीणि नामानि तु निष्पन्नानि। किन्त्वत्राऽयं प्रश्नः चतुर्थसंहितायाः किं नाम क्रियेत? विभक्तनाम्नि एवास्याः संहितायाः नामकरणमिति समाधानम्। अथर्वसंहितानाम्न इदमेव रहस्यम्। अधिकरणमालायामृगादीनां पादगीत्यादिलक्षणानि निम्नोक्तानि वर्णितानि सन्ति। अर्थयुक्ताः पादवन्तो वृत्तनिबद्धाः मन्त्रा ऋचः।।[19] वृत्तगीतिरहिता प्रश्लिष्टरूपपठिता मन्त्रा यजूंषि।[20] यानि गीयन्ते तानि सामानि।[21]

यद्येवं स्यात् यद् ऋग्वेदीया मन्त्रा ऋचः, यजुर्वेदीया यजूंषि, सामवेदीया सामानि, तर्हि नाऽत्रैवं कथ्येत। अत्र ऋक्सामयजूःकथनात् स्पष्टम् इदं यत् त्रिविद्यासु चतुर्णां वेदानां समावेशः। वस्तुतो यत्र कुत्राऽपि कस्मिन्नपि ग्रन्थे कश्चिद् पादयुक्तो वृत्तबद्धश्च मन्त्रो दृश्येत स ऋङ्मन्त्र इति निश्चयः। गेयात्मको यत्र दृश्यते स साम एव। एतदेव च यजुःसम्बन्धे उचितम्। ऋक्प्रातिशाख्येऽमुमेव व्याख्यायन्नाह विष्णुमित्रः –

यः कश्चिद् पादवान् मन्त्रो युक्तश्चाक्षरसम्पदा। स्वरयुक्तोऽवसाने च तामृचं परिजानते।।

आचार्ययास्केन ऋगुपोद्धृतं ''**अङ्गादङ्गात् सम्भवसि**'' इति वचनं वस्तुतो यजुस्साम्नोर्ब्राह्मणाद् गृहीतमस्ति। नाऽन्यत्र ऋक्संहितायाः कस्याञ्चित् शाखायां प्राप्यते प्रत्युत ''शतपथब्राह्मणे'' सामवेदस्य मन्त्रब्राह्मणे च प्राप्यते। मुनिवरो यास्कः चेत् ऋक्संहितागतवचनमेव ऋङ् मन्येत कथं तर्ह्येवमुच्येत? 'तदेतदृक्श्लोकाभ्यामिति' मुन्याचार्याभ्यामङ्गीकृतयैतया प्रवृत्त्या ज्ञायते यद् ऋग्लक्षणयुक्तो वेदे कुत्राऽपि विद्यमानो मन्त्र ऋगेव। एतदेव यजुःसाम्नोः सम्बन्धेऽपि बोध्यम्।

अतोऽथर्ववेदोऽपि वेदत्रय्यामेव, नाऽतः पृथग्यतोहि तस्मिन्नपि ऋग्यजुषी स्तः। यथा सामबाहुल्यात्सामवेदो, यद्यपि तत्र ऋचो यजूंषि च वर्त्तन्ते। एवमेवाथर्ववेदेऽथर्वकृत्याः

सन्ति। तत्र पठिता ऋचो यजूंषि च कथं स्वनाम्ना न स्वीकरिष्यन्ते। स्वीकृते सति तेषां कथमथर्ववेदस्य वेदत्वे आघातो भवति? मन्येऽथर्ववेदोऽन्यवेदेभ्यः स्वतन्त्रः, किन्तु अथर्ववेदस्य येषु काश्चिद् ऋचः, कानिचिद्यजूंषि सन्ति तेषां कथं निषेधः संभाव्यते? न कदापि। अतः ग्रन्थभेदात् चत्वारो वेदा रचनाभेदाच्च त्रय इति निःसन्दिग्धोऽयं राद्धान्तः।

विषयदृष्ट्याऽपि त्रयीविद्योच्यते इति त्रयीविद्याकथनस्य द्वितीयं कारणम्। मन्त्रेषु त्रिधा रचनासकाशात् त्रयो विषया अपि विवर्ण्यन्ते। त्रयीविद्याया अभिप्रायः ज्ञानं, कर्म, उपासना च। चतुर्ष्वपि वेदेषु ज्ञानकर्मोपासनाः प्राप्यन्तेऽतः त्रयीविद्या वेदाः। ऋग्वेदे ज्ञानविषयकमन्त्रबाहुल्यात् ज्ञानकाण्डम् ऋग्वेदः। यजुर्वेदे कर्मविषयकमन्त्रबाहुल्यात् कर्मकाण्डो यजुर्वेदः। उपासनापरकमन्त्राधिक्यात् उपासनाकाण्डं सामवेदः। समस्तविषयसमावेशात् विज्ञानकाण्डोऽथर्ववेदः। महाभारतेऽपि एतदेवोच्यते। ऋग्यजुस्सामाथर्वसु त्रयीविद्याऽस्ति, त्रयीविद्यया सह चतुर्णां वेदानां नामग्रहणमप्यस्ति। अनेन ज्ञायते यच्चत्वारो वेदा एव त्रयीविद्याया अभिप्रायः।[22] त्रयीविद्यया कथनस्यैतदपि प्रयोजनं सम्भाव्यते यन्मन्त्राणां त्रिधोच्चारणप्रक्रियाऽप्यस्ति। ज्ञानकाण्डमृग्वेदः। ज्ञानं चाऽधिकतया त्वरयोपार्जनीयम्, तस्माद्द्रुतगत्यैनं पठन्ति। ज्ञानानन्तरं किञ्चिद्विचिन्त्य कर्म कुर्यात्, कर्मकाण्डश्च यजुर्वेदः तस्मादेनं मध्यमगत्योच्चारयन्ति। योगाभ्यासस्य विद्ययोपासनायाश्च फलं परमानन्दप्राप्तिरुपासनायां च शीघ्रता न कार्या। उपासनाकाण्डं सामवेदः, तस्मादेनं विलम्बगत्योच्चारयन्ति। एवं त्रिधोच्चारणप्रक्रियाभेदात् त्रयीविद्या वेदा उच्यन्ते। रचनात्रैविध्यात् त्रयीविद्या वेदाः, किन्तु ऋग्यजुःसामाथर्व इति संहिताक्रमेण चत्वारो वेदाः। प्रातिशाख्यादिग्रन्थेषु संहितालक्षणमेवं क्रियते। पदप्रकृतिः संहिता।[23] वर्णानामेकप्राणयोगः संहिता।[24] परः सन्निकर्षः संहिता।[25]

एषूपर्युक्तेषु ग्रन्थेषु परिभाषितपरिभाषानुसारं यत्रर्ग्यजुःसामानि संहितारूपेण लब्धस्थानानि तत्रैवाथर्ववेदोऽपि एतानीव संहिताऽस्ति। यतोहि न तत्र ऋग्वेदादिभ्यः काचिन्न्यूनता दृश्यते, येनाथर्ववेदसंहिता ऋग्वेदादिना समत्वं न भजत इति कथयेत्। अतः त्रय्या अन्तस्याऽस्यापि नामोल्लेखः स्थानेषु प्राप्यते। छान्दोग्योपनिषदि यत्र त्रयाणां वेदानां नामग्रहणमस्ति तत्र त्रिभिः सकाशात् अथर्ववेदस्याऽपि नामोल्लेखः प्राप्यते। ऋग्वेदं विजानाति यजुर्वेदं सामवेदाथर्वणं चतुर्थम्।[26]

तस्य विराजः पुरुषस्य निःश्वासरूपा इमे चत्वारो वेदा ऋग्वेदयजुर्वेदसामवेदाथर्ववेदाः प्रादुर्बभूवुः।[27]

महाभारतेऽन्यत्राऽपि, कथितमस्ति– एकतश्चतुरो वेदान्।[28] यो विद्याच्चतुरो वेदान्।[29]

मुण्डकोपनिषदि ऋग्वेदादिभिस्सहाथर्ववेदस्याऽपि नाम प्राप्यते। तत्राऽपरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः।[30]

काठकसंहितायामप्युक्तम् ऋग्वेदादिसाहचर्यमथर्ववेदस्य।[31] एवं यत्रापि त्रयीविद्येत्युच्यते तत्र चत्वारो वेदा एव तात्पर्यम्। त्रयीविद्यासकाशादेव वेदचतुष्टय्या अपि तद्ग्रन्थवर्णनात् सिद्ध्यति यद् वेदत्रयी वेदचतुष्टय्यामेव प्रयुक्ता। ऋग्वेदादावपि अथर्ववेदस्य नाम प्राप्यते, परन्तु अथर्वणोऽन्यनामान्यपि वैदिकसाहित्य उपलभ्यन्ते तथा च ऋग्वेदे छन्दोवेदः, ब्रह्मवेदः इत्यादिनामभिरथर्ववेदस्य ग्रहणमस्ति। यज्ञप्रक्रियायै ''अथर्वा'' ऋषेर्नाम प्राप्यते। निम्नाङ्कितैर्मन्त्रैः एतदेव प्रतीयते यद्यज्ञानामाविष्कर्त्ताऽथर्वा ऋषिरेवाऽस्ति। यज्ञैरथर्वा प्रथमः पथस्ते।[32]

अग्निर्जातोऽथर्वणा।[33] त्वामग्ने पुष्करादध्यथर्वा निरमन्यत।[34] अथर्वाणं पितरं देवबन्धुं मातुर्गर्भं पितरसुं युवानम्। य इमं यज्ञं मनसा चिकेत प्रणोवोचस्तमिह ब्रुवः।[35] ऐतरेयब्राह्मणस्य निम्नाङ्कितोक्तिरप्येतदेव स्पष्टं साधयति। यदृचैव होत्रं क्रियते यजुषाध्वर्य्यवं साम्नोद्गीथं व्यारब्धा त्रयीविद्या भवत्यथ केन ब्रह्मत्वं क्रियते इति त्रय्या विद्यया इति ब्रूयात्।[36] अत्राऽऽगतेन ''अथ केन ब्रह्मत्वं क्रियते'' **त्रय्या विद्यया** इत्यनेन स्पष्टं ज्ञायते यत् समस्ता त्रयीविद्या ब्रह्मणः कार्यसाधिकाऽस्ति। अथर्वसंहिताया अध्ययनं विना समग्रायाः त्रयीविद्यायाः ज्ञानं न भवितुं शक्नोति यतोहि तत्र होताऽध्वर्यूद्गातृभिः व्यवहार्यमत्रान्यत् ऋचः यजूंषि तथान्ये मन्त्राः सन्ति, अतः ''ऋचां त्वं पोषमास्ते''[37] इति मन्त्रं व्याख्यायन् यास्क उवाच ''ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति'' ''ब्रह्मा समेषां वेदानां ज्ञाता भवति सः सर्वं ज्ञातुं समर्थः।'' अथर्ववेदस्य ज्ञातैव ब्रह्मा भवति स एव यज्ञं सर्वथा रक्षितुमलं भवति।'' गोपथब्राह्मणेऽप्येतदेवोक्तम्– स एवं विद्वान् यज्ञरक्षां कर्तुं शक्नोति यो भृगुः, अङ्गिरोभिः ऋषिभिः साक्षात्कृन्मन्त्राणां ज्ञाता समधीतश्चाऽस्ति। ब्रह्मचर्यपालकोऽस्ति तस्य शरीरे न तु अङ्गाधिकं स्यात् न च न्यूनम्, यश्च प्रमादरहितः स्यात्। यथाऽगाधजले नौर्निमज्जति तथैव ब्रह्मणः प्रमादात् असान्निध्यात् अयोग्यत्वाच्च यज्ञः निमज्जति, अतो यजमानः भृग्वङ्गिरोविदथर्ववेदिनं ब्रह्माणं कुर्यात्। स एव यज्ञं पारयति।[38] सामवेदिनोऽपि ब्रह्माणं यज्ञवैद्यमानयन्ति भेषजकृतो ह वा एष यज्ञो यत्रैवंविधो ब्रह्मा भवति।[39]

सामवेदभाष्यभूमिकायां सायणाचार्यो वदति– त्रयाणामपराधन्तु ब्रह्मा परिहरेत् सदा। अन्येषामृत्विजत्रयाणां त्रुटिनिवारणं ब्रह्मैव करोति। एतच्च तदैव ब्रह्मणा सम्भवं यदि स निश्चिततया चतुर्वेदवित्स्यात् समग्रया त्रयीविद्यया परिचितश्च। गोपथब्राह्मणस्य पूर्वार्द्धे उच्चारितं यत्– ऋग्वेदज्ञं होतारं कृधि, यजुर्वेदज्ञमध्वर्यु सामवेदज्ञमुद्गातृणम् अथर्ववेदिनञ्च

ब्राह्मणम्।[40] प्रजापतिर्यज्ञं विस्तारयामास, स ऋग्वेदेन होतृकर्म सम्पादयामास, यजुर्वेदेनाध्वर्योः, सामवेदेनोद्गातुः, अथर्ववेदेन च ब्रह्मणः।[41]

ब्राह्मणग्रन्थेषूल्लिखितमस्ति यद् ऋग्वेदेन होता करोति, यजुर्वेदेनाध्वर्युः, सामवेदेनोद्गाता, अथर्वैर्वा ब्रह्मा अर्थात् ऋग्वेदेन होता, यजुर्वेदेनाध्वर्युः, सामवेदेनोद्गाताऽथर्ववेदेन च ब्रह्मा नियुञ्जीत। अथर्ववेदेन ब्रह्मणो नियुक्तये गोपथब्राह्मणे विहितं यद् अथर्वाङ्गिरोभिर्ब्रह्मत्वम्। अथर्वाङ्गिरोविद् ब्राह्मणम् अर्थात् अथर्वेण ब्रह्मा भवति, अथर्वविद् ब्रह्मा भवति। एतस्याऽयं अभिप्रायो यत् चतुर्वेदविद्, ऋग्वेदतोऽथर्ववेदपर्यन्तविद् ब्रह्मा भवति। तस्मादेव ब्रह्मा ''**चतुरानन**'' इति उच्यते। एतेनैतदागतं यत् ब्रह्मणो नियुक्तिरथर्ववेदेनैव भवति। अतोऽथर्ववेदस्य ''ब्रह्मवेद'' इत्यप्याख्या। अथर्ववेदे चोक्तम्– तमृचश्च सामानि च यजूंषि च ब्रह्मा च[42]। एतदेव गोपथब्राह्मणे एवमुट्टङ्कितमस्ति–चत्वारो वा इमे वेदा ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेदः।

अतः स्पष्टमिदं यत् होत्रा प्रयोज्याः समे मन्त्राः ऋचः। ऋक्संहिता च तासां संहननेन संकलिता। यत्र ऋचां विनियोगविधानमस्ति स ऋग्ब्राह्मणग्रन्थः। इमावेव ग्रन्थौ संप्रति ऋग्वेद इति भण्येते। ऋग्वेदमात्रपाठकाः पाठकाश्च, तत्र च कृतश्रमाः, एतस्यैव व्यवहर्त्तारः ऋग्वेदिनः कथ्यन्ते। यजुर्वेदमात्रपाठकाः पाठकाश्च, तस्य च व्यवहर्त्तारो यजुर्वेदिनः। याजुषसंहितायामृचोऽपि वर्त्तन्ते तस्माद्यजुर्वेदज्ञाः ऋग्भिः परिचिताः जायन्ते।

अतः ते ''द्विवेदी'' ''दुबे'' वा भण्यन्ते। सामवेदमात्रपठकाः, पाठकाः तस्य च प्रयोक्तारः सामवेदिनः कथ्यन्ते। सामसंहितायां हि ऋग्यजुषां समावेशः, ततः तज्ज्ञानात् ते ''त्रिपाठी'' ''त्रिवेदी'' इति वा उच्यन्ते। यज्ञे ब्रह्मणः कार्यं निष्पादयितुं समेषामृग्यजुः-साम्नामावश्यकता भवति। समग्रमन्त्राणां ज्ञानम् ऋग्यजुःसाम्नामध्ययनेनाथर्ववेदसंहिताध्ययनं विना न भवितुं शक्नोति। अतः यथा होत्रे ऋक्, अध्वर्यवे यजुः, उद्गात्रे च सामवेद आवश्यको भवति तथा ब्रह्मणः कार्यं निष्पादयितुमथर्ववेदस्यावश्यकता भवति। यथा च ऋग्वेदस्य द्वितीयाख्या होतृवेदः, यजुर्वेदस्याध्वर्युवेदः, सामवेदस्योद्गातृवेदः तथैवाथर्ववेदस्य ब्रह्मवेद इति द्वितीयाख्या। ब्रह्मणः कार्यं निष्पादयितुमथर्ववेदस्याध्ययनस्य विशिष्टं प्रयोजनमन्येषाम् ऋग्वेदादीनामध्ययनं विना न पूर्णं भवति, अतोऽथर्ववेदाध्येतृणा-मृग्वेदोऽवश्यमध्येतव्यः। अतोऽथर्ववेदिनो वेदचतुष्टयमधीयते। तस्मात् ते चतुर्वेदिनो लोकभाषायां ''चौबे'' इति कथ्यन्ते। निष्कर्षतः कथयितुं शक्यते यन्मूलत एक एव वेदो रचनाभेदात् त्रिधा भवति। होत्रादिः ऋत्विक् कार्यनिर्वाहाय च चतुर्धा। निरुक्तेऽपि एतदेव परिपोष्यते ''चत्वारि शृङ्गा'' अर्थात् चत्वारो वेदाः।[43] महाभाष्येऽपि भाष्य-

कृन्मुनिपतञ्जलिराह चतुर्णां वेदानां नामानि एकत्र[44] अथर्ववेदे वेदानामालंकारिकं वर्णनं निम्नधोपवर्णितम्– यस्मात् परमात्मनः ऋग्वेदोऽजायत, यजुर्वेदः परमात्मरूपवृक्षस्य वल्कलवन्निःसृतः, सामवेदो लोमवत् प्रादुर्भूतोऽथर्ववेदश्च मुखवत् वर्त्तते। तस्मात् विराजो मुखादेवाऽजायत, यजुर्वेदे लिखितमस्ति यत् ''मुखादग्निरजायत। अथर्वणा सहाङ्गिरसशब्दः प्रयुज्यते। अङ्गिरसोऽङ्गारा उच्यन्ते। एतेन स्पष्टं भवति यत् अथर्वाऽग्निरेवाऽस्ति। यथा यज्ञे ब्रह्मा विशेषो वर्त्तते तथा यज्ञे अग्निरपि प्रधानं वस्तु। अग्निप्रधानत्वात् यज्ञेऽथर्ववेदस्य विशिष्टं स्थानं वर्त्तते।[45]

वाल्मीकिरामायणे लिलेख वाल्मीकिर्यद् राजा दशरथोऽथर्ववेदानुसारं पुत्रेष्टिम् इयाज।

**इष्टितेऽहं करिष्यामि पुत्रायां पुत्रकारणात्।**
**अथर्वशिरसि प्रोक्तैः मन्त्रैः सिद्धां विधानतः॥** ( वा.रा.बा.का.5.6)

''ऋचः सामानि छन्दांसि पुराणं यजुषा सह'' इत्यथर्ववेदमन्त्रे ऋग्यजुःसामभिः सहाथर्वणं छन्दांसीत्याह। अतोऽस्य छन्दोवेदोऽपि अपरं नाम। एकेन मन्त्रेण चतुर्षु अथर्वणे छन्दःशब्दः प्रयुक्तो निम्नधा तस्याऽर्थः। पूज्यतमात्तस्मात् परमेश्वरात् ऋग्वेदसामवेदौ जज्ञाते तस्मादेवाथर्ववेदयजुर्वेदावपि।[46] अनेके भाष्यकृतः छन्दांसीत्यनेन छन्द एवार्थतो जगृहुः। समेषां वेदानां छन्दोयुतां सत्तां पुनश्छन्दसोच्चारणमन्यं कञ्चिदथर्वाणं सूचयति। व्याकरणनियमानुसारं कस्मिंश्चिद्धर्मे वस्तुनि च स्वतो भूते सत्यपि यदि पुनः विशेषितः क्रियते तर्हि तेन विशेषणेन विशेषो धर्मः सूचितो भवति। यथा सत्यपि उदरे ''उदरिणी'' इति कथनात् विशेषोदरत्वं ''गर्भावस्था'' द्योत्यते, ''**तदस्यास्त्यस्मिन्निति मतुप्**'' (पा. सू. 5.2.94) इति सूत्रभाष्ये भाष्यकृद् भगवान् पतञ्जलिः। एवमिहापि समेषु छन्दोयुत्सु सत्सु पुनश्छन्दोग्रहणात् विशिष्टछन्दवतोऽथर्ववेदस्य ग्रहणं भवति। यदि छन्दांसीति पदम् ऋचः साम्नः यजुषां च विशेषणं स्यात् तर्हि एतेन सह पृथग्रूपेण ''तस्माज्जज्ञिरे'' इति सर्वनामक्रियापदं च न प्रयुञ्जीत। वस्तुतो यथाऽत्वर्चः सामानि यजुर्भिः सह पृथगूपेण तस्मादिति सर्वनाम्नो जज्ञिरे ''अजायत'' इति क्रियापदयोः प्रयोगो दृश्यते तथैव छन्दांसीत्यनेन सहाऽपि तस्मादिति सर्वनाम जज्ञिरे इति क्रियापदञ्च प्रयुज्यते। अतः ऋग्यजुःसामवत् छन्दांसीत्यस्याऽपि पृथक्सत्ताऽस्ति। तर्हि परिशेषन्यायेन छन्दांसीति पदं अथर्ववेदस्यैव वाचकमिति सिद्ध्यति। ऋग्वेदस्य पुरुषसूक्तं किञ्चिच्छब्दभेदेनाथर्ववेदेऽपि विद्यते। यदि छन्दांसीत्यस्यार्थोऽथर्ववेदो न स्यात् तर्हि वेदोत्पत्तिसंदर्भे चतुर्थमथर्ववेदम् अथर्ववेद एव कथमुच्येतार्थात् कथमथर्वण्येवाथर्वणो नामग्रहणं न क्रियते? अतः सन्दर्भान्तर्गतछन्दां-सीतिपदेनाथर्ववेदस्यैव ग्रहणं युक्तियुक्तमिति।

गोपथब्राह्मणे (1.29) तदथर्ववेदविषये उक्तं यत् ''अथर्वणि सर्वाणि छन्दांसि सन्ति।[47] विविधछन्दसो बाहुल्येनैवाथर्ववेदश्छन्दोनाम्नाभिहितमिति सम्भाव्यते। गोपथब्राह्मणे ''चत्वारो वा इमे वेदा ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेद'' इति उक्त्वाऽथर्ववेदो ब्रह्मवेदनाम्नोक्तोऽस्ति।

अथर्ववेदस्य छन्दांसीति नामकरणस्यैकमन्यदपि कारणं सम्भाव्यते। आह निरुक्ते यास्कः ''छादनाच्छन्दः'' अर्थात् यश्छादयति तच्छन्दः कथ्यते। शरीर-राष्ट्रादिरक्षायाः साधनोपायविधानमथर्ववेदस्य प्रधानतमो विषयोऽतश्छन्दःपदवाच्योऽथर्ववेदः। वेदेतरसंस्कृत-साहित्येऽपि अथर्ववेदाय छन्दांसि इति पदं व्यवहृतमस्ति। हरिवंशपुराणस्य निम्नस्थलेऽथर्ववेद-पर्यायभाग्विशेषणभूतच्छन्दसः प्रयोगात् तु स्थितिः सर्वथा स्पष्टा जायते।

**ऋचो यजूंषि सामानि छन्दांस्याथर्वणानि च।**
**चत्वारस्त्वखिला वेदाः सरहस्याः सविस्तराः॥**[48]

ऋग्वेदे ''छन्दस्यावाचम्'' इत्यस्याऽर्थः अथर्ववेदीया वाणीति।[49] ऋग्वेदे स्थिते-नानेन प्रमाणेनाऽपि छन्दोसिपदस्याऽर्थोऽथर्ववेद इति सिद्ध्यति। ''अथर्ववेदस्य दन्त्योष्ठविधिः'' नाम्नि पुस्तके छन्दःशब्दोऽथर्ववेदस्यैव वाचकः।[50] पण्डितगिरिधरशर्मणा चतुर्वेदश्छन्दःपदेनाथर्ववेदस्य ग्रहणं कृतम्। गोपथब्राह्मणस्य छन्दःपदेनाथर्ववेदस्यैवार्थः सिद्ध्यति। तच्चाधिकृत्य गृहीतः।[51] बृहदारण्यकोपनिषद्यपि छन्दःपदमथर्ववेदस्य वाचकम्।[52]

प्राचीनकालतोऽद्यावधि महत्त्वभाग् वेदशब्दः। यथा शास्त्रशब्दः कदाचित् नाना-विषयेभ्यः प्रयुक्तोऽस्ति तथा च धर्मशास्त्रम्, ज्योतिषशास्त्रम् इत्याद्याख्या विद्याः अकथयन्त। यथा कस्मिंश्चित्काले सूत्रग्रन्थाः क्रियाग्रन्थाः व्याकरणदर्शन इत्यादि समस्ताः ग्रन्थाः सूत्रेष्वेवालिख्यन्तापठ्यन्त च। यथा स्मृतिकालेऽनेके ग्रन्थाः स्मृतीनामाभिधाः, ब्राह्मणकाले ब्राह्मणाभिधाः, पुराणकाले च पुराणानां महत्त्वभाक्त्वात् अनेके ग्रन्थाः पुराणाभिधा अलिख्यन्तापठ्यन्त च। तथैव वैदिककाले वेदानां महत्त्वात् अनेकाः विद्याः, अनेकानि पुस्तकानि वेदनामाभिधानि सञ्जातानि। किन्तु तेषु कोऽपि ऋग्वेदादिसाहचर्यं न लेभे। अथर्ववेदस्तु ऋग्वेदादिसाहचर्यं भजते। एतेनायं सिद्ध्यति यदथर्ववेद ऋग्वेदादिसम एव। यथा सर्पवेदः पिशाचवेदः असुरवेदः इतिहासवेदः पुराणवेदा उक्ताः।[53] भरतनाट्य-शास्त्रेऽप्युक्तं यत् भगवान् चतुरान् वेदान् संकलय्य नाट्यवेदं रचयामास। ऋग्वेदात् पाठं जग्राह, सामवेदात् गीतम्, यजुर्वेदाद् अभिनयं, अथर्ववेदाच्च रसान् जग्राह।[54] महाभारतमपि पञ्चमो वेद उच्यते। अतो वेदशब्दमात्रेण वयं स्वाभीष्टान् वेदान् न प्राप्तुं शक्नुमः। एवमेतेनोपर्युक्तेन विवेचनेनैष राद्धान्त आयाति यदथर्ववेदोऽपि त्रयीविद्यान्तर्गत एव। नाम चास्याथर्ववेदस्य समस्तप्राचीनसाहित्ये ऋग्यजुःसामसु च तथैवाऽऽयाति

यथाऽन्येषाम्। ऋग्यजुःसाम्नां यथा वेदत्वमस्ति तथैवाऽथर्ववेदस्याऽपि वेदत्वं विद्यते। स एषः त्रयीशब्दः चतुर्णां वेदानां वाचक इति निर्विकल्पको राद्धान्तः इति।।

*

## सन्दर्भाः


1. त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत।
   यजुर्वेदो वायोः सामवेद आदित्यात्।। ऐतरेय-ब्राह्मणम् 25–7
2. त्रयो वेदा अजायन्त अग्नेर्ऋग्वेदः।
   वायोर्यजुर्वेदः सूर्यात् सामवेदः।। शतपथब्रा. 11.5.8
3. त्रयी वै विद्या ऋचो यजूंषि सामानि। शतपथब्रा. 4.6.7.1
4. अग्नेर्ऋचो वायोर्यजूंषि सामान्यादित्यात्।
   स एतां त्रयीविद्यामभ्यतपत्।। छान्दोग्योपनिषद् 4.17.2–3
5. अहेर्बुध्नीयमन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः।
   ऋचः सामानि यजूंषि। तैत्तिरीयब्राह्मणम् – 1.2.26
6. तेभ्यश्श्रान्तेभ्यस्तप्तेभ्यः सन्तप्तेभ्यः त्रीन् वेदान्निरमिमत्। इति गो.ब्रा. (पृ. 1.6)
7. स यावतीयं त्रयीविद्या तावत् ह स जयति। बृहदारण्यक, उपनिषद्– 4.12.2
8. यदेनमृग्भिः शंसन्ति, यजुर्भिर्यजन्ति, सामभिः स्तुवन्ति। निरुक्तम् परि. अ. 13.71
9. अग्निहोत्रं त्रयीविद्या। न सामऋग्यजुर्वर्णाः। महाभारतम्– 1.100.66, 3.150.13
10. अग्विवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
    दुदोह यज्ञसिद्ध्यर्थम् ऋग्यजुस्सामलक्षणम्।। मनुस्मृतिः 1.23
11. ओऽम् तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
    छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत। यजुर्वेदः – 31.7
12. ओ3म् यस्मिन्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः।
    यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु।। यजु. 34.5

13. तेषामृग्यत्रार्थवशेन पादव्यवस्था। गीतिषु सामाख्या। शेषे यजुः शब्दः। निगदो वा चतुर्थः स्यात् धर्मविशेषात्।। पूर्वमीमांसायां जैमिनिमुनिः।
14. ऋग्यजुस्सामरूपेण मन्त्रा वेदचतुष्टये।
अहेबुध्नीयमन्त्रं मे गोपायेत्यभिधीयते।। (सर्वानुक्रमणी, वृत्तिभूमिका)
15. ऋक्पादबद्धो गीतस्तु साम गद्यं यजुर्मन्त्रः।
चतुर्ष्वपि हि वेदेषु त्रिधैव विनियुज्यते।। (सर्वानुक्रमणी, वृत्तिभूमिका)
16. वेदैरशून्य इत्यादौ मन्त्रे त्रैविध्यमुच्यते।
सर्वैर्ब्रह्मेति सूत्रेऽपि चतुर्भिरिति निर्णयः।। (सर्वानुक्रमणी, वृत्तिभूमिका)
17. प्रस्तुतर्कादि वाचित्वो वा मन्त्रे सूत्रकारणे।
ऋग्रूपमन्त्रबाहुल्यादृग्वेदः स्यात् तथेतरौ।। (सर्वानुक्रमणी, वृत्तिभूमिका)
18. शान्तिपुष्ट्यादिकब्रह्मवर्गप्रणवविद्यया।
ऋचाञ्च यजुषां तुर्यो बाहुल्येन विधायकः।। (सर्वानुक्रमणी, वृत्तिभूमिका)
19. पादबन्धेनाऽर्थेन चोपेता वृत्तबद्धा मन्त्रा ऋचः। (सर्वानुक्रमणी, वृत्तिभूमिका)
20. वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषि।। (सर्वानुक्रमणी, वृत्तिभूमिका)
21. गीतिरूपा मन्त्राः सामानि। अधिकरणमाला 2.1.50
22. त्रयीविद्यामवेक्षेत वेदेषूक्तमथाङ्गतः।
ऋग्सामवर्णाक्षरता यजुषोऽथर्वणस्तथा।। महाभारतम्, शान्तिपर्व – 165
23. ऋक्प्रातिशाख्यम् (2.1)
24. यजु. वाज. प्रातिशाख्यम् (158)
25. अष्टाध्यायी (1.4.109).
26. छान्दोग्योपनिषद् – (7.7)
27. अरेऽस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः।
बृहदारण्यकोपनिषद् 4.4.10
28. महाभारतम्, प्रथमपर्व – 268–269
29. महाभारतम्, आदिपर्व – 368
30. मुण्डकोपनिषद् –1.1.5
31. ऋग्भिः शंसन्ति, यजुभिर्यजन्ति, सामभिः स्तुवन्ति, अथर्वभिर्जपन्ति। काठकसंहिता 40.7

32. ऋग्वेदसंहिता–1.6.4
33. ऋग्वेदसंहिता–7.7.4
34. ऋग्वेदसंहिता – 4.5.23
35. अथर्वसंहिता – 7.1.2
36. ऐतरेय-ब्राह्मण – 5.5.8
37. ऋग्वेदसंहिता – 8.2.4
38. ब्रह्मैव विद्वान् यद् भृग्वङ्गिरोवित् सम्यगधीयानश्चरितब्रह्मचर्यो न्यूनातिरिक्ताङ्गोऽप्रमत्तो यज्ञं रक्षति, तस्य प्रमादात् यदि वाऽप्यसान्निध्यात् यथा भिन्ना नौरगाधे महत्युदके सम्प्लवेत् तस्मात् यजमानो भृग्वङ्गिरमेव तत्र ब्रह्माणं वृणीयात् स हि यज्ञं तारयतीति ब्राह्मणम्।। गोपथ-ब्राह्मणम्
39. छान्दोग्य-ब्राह्मणम् – 5.17.8
40. गोपथ-ब्राह्मणम् – 1.3.1.2
41. तथा प्रजापतिर्यज्ञमतनुत, स ऋचैव हौत्रमकरोत्, यजुषाध्वर्यवम्। साम्नौद्गात्रम्, अथर्वाङ्गिरोभिर्ब्रह्मत्वम्। गोपथ-ब्राह्मणम् 1.3.1.2
42. अथर्ववेद – 14.7.86
43. चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
    त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यान् आ विवेश।। निरुक्तम्– 14.7
44. सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः, सरहस्या बहुधा विभिन्नाः। एकशतमध्वर्युशाखा, सहस्रवर्मा सामवेदः एकविंशतिधा बावृच्यं, नवधाथर्वणो वेदः।। महाभाष्यम्, पस्पशाह्निकम्
45. यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्। सामानि यस्य लोमानि अथर्वाङ्गिरसो मुखम् स्कम्भं ब्रूहिकतमः स्विदेव सः।। अथर्ववेद– 10.7.20
46. तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
    छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत।। यजुर्वेद – 31.7
47. अथर्वणां सर्वाणि छन्दांसि। गोपथब्राह्मणम् – 1.29
48. हरिवंशपुराणम् – 2.100.7
49. यत्र ब्रह्मा पवमान छन्दस्यां वाचं वदन्। ऋग्वेदः – 9.113.6
50. छन्दस्यध्ययने प्राप्ते विदुषामथ धीमताम्।
    वकार–संशयो नित्यं स्पष्टं दन्त्यमिति स्म ह।। अथर्ववेदः दन्त्योष्ठविधिः

51. अथर्वणां चन्द्रमा दैवतं, तदेव ज्योतिः सर्वाणि छन्दांसि आपस्थानम्। पण्डितगिरिधरशर्मणा चतुर्वेदः

52. यद्येवं किं चर्चे यजूंषि सामानि छन्दांसि। बृहदारण्यकोपनिषद्

53. ताभ्यः पञ्चवेदान्निरमिमत। सर्पवेदम्, पिशाचवेदम्, सुरवेदम्, इतिहासवेदम्, पुराणवेदमिति। गोपथ ब्राह्मणम् – 1.10

54. एवं संकल्प्य भगवान् सर्ववेदाननुस्मरन्। नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम्।।
जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि।।
नाट्यशास्त्रम्, 1.16-17

*

# प्रौढमनोरमाशब्देन्दुशेखरयोरुक्तदिशाऽर्थवत्त्व-स्वरूपविचारः

**डॉ. तुलसी कुमार जोशी**

**कुञ्चीशब्दाः**– अर्थवत्त्वम्, प्रातिपदिकम्, विभक्तिः, समभिव्याहारः, पदम्, अर्थः।

भगवता पाणिनिना शब्दसाधुत्वविज्ञानार्थमष्टाध्याय्यामनेकविधानि विधिशास्त्राणाम-प्रामाण्यज्ञानानास्कन्दित-लक्ष्यसंस्कारकमहावाक्यार्थबोधजनकानि सूत्राणि विरचितानि। तेष्वन्यतमे प्रातिपदिकसंज्ञाविधायके सूत्रे प्रथमाध्यायस्य द्वितीये पादे निबद्धे। तयोरादिमं सूत्रम् **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**[1] इति सूत्रं सिद्धान्तकौमुद्यां श्रीमद्भिः भट्टोजिदीक्षितैः स्वादिसन्धिप्रकरणानन्तरं प्रसङ्गसङ्गत्याऽऽरब्धेऽजन्तपुंल्लिङ्गप्रकरण आरम्भ एवोपन्यस्तम्। पदचतुष्टयात्मकेऽत्र सूत्रे प्रत्येकं पदानामर्थं मनसि निधाय सिद्धान्तकौमुदीकारैः वृत्तौ धातुं प्रत्ययं प्रत्ययान्तञ्च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यादित्युक्तम्। तत्र कथं सूत्राक्षरतोऽयमर्थो लभ्यत इत्याकाङ्क्षायामुच्यते क्रमेण सूत्रघटकपदानामर्थः उभयोर्ग्रन्थयोर्विहितास्तत्सम्बद्धाः विचाराश्च सङ्क्षेपेणेह प्रस्तूयन्ते।

**अर्थवत्पदार्थः—** तत्रादौ अर्थशब्दस्य **अर्थोऽभिधेये रैवस्तुप्रयोजननिवृत्तिषु**[2] कोशान्नानार्थकत्वेन प्रकृतसूत्रघटकार्थशब्दस्य कोऽर्थो ग्राह्य इत्याकाङ्क्षायामुच्यते अर्थवत्पदस्य निरर्थकपदसमुदायव्यावृत्तिपरकभाष्यप्रामाण्यात् **'निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्ये'ति**[3] भाष्यवार्तिकप्रामाण्याच्च अभिधेयरूपार्थपरत्वमेव स्वीक्रियते। तथा च अभिधेयरूपोऽर्थोऽस्यास्तीति व्युत्पत्त्या नित्ययोगार्थकमतुबन्ततदाद्यर्थवच्छब्दस्य अर्थवत्त्वविशिष्टं शब्दस्वरूपमेवार्थः। एवञ्च नपुंसकलिङ्गकार्थवच्छब्दानुरोधेन नपुंसकलिङ्गकशब्दस्वरूपमिति पदमध्याहृत्य कौमुदीवृत्तौ अर्थवत्पदस्यैव अर्थवच्छब्दस्वरूपमिति व्याख्या आचार्यैः कृता। यद्यपि प्राचीनानां मते अधातुरिति अप्रत्यय इति पर्युदासादर्थवत्त्वं लभ्यते अतो-ऽर्थवत्पदग्रहणस्यात्र सूत्रे न किमपि प्रयोजनं तथाप्युत्तरार्थमावश्यकमर्थवत्पदमत्र सूत्रे वृत्तिमत्त्वरूपार्थबोधकमेव भवितुमर्हतीत्यभिप्रायेण प्राचीनमतानुसारेणार्थवत्पदार्थनिरूपणमत्र

कृतं न तु तात्पर्येणैतादृशार्थबोधकत्वमत्रत्यार्थवत्पदस्य वर्तत इत्यभिप्रायेण। उत्तरसूत्रे च एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वरूपमर्थवत्त्वं भट्टोजिदीक्षितप्रभृतिभिराचार्यैर्गृह्यते तदुक्तं मनोरमायां '**प्रशंसायां हि मतुप्। एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वं च प्रशंसामूलम्।**'[4] अस्य मनोरमाग्रन्थस्यायं भावः– उत्तरसूत्रे अर्थवदिति पदस्यानुवर्तनात् पूर्वसूत्रवदर्थवत्पदस्य यदि वृत्तिमत्त्वरूपार्थबोधकत्वमेव स्वीक्रियेत तथा सति वृत्तिमत्त्वरूपार्थवत्त्वस्य कृत्तद्धितप्रत्ययेष्वव्यभिचरिततया ''सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवदिति'' न्यायेन व्यभिचाराभावादर्थवत्पदानुवृत्तिर्व्यर्था सती एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वरूमर्थवत्त्वबोधने अर्थवत्पदस्य तात्पर्यं ग्राहयति। तादृशञ्चार्थवत्त्वं केवलेषु कृत्तद्धितेषु न सम्भवतीति कृत्वा तयोस्तदन्तपरत्वमपि तदनुवृत्तिसामर्थ्यादिव स्वीक्रियते। अत्र च सुप्तिङन्तं पदमिति सूत्रस्थं भाष्यमेव प्रमाणम्। तथाहि – तत्र भाष्ये भगवता भाष्यकृता उक्तम्–'**अर्थवदिति वर्तते न केवलाः कृतस्तद्धिता वा अर्थवन्तः।**'[5] तथा चैतद्भाष्यप्रामाण्यादेव प्राचीनैरेतादृशार्थवत्त्वमुत्तरसूत्रे गृह्यते।

**शेखरकारोक्तार्थवत्त्वस्वरूपम्–**

शेखरकारास्तु पूर्वसूत्रे उत्तरसूत्रे च एकविधमेवार्थवत्त्वं स्वीकुर्वन्ति। उक्तञ्च लघुशब्देन्दुशेखरे–'**अत्र सूत्रे उत्तरसूत्रे चार्थवत्त्वम् एतत्संज्ञाफलभूत-विभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमर्थवत्त्वम्।**'[6] अस्य समन्वयादिप्रकारस्त्वग्रे वक्ष्यते। तत्र प्राचीनोक्तार्थवत्त्वस्वीकारेऽर्थवत्पदग्रहणवैयर्थ्यं भाष्यविरोधश्च स्यातामिति शेखरकाराणामभिप्रायः। तथाहि – अर्थवद्ग्रहणवैयर्थ्यं प्रतिपादयता शेखरकृता शेखर एवोक्तं यत्– '**अन्यथा अधातुरिति पर्युदासेन व्याख्यानादर्थवत्त्वेनैव सादृश्यग्रहणेन सिद्धेरुत्तरसूत्रे कृदादीनामनर्थकानामप्रसिद्धेस्तद्वैयर्थ्यं स्यात्**'[7] इति। अनेन ग्रन्थेन प्राचीनोक्तार्थवत्त्वस्वीकारे अर्थवद्ग्रहणवैयर्थ्यं प्रतिपादितम्। नन्वत्र प्राचीनमतेऽपि अर्थवत्पदस्य द्वितीयार्थवत्त्वपरत्वे नार्थवद्ग्रहणवैयर्थ्यमुपपादयितुं शक्यते, तदर्थमर्थवद्ग्रहणस्यावश्यकत्वात्। अत एव च ''अर्थवदिति वर्तते कृत्तद्धितान्तञ्चैवार्थवन्न केवलाः कृतस्तद्धिता वा'' इति पदसंज्ञासूत्रस्थं भाष्यमपि पूर्वोक्तद्वितीयार्थवत्त्वस्वीकारे स्वरसतः सङ्गच्छते, एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वरूपार्थवत्त्वस्य कृत्तद्धितान्तेष्वेव सत्त्वात्। पूर्वसूत्रेऽर्थवद्ग्रदहणस्य तु न किमपि प्रयोजनम्, अधातुरिति पर्युदासेनैव तादृशार्थवत्त्वस्य लाभादिति चेत्तथापि द्विविधार्थवत्त्वस्वीकारे गौरवं प्राचीनमते स्यादेव। किञ्च भाष्यविरोधोऽपि द्वितीयार्थवत्त्वस्वीकारे वर्तते। अङ्गसंज्ञासूत्रे प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषायाः प्रयोजनप्रतिपादनावसरे भगवता भाष्यकृता देवदत्तो गार्ग्येत्यस्य

प्रातिपदिकसंज्ञावारणरूपं प्रयोजनमुक्तम्। तच्च प्रचीनोक्तद्वितीयार्थवत्त्वस्वीकारे न सङ्गच्छते। तथाहि कृत्तद्धितसमासाश्चेति सूत्रे यदि प्रत्ययग्रहणपरिभाषायाः प्रवृत्तिर्न स्यात्तथा सति तद्धितान्तस्यैव तद्धितग्रहणेन प्रातिपदिकसंज्ञा स्यात्। एवञ्च सति 'देवदत्तो गार्ग्यः' इति समुदायघटकस्य देवदत्तो गार्ग्येत्यंशस्यापि यञ्रूपतद्धितप्रत्ययनिष्ठचरमावयवतानिरूपक-समुदायत्वेन तद्धितान्तत्वात् तस्यापि समुदायस्य तद्धितग्रहणेन ग्रहणात् तस्यापि प्रातिपदिकत्वापत्तिः स्यात् सत्यां च प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोरित्यनेन सुपो लुगापत्तिः स्यात्। अतः तस्य समुदायस्य प्रातिपदिकत्वापत्तिवारणार्थं कृत्तद्धितसमासाश्चेति सूत्रे प्रत्ययग्रहणपरिभाषायाः प्रवृत्तिः कार्या। परिभाषाप्रवृत्तौ च तदादिविशेष्यकतद्धित-विशेषणकतदन्तविधौ सति तद्धितान्ततदादेरेव तद्धितग्रहणेन संज्ञाविधानात् ''देवदत्तो गार्ग्यः'' इति समुदायघटकस्य देवदत्तो गार्ग्येत्यंशस्य तद्धितान्तत्वेऽपि तद्धितान्ततदादित्वाभावेन प्रातिपदिकसंज्ञाया वारणं भवति। इदञ्च यत्प्रयोजनं प्रत्ययग्रहणपरिभाषाया भाष्यकृतोक्तं तत्प्राचीनोक्तद्वितीयार्थवत्त्वस्वीकारे न सङ्गच्छते। यतोहि उत्तरसूत्रे यदि एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वरूपमर्थवत्त्वं गृह्येत तथा सति ''देवदत्तो गार्ग्यः'' इति समुदायघटके देवदत्तो गार्ग्येत्यंशे एकार्थीभावाभावात् तादृशार्थवत्त्वस्याभावेन प्रातिपदिकसंज्ञायाः प्राप्तेरेवाभावात्तद्वारणार्थं प्रत्ययग्रहणपरिभाषाप्रवृत्तेरनावश्यकतया तत्परिभाषाप्रयोजनप्रतिपादनपरं भाष्यमसङ्गतं स्यात्। अतस्तद्भाष्यसङ्गमनाय प्राचीनोक्तमर्थवत्त्वं नैव स्वीकर्तुं शक्यते। किञ्च नव्यानां मते अर्थवत्पदस्य वैयर्थ्यमपि नास्ति। यद्यपि अधातुरिति पर्युदासेनार्थवत्त्वस्य लाभो भवति तथापि यादृशमर्थवत्त्वमर्थवद्ग्रहणेन लभ्यते तादृशमर्थवत्त्वं पर्युदासेन न लभ्यत इति तादृशार्थवत्त्वस्य लाभार्थम् अर्थवद्ग्रहणं सार्थकं भवति।

**नव्योक्तार्थवत्त्वस्वरूपपरीक्षा–**

अत्रेयं जिज्ञासा जायते यत् नव्यानां मते ''देवदत्तो गार्ग्यः'' इति समुदायघटके ''देवदत्तो गार्ग्ये''त्यंशे नव्योक्तपारिभाषिकार्थवत्त्वमस्ति न वा। यदि तादृशसमुदाये-ऽर्थवत्त्वमस्तीत्युच्यते तथा सति पूर्वोक्तप्रत्ययग्रहणपरिभाषाप्रयोजनप्रदर्शनपरकभाष्यस्य सङ्गतत्वेऽपि तादृशसमुदाये धातुभिन्नत्वप्रत्ययभिन्नत्वप्रत्ययान्ततदादिभिन्नत्वानामर्थवत्त्वस्य च सत्त्वेन पूर्वसूत्रेण तादृशसमुदायस्य प्रातिपदिकत्वं दुर्वारं स्यात्। न च देवदत्तो गार्ग्येति समुदायस्य पूर्वभागपदघटितत्वेन यत्र सङ्घाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैवेति समासग्रहणकृतनियमेन तादृशसमुदायस्य प्रातिपदिकसंज्ञावारणं भविष्यतीति वाच्यम्। देवदत्तो गार्ग्येत्यंशस्य प्रातिपदिकत्ववारणरूपप्रत्ययग्रहणपरिभाषाप्रयोजनप्रदर्शनपरकभाष्यप्रामाण्यादेव तादृशनियमाकारे स्वातन्त्र्येण प्रयोगार्हार्थवदुत्तरावयवकत्वस्यापि निवेशस्यावश्यकत्वेन देवदत्तो

गार्ग्येति समुदायस्य तथात्वाभावात् न समासग्रहणकृतनियमेनापि प्रातिपदिकत्ववारणं सम्भवति। यदि च समासकृतनियमाकारे स्वातन्त्र्येण प्रयोगार्हार्थवदुत्तरावयवकत्वस्य निवेशो न स्यात् तथा सति देवदत्तो गार्ग्येति समुदायस्य समासग्रहणकृतनियमेनैव वारणसम्भवे परिभाषया तद्वारणं भाष्यकृतामनर्थकं स्यात्। तस्मात्समासग्रहणकृतनियमेन वारणासम्भवात् पूर्वसूत्रेण देवदत्तो गार्ग्येति समुदायस्य प्रातिपदिकत्वापत्तिर्दुर्वारा स्यात्। यदि च तादृशसमुदाये पारिभाषिकार्थवत्त्वं नास्तीत्युच्येत तथा सति प्रत्ययग्रहणपरिभाषाप्रयोजनप्रदर्शनपरकभाष्यविरोधो नव्यानामपि मते तदवस्थ एव। तथाहि कृत्तद्धितसूत्रेऽपि अर्थवत्पदस्यानुवर्तनात् देवदत्तो गार्ग्येत्यत्र तद्धितान्तत्वस्य सत्त्वेऽपि अर्थवत्त्वस्याभावात् प्रातिपदिकत्वाप्राप्तौ तद्वारणार्थं परिभाषाप्रवृत्तिस्वीकारोऽसङ्गतस्स्यात्। किञ्च परिभाषायाः प्रयोजनासिद्ध्या पूर्वसूत्रेऽपि परिभाषाया अप्रवृत्त्या प्रत्ययान्तपर्युदासस्यैव वक्तव्यतया प्रत्ययान्तत्वस्य च समासार्थालौकिकविग्रहवाक्येऽपि सत्त्वेन पूर्वसूत्रेण प्रातिपदिकत्वाप्राप्त्या उत्तरसूत्रे समासस्य प्रातिपदिकसंज्ञाविधानार्थं समासग्रहणं विद्ध्यर्थमेव स्यात्। तथा च समासग्रहणस्य नियमार्थत्वस्वीकारपरकभाष्यासङ्गतिस्स्यादिति चेदत्र नव्याः– तादृशसमुदाये उक्तार्थवत्त्वमस्त्येव। न च परिभाषाप्रयोजनप्रदर्शनपरक-भाष्यासङ्गतिः, अर्थवदित्यस्योत्तरसूत्रेऽनुवर्तनात् तस्य च अभेदेन तद्धितपदार्थेऽन्वयासम्भवात् तद्धितपदे तदन्तविधौ तत्र च अर्थवदित्यस्याभेदेन विशेषणत्वात् तत्रापि तदन्तविधौ बाधकाभावेन अर्थवदन्तं यत्तद्धितान्तं तत्प्रातिपदिकं स्यादित्यर्थस्य निष्पन्नतया गार्ग्येत्यत्र पारिभाषिकार्थवत्त्वस्य सत्त्वेन तदन्तत्वस्य तद्धितान्तत्वस्य च देवदत्तो गार्ग्येत्यत्र सत्त्वेन तस्य तद्धितग्रहणेन प्रातिपदिकत्वप्राप्त्या तद्वारणाय परिभाषाप्रवृत्तेरावश्यकत्वेन न भाष्यविरोधः। नापि समासग्रहणस्य विध्यर्थत्वापत्तिः, न हि देवदत्तो गार्ग्येत्यंशस्यैव प्रातिपदिकत्ववारणं परिभाषायाः प्रयोजनं येन यावत्तत्प्रयोजनं न सिद्ध्येत्तावत् परिभाषा न निष्पन्नेति। किञ्च परिभाषायाः पूर्वसूत्रेऽपि प्रवृत्तिस्वीकारादेव अर्थवदित्यस्य दश दाडिमानि षड् अपूपाः इति निरर्थकपदसमुदायस्य प्रातिपदिकत्ववारणपरकभाष्यं सङ्गच्छते। अन्यथा पूर्वसूत्रे तदादिविशेष्यकतदन्तविध्यभावे तादृशनिरर्थकसमुदायेऽपि प्रत्ययान्तत्वस्य सत्त्वेन प्रत्ययान्तपर्युदासेन तद्वारणसम्भवेन अर्थवद्ग्रहणस्य प्रयोजनोपादानं भाष्यकृतोऽसङ्गतं स्यात्। तस्मात्पूर्वसूत्रेऽपि प्रत्ययग्रहणपरिभाषाप्रवृत्त्या समासार्थालौकिकविग्रहवाक्यस्य प्रत्ययान्ततदादिभिन्नत्वेन पूर्वसूत्रेणैव प्रातिपदिकत्वे सिद्धे उत्तरसूत्रे समासग्रहणं नियमार्थं भवति। किञ्च तद्धितांशे परिभाषाप्रयोजनप्रतिपादनं तु भाष्यकाराणामुदाहरणप्रदर्शनमात्रमेव न तेनैव परिभाषासत्ता सिद्ध्यतीत्यभिप्रायेण। अन्यथा कृदंशेऽपि परिभाषाऽप्रवृत्त्या तुल्यरीत्या देवदत्तः पूजकेत्यंशस्यापि प्रातिपदिकत्वापत्तिर्दुर्वारा स्यात्।

**शेखरकारोक्तार्थवत्त्वलक्षणपरिष्कारः**

शेखरकाराणां मते सूत्रद्वयेऽपि एकविधमेवार्थवत्त्वं तच्च ''एतत्संज्ञाफलभूत-विभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वरूपम्।'' तथाहि – रामेत्यस्य या प्रातिपदिकसंज्ञा तत्फलभूता च या विभक्तिः स्वादिरूपा तदितरघटपटादिसमभि-व्याहारानपेक्षयैव लोकेऽर्थविषयकबोधजनकत्वादर्थवत्त्वेन प्रातिपदिकसंज्ञा सिद्ध्यति। हरिषु इत्यादौ च सु इत्यस्य या प्रातिपदिकसंज्ञा तत्फलभूतस्वादिविभक्तीतरप्रकृतिसमभिव्याहारेणैव 'सु' इत्यस्य लोकेऽर्थविषयकबोधजनकत्वेन उक्तार्थवत्त्वाभावात् न प्रातिपदिकत्वा-पत्तिरित्यतोऽप्रत्ययपर्युदासो नाश्रयणीय इत्यपरं लाघवमेतादृशार्थवत्त्वस्वीकारे भवति। ननु विभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमर्थवत्त्वमित्येव स्वीकारे रामेत्यादीनां प्रातिपदिकत्वे सिद्धे किमर्थमेतत्संज्ञाफलभूतत्वविशेषणं दत्तमिति चेदत्रोच्यते तादृशविशेषणानु-पादाने राज्ञः पुरुषः इति समुदायघटकस्य राज्ञः पुरुषेत्यस्य प्रातिपदिकत्वापत्तिस्स्यात् तादृशसमुदायस्य पुरुषप्रकृतिकसुविभक्तीतरसमभिव्याहारानपेक्षयैव तादृशविशेषणोपादाने तु राज्ञः पुरुषेत्यस्य या प्रातिपदिकसंज्ञा तत्फलभूता च या विभक्तिः समुदायादुत्पद्यमान-स्वादिविभक्तिः तदितरः पुरुषप्रकृतिकसुप्रत्ययः तत्समभिव्याहारापेक्षयैव राज्ञः पुरुषेतिसमुदायस्य लोकेऽर्थविषयकबोधजनकत्वेनोक्तार्थवत्त्वाभावात् न प्रातिपदिकत्वापत्तिः। नन्वत्र **विभक्ति-समभिव्याहारापेक्षया लोकेऽर्थविषयकबोधजनकत्वमर्थवत्त्वमित्युच्यमानेऽपि** रामादीनां प्रातिपदिकत्वे सिद्धे किमर्थं नञ्द्वयोपादानमिति चेदत्रोच्यते– तावन्मात्रस्यार्थवत्त्वे **दधि मधु** इत्यादिशब्दानां प्रातिपदिकत्वानापत्तिः स्यात्। दध्यादीनां शब्दानां लोकेऽर्थविषयकबोधजननाय विभक्तिसमभिव्याहारापेक्षाया अभावेनोक्तार्थवत्त्वस्याभावात् प्रातिपदिकत्वानापत्तिः स्यात्। विभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वेन लोकेऽर्थविषयकबोधजनकत्वमित्युच्यमाने तु दधिमध्वादीनामपि विभक्त्यनपेक्षत्वेऽपि विभक्तीतरसमभिव्याहारानपेक्षत्वस्यापि सत्त्वेन प्रातिपदिकत्वं सिद्ध्यति। नन्वेवमपि सर्वं वाक्यं क्रियया परिसमाप्यते इति सिद्धान्तात् अस्तीत्यादिक्रियापदसमभिव्याहारस्यापेक्षत्वेन रमादीनां विभक्तीतरास्त्यादिक्रियापदसमभिव्याहारापेक्षयैव लोकेऽर्थविषयकबोधजनकत्वेन अर्थवत्त्वाभावात्प्रातिपदिकत्वं न स्यादिति चेदत्रोच्यते अर्थवत्त्वस्वरूपे समभिव्याहार-पदोपादानेनैतद्दोषवारणात्। तथाहि – अर्थवत्त्वस्वरूपघटकसमभिव्याहारो नाम नियतपौर्वापर्यम्। अस्त्यादिपदानां समभिव्याहारापेक्षाया नियतत्वेऽपि घटोऽस्ति अस्ति घटः इत्युभयथापि प्रयोगदर्शनेन अस्त्यादिपदानां नियतपौर्वापर्यरूपसमभिव्याहारापेक्षा नास्तीति विभक्तीतरास्त्यादि-पदसमभिव्याहारानपेक्षयैव रामादीनां लोकेऽर्थविषयकबोधजनकत्वेनोक्तार्थवत्त्वस्य सत्त्वेन प्रातिपदिकत्वं सिद्ध्यति।

नन्वेवमपि रमा गौरी इत्यादीनां प्रातिपदिकत्वं न स्यात् तेषां रमेत्यस्य या प्रातिपदिकसंज्ञा तत्फलभूता च या विभक्तिः स्वादिरूपा तदितरटाबादिप्रत्ययसमभिव्याहारापेक्षयैव लोकेऽर्थविषयकबोधजनकत्वेनोक्तार्थवत्त्वाभावादिति चेदत्रोच्यते अर्थवत्त्वशरीरे विभक्ति-पदं प्रत्ययमात्रोपलक्षणं तथा चैतत्संज्ञाफलभूतप्रत्ययेतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयक-बोधजनकत्वमेवात्रार्थवत्त्वं, एवञ्च टाबादिप्रत्ययानामपि एतत्संज्ञाफलभूततया तदितरसमभि-व्याहारानपेक्षयैव रमादिशब्दानां लोकेऽर्थविषयकबोधजनकत्वेनोक्तार्थवत्त्वस्य सत्त्वेन न प्रातिपदिकत्वहानिः। नन्वेवमपि इन्द्राणीत्यादीनां प्रातिपदिकत्वानापत्तिः तेषाम् एतत्संज्ञाफल-भूतप्रत्ययेतरानुगागमसमभिव्याहारापेक्षयैव लोकेऽर्थविषयकबोधजनकत्वादिति चेदत्रोच्यते अर्थवत्त्वशरीरे प्रत्ययपदस्यानिवेशेन अत्र दोषवारणसम्भवात्। तथाहि–एतत्संज्ञाफल-भूतेतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमेवात्रार्थवत्त्वम्। इन्द्राणीत्यादिषु आनुगागमस्यापि एतत्संज्ञाफलभूततया एतत्संज्ञाफलभूतेतरसमभिव्याहारानपेक्षयैव लोकेऽर्थविषयकबोधजनकत्वस्य तत्र सत्त्वेनादोषात्। नन्वेवमपि ''एधाञ्चक्रे'' इत्यादौ एधामित्यस्य प्रातिपदिकसंज्ञाफलभूतेतर'चक्रे'रूपपदसमभिव्याहारापेक्षयैव लोकेऽर्थविषयक-बोधजनकत्वेन अर्थवत्त्वाभावात् प्रातिपदिकत्वाभावेन सोरनुत्पत्तौ पदत्वानापत्त्या तदव्यवहितपूर्वत्वविशिष्टस्य पदचरमावयवत्वविशिष्टस्यानुस्वारपदवतो विकल्पेन परसवर्णस्स्यादित्यर्थकेन वा पदान्तस्येति सूत्रेण वैकल्पिकपरसवर्णानापत्तौ ञकारघटित-प्रयोगानापत्तिः स्यादितिचेदत्रोच्यते–एतत्संज्ञाफलभूतेत्यस्य स्थाने एतन्निष्ठोद्देश्यता-निरूपितविधेयताश्रयत्वस्य निवेशेनादोषात्। तथा च एतन्निष्ठोद्देश्यतानिरूपितविधेयता-श्रयेतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमर्थवत्त्वमित्यर्थो निष्पद्यते। एवञ्च चक्रे इत्यत्र एधान्निष्ठोद्देश्यतानिरूपितविधेयताश्रयत्वस्यैव सत्त्वेन तदितरत्वाभावात् तदितरसमभिव्याहारानपेक्षयैव एधामित्यस्य लोकेऽर्थबोधजनकत्वेनोक्तार्थवत्त्वस्य तत्र सत्त्वेन एधामित्यस्य प्रातिपदिकत्वे सिद्धे तत्प्रयोज्यवैकल्पिकपरसवर्णोपपत्तौ ञकारघटितस्यापि रूपस्य साधुत्वं ज्ञापितं भवति। नन्वेवमुच्यमानेऽपि न निस्तारः कुम्भकारेत्यत्र कारेत्यस्य प्रातिपदिकत्वानापत्तेः। कारेत्यस्य कारनिष्ठोद्देश्यतानिरूपितविधेयताश्रयेतरकुम्भपदसमभि-व्याहारेणैवार्थबोधजनकत्वेनोक्तार्थवत्त्वाभावादिति चेदत्रोच्यते – एतन्निष्ठोद्देश्यतानिरूपित-विधेयताश्रयेतरपदार्थे पदेतरत्वस्य निवेशेनात्रत्यदोषवारणसम्भवात्। तथा च एतन्निष्ठोद्देश्यता-निरूपितविधेयताश्रयेतरो यः पदेतरस्तत्समभिव्याहारानपेक्षया लोकेऽर्थविषयकबोध-जनकत्वमर्थवत्त्वमिति पर्यवस्यति। प्रकृते कारेत्यस्य कारनिष्ठोद्देश्यतानिरूपितविधेयताश्रयेतर-कुम्भपदसमभिव्याहारेणैवार्थबोधजनकत्वेन एतन्निष्ठोद्देश्यतानिरूपितविधेयताश्रयेतरो यः

पदेतरस्तत्समभिव्याहारानपेक्षयैव लोकेऽर्थविषयकबोधजनकत्वेनार्थवत्त्वस्य तत्र सत्त्वात् कारेत्यस्यापि प्रातिपदिकत्वं सिद्ध्यति। नन्वेवमपि पञ्चगवधनेत्यादौ पञ्चगवेत्यस्य लोकेऽर्थ-बोधजननाय धनपदसमभिव्याहारापेक्षायास्सत्त्वेऽपि पञ्चगवनिष्ठोद्देश्यतानिरूपितविधेयता-श्रयेतरपदेतरसमभिव्याहारानपेक्षयैव लोकेऽर्थबोधजनकत्वेनार्थवत्त्वात्प्रातिपदिकत्वापत्तौ टिदन्तप्रातिपदिकत्वप्रयुक्तङीबापत्तिस्स्यादिति चेदत्रोच्यते अत्र पदेतरेत्यस्य स्थाने पूर्वपदेतरेत्यस्य निवेशः क्रियते, तथा च एतन्निष्ठोद्देश्यतानिरूपितविधेयताश्रयेतरो यः पूर्वपदेतरस्तत्समभि-व्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमर्थवत्त्वमिति लक्षणं पर्यवस्यति। तथा च प्रकृते धनपदे पूर्वपदेतरत्वस्य सत्त्वेन तत्समभिव्याहारानपेक्षया पञ्चगवधनघटकपञ्चगवेत्यस्यार्थ-बोधकत्वाभावेनोक्तार्थवत्त्वस्याभावान्न प्रातिपदिकत्वापत्तिः। इत्थम् अर्थवत्त्वस्वरूपं दूरमलक्ष्यं निक्षिप्य लक्ष्यमात्रानुसारि तत्तल्लक्ष्याणां सङ्ग्रहार्थमग्रेऽपि परिष्करणीयमत्र तु विस्तरभिया विरम्यत इति शम्।

*

## सन्दर्भाः


1. अष्टाध्यायी 1.2.45
2. अमरकोशः, रामाश्रमी व्याख्या, पृ.412
3. महाभाष्यम्, खण्ड-2, सं. पं. शिवदत्त शर्मा, पृ.49
4. प्रौढमनोरमा, सं.सदाशिवशर्मा शास्त्री, पृ.173
5. महाभाष्यम्, खण्ड-2, सं. पं. शिवदत्तशर्मा, पृ.231
6. लघुशब्देन्दुशेखरः, व्याख्या, नित्यानन्द पर्वतीयः, पृ.251-253
7. तत्रैव, पृ.253


*

## अयोध्याकाण्डस्य 56तमसर्गतः

## चित्रकूटस्य सौन्दर्यं वैभवं च

*** नगाः पुष्पिताः**

आदीप्तानिव वैदेहि सर्वतः पुष्पितान् नगान्।

*** किंशुकवृक्षाः मालिनः**

स्वैः पुष्पैः किंशुकान् पश्य मालिनः शिशिरात्यये।

*** भल्लातकाः बिल्वाः**

पश्य भल्लातकान् बिल्वान् नरैरनुपसेवितान्। फलपुष्पैरवनतान्।

*** मधूनि**

पश्य द्रोणप्रमाणानि लम्बमानानि लक्ष्मण।
मधूनि मधुकारीभिः संभृतानि नगे नगे।।

*** शिखी प्रतिकूजति**

एष क्रोशति नत्यूहस्तं शिखी प्रतिकूजति।
रमणीये वनोद्देशे पुष्पसंस्तरसंकटे।।

*** चित्रकूटम्**

मातङ्गयूधानुसृतं पक्षिसंघानुनादितम्।
चित्रकूटमिमं पश्य प्रवृद्धशिखरं गिरिम्।।

*** बहवो द्रुमाः, समभूमि तलम्।**

समभूमितले रम्ये द्रुमैर्बहुभिरावृते।
पुण्ये रंस्यामहे तात चित्रकूटस्य कानने।।

*** नानापक्षिगणायुतः पर्वतः**

तं तु पर्वतमासाद्य नानापक्षिगणायुतम्।
बहुमूलफलं रम्यं सम्पन्नसरसोदकम्।।

*** गिरिः मनोज्ञः**

मनोज्ञोऽयं गिरिः सौम्य नानाद्रुमलतायुतः।
बहुमूलफलो रम्यः स्वाजीवः प्रतिभाति मे।।

*** वासाय उत्तमता**

तां वृक्षपर्णच्छदनां मनोज्ञां यथाप्रदेशं सुकृतां निवाताम्।
वासाय सर्वे विविशुः समेताः सभा यथा देवगणाः सुधर्माम्।।

# श‍ृङ्गारप्रकाशदिशा सर्वकारकाणां सर्वविभक्तिवाच्यत्वम्

**विष्णुपदपालः**

## उपोद्घातः

एकादशशतकीयो मालवप्रदेशीयो महाराजाधिराजो भोजप्रवरः पुरातत्त्वस्य स्वनवतत्त्वस्य संग्रहे रचनायाञ्चाद्वितीयो बभूव। नैकेषु निर्माणेषु भोजप्रवरविरचितालङ्कारसम्बद्धः श‍ृङ्गारप्रकाशो विदुषां हृत्कमले सदा मोदते, अभिनवचिन्तनप्रतिपादनात्। तत्र हि शब्दस्य, अर्थस्य, तयोः सम्बन्धस्य च चर्चावेलायां प्रतिपन्नो व्याकरणांशो सविस्तरं प्रत्यपादि। पाणिन्यादौ कर्तरि प्रथमातृतीये, कर्मणि प्रथमाद्वितीये, करणे प्रथमातृतीये, सम्प्रदाने प्रथमाचतुर्थ्यौ, अपादाने प्रथमापञ्चम्यौ, अधिकरणे प्रथमासप्तम्यौ प्राधान्येन भवतः। भोजमते– कर्त्रादिषट्कारकेषु षड् विभक्तयो विधीयन्ते। पुनश्चात्रत्याः अभिनवाः कारकप्रभेदाः सहृदयान् सहसा समाकर्षन्ति। पुनश्च शोधपत्रेऽस्मिन् सर्वकारकेषु सर्वविभक्तिवाच्यत्वम् इति विषयं समाश्रित्य समासेन यथामति वर्णयितुं प्रभवामि।

## कर्तृकारकम्

यः क्रियां निर्वर्तयति, स कर्ता। तथाहि सर्वसम्मतो हि सिद्धान्तः–''स्वतन्त्रः कर्ता'' (पा.सू.–1.4.54) इति। क्रियायाः सिद्धौ स्वतन्त्रं यत्कारकं तत्कर्तृसंज्ञां लभते। स्वतन्त्र इत्युक्तेऽन्याधीनाभावः। स्वं तन्त्रं यस्य स स्वतन्त्रः। स्वतन्त्र इत्युक्ते प्रधान इति काशिका। तथाहि फलितम्– 'प्रकृतधातुवाच्यप्रधानीभूतव्यापाराश्रयः स्वतन्त्रः' इति। एवञ्च ग्रन्थकृद्भोजप्रवरः श‍ृङ्गारप्रकाशे कर्तृलक्षणम् अवादीत्– 'तत्र (स्वतन्त्रः) क्रियायां स्वेच्छया करणादिकारकाणि यः प्रयुङ्क्ते, न तु तैः प्रयुज्यते स स्वतन्त्रः' इति। अर्थाद्यः कारकविशेषः कर्मकरणादिकारकाणि क्रियायां नियोजयति, स कर्ता। कर्तृकारकं कर्मकरणादिकारकं नियोजयति न तु कर्मकरणादिकारकैः कर्तृकारकं नियोज्यते। इदमेव मतम् अत्यन्तं सुस्पष्टतया श‍ृङ्गारप्रकाशस्य चतुर्थप्रकाशे प्राह भोजप्रवरः– ''किं पुनस्तस्य स्वातन्त्र्यं यत्करणादीनि प्रयुङ्क्ते, न तैः प्रयुज्यते, तानि न्यक्करोति, न तैर्न्यक्क्रियते, न तैर्निर्वर्त्यते, तानि

निर्वर्तयति, तानि प्रतिनिधत्ते, न तैः प्रतिनिधीयते, तेभ्यस्सः प्रथमात्मानं लभते, न तानि। तस्मात् स तैर्विनापि दृश्यते, न तानि तेनेति''[1] इति। अत्र पाणिनिमतेन सह भोजप्रवरमतं विरुद्धम् आचरतीति न मन्तव्यम्। प्रकृते केवलं शब्ददिशा लक्षणपार्थक्यं त्वक्षिगोचरं जायते। परन्त्वर्थदिशा तु समतात्पर्यम् आवहति। यतो हि प्रकृतधातुवाच्यव्यापाराश्रयभूतः कर्तान्येन प्रयुक्तो न भवति। अपि तु स्वयमेव कर्मकरणादिकारकाणि प्रयोजयति। कर्तृकारकं किं रूपं विभक्त्याधारकम्। अत्र समाधत्ते भोजप्रवरः सरस्वतीकण्ठाभरणे ''**कर्तृकरणयोश्च**'' (भो.सू. 3.1.211) इति। अर्थाद् अनभिहिते कर्तरि करणे च तृतीया विभक्तिर्जायते। एवञ्च अभिहिते कर्तरि प्रातिपदिकार्थे ''**अर्थमात्रे प्रथमा**'' (भो.सू.– 3.1.275) इति शास्त्रेण प्रथमा विभक्तिर्विधीयते। एवञ्च ''**कर्तृकरणयोश्च**'' (भो.सू.– 3.1.211) इति योगबलेन अनभिहिते कर्तृकारके तृतीया विभक्तिः सर्वत्र भूयशो दृश्यते। न केवलम् अनभिहिते कर्तरि तृतीया विधीयते अपि तु तद्व्यतिरिक्तविभक्तयः सर्वा अपि सञ्जायन्त इति भोजमतम्। अत एव अधः कर्त्रर्थे विधीयमानानां प्रथमादिसर्वासां विभक्तीनां विधानं यथामति समालोच्यते।

**प्रथमावाच्यम्**

अभिहिते कर्तृकारके ''**अर्थमात्रे प्रथमा**'' (भो.सू.–3.1.275) इति सूत्रेण प्रथमा। यथा– 'देवदत्तो गच्छति' इत्यत्र गमिधातूत्तरतिरूपाख्यातप्रत्ययस्य कर्त्रर्थे विहितात्कर्ता अभिहितः। अतः अभिहिते कर्तरि देवदत्ते ''अर्थमात्रे प्रथमा'' (भो.सू.–3.1.275)इति योगेन प्रथमा। अभिहिते कर्तरि प्रथमाविधानस्य दृष्टान्तोऽयम्। इदञ्च मतं पाणिनेः सकाशाद् अनुवर्तितम्। पाणिनिनयेऽपि ''प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'' (पा.सू.–2.3.46) इति योगेनाभिहिते कर्तृकारके प्रातिपदिकार्थे प्रथमा विधीयते। अत्र कारकमपि प्रातिपदिकार्थः। अर्थात् प्रकृते भोजपाणिन्योर्मतसाम्यं साक्षाद् अक्षिगोचरमेव।

**द्वितीयावाच्यम्**

कदाचिद् अनभिहिते कर्तरि द्वितीयापि जायते। तस्य ह्युदाहरणम्– 'गमयति ग्रामं देवदत्तम्' इति। अत्र भोजमते हि मानम्– ''गतिज्ञानप्रत्यवसानार्थशब्दक्रियाकर्मकश्रुदृशीनामणि कर्ता णौ''[2] (भो.सू.–1.1.42) इति। योगेनानेन गत्याद्यर्थकधातूनाम् अणौ विद्यमानकर्तुः णौ कर्मसंज्ञा विधीयते। पाचयतीत्यत्र पच्–धातुः णिजन्तपचिधातुश्च वर्तेते। यत्र च वाक्ये सूत्रोपात्तधातूनाम् अनिवेशः तत्र प्रयोज्यस्य स्वत एव कर्तृसंज्ञा जायते। तस्मादेव प्रयोज्यकर्तरि तृतीया विभक्तिर्जायते। एवञ्च गत्यादिधातुप्रयोगेऽपि मैत्रादिप्रयोज्यस्य कर्तृसंज्ञा त्वासीदेव। अर्थाद् एतेन समायातं यत् प्रयोज्यस्य कर्तृसंज्ञा कर्मसंज्ञा चोभयमस्ति। अर्थात्

कर्मसंज्ञकत्वेऽपि पचिधातुनिष्ठव्यापाराश्रयत्वात् कर्तृत्वन्तु विराजत एव। अर्थाद् 'गमयति ग्रामं देवदत्तम्' इत्यत्रानभिहिते देवदत्ते कर्तरि द्वितीया इत्यपि वक्तुं शक्यते। तद्धेतोः कर्तर्यपि द्वितीयेत्यपि कथनयोग्यम्। तत्कारणादेव कर्तरि द्वितीयाविधानस्य दृष्टान्तत्वेन समादृतम्। इदमेव जयकृष्णशर्मा समर्थयति इति।[3] पुनश्च 'देवदत्तो ग्रामं यज्ञदत्तं गमयति' इत्यत्र गमिधातुः व्यापारद्वयार्थकः। एको गमनानुकूलव्यापारानुकूलव्यापारः, अपरो गमनानुकूलव्यापारः। गमनानुकूलव्यापाराश्रयत्वाद् यज्ञदत्तः कर्तैव। पुनश्च गमनानुकूलव्यापारानुकूलव्यापारस्य फलं गमनानुकूलव्यापारः, तदाश्रयत्वात् प्रयोज्यकर्तुरपि कर्मसंज्ञा जायते। तस्मादेव कर्तरि द्वितीया इत्यप्यभिधीयते। एवञ्च प्रकृते भोजपाणिन्योः तात्पर्यं समानमेवेति मे मतिः।

## तृतीयावाच्यम्

अनभिहिते कर्तरि तृतीया विधीयत इति प्रशस्तिः। तत्र हि मानकं शास्त्रम्– ''कर्तृकरणयोश्च'' (भो.सू.–3.1.211) इति। अस्यार्थो हि भवति– अनभिहिते कर्तरि करणे च तृतीया विभक्तिर्विधीयते। एवञ्च पाणिनिमते हि मानम्– ''कर्तृकरणयोस्तृतीया'' (पा.सू.–2.3.18) इति। यथा– 'देवदत्तेन ग्रामो गम्यत' इत्यत्र गमिधातूत्तरते-रूपाख्यातप्रत्ययस्य कर्मार्थे विहितात् कर्मादिकारकम् उक्तम्। देवदत्तादिरूपकर्तृ-कारकस्यानुक्तत्वात् ''कर्तृकरणयोश्च'' इति सूत्रेणानुक्ते देवदत्ताख्ये कर्तृकारके तृतीया विभक्तिर्जायते। इयञ्च विभक्तिः कर्तरि प्राधान्येन भवति। ग्रन्थकर्ता भोजप्रवर उदाहरति– 'चैत्रेण कृतम्'। अत्र क्तप्रत्ययो भाववाच्ये विहिताद् अनुक्ते चैत्ररूपकर्तृकारके ''कर्तृ-करणयोश्च'' इति शास्त्रेण तृतीया सञ्जायते। सिद्धान्तोऽयं पाणिनिसिद्ध एव। अर्थाद् अनुक्ते देवदत्तादिकर्तरि तृतीयेत्यत्र भोजपाणिन्योर्न विप्रतिपत्तिः।

## चतुर्थीवाच्यम्

अनभिहिते कर्तरि चतुर्थी विधीयते। तस्य दृष्टान्तं प्राह– 'मूत्राय कल्पते यवागूः' इति। प्रकृते 'क्लृप्यर्थकर्त्तरि विकारे' (भो.सू.–3.1.236) इति चतुर्थी विभक्तिर्विधीयते। क्लृप्यर्थकधातुयोगे यः संपद्यते, ततो विकारवाचकाच्चतुर्थी विभक्तिर्जायते। 'मूत्राय कल्पते यवागूः' इत्यत्र मूत्रं संपद्यमानं वर्तते। तद्धेतोर्विकारवाचकान्मूत्रशब्दात् चतुर्थी। यवागूः मूत्रात्मना विपरिणमते। उत्पत्तिरूपव्यापाराश्रयो मूत्रम्। तस्मादेव मूत्ररूपविकारस्य कर्तृसंज्ञा विद्यमानैव। प्रकृतसूत्रेण मूत्ररूपे विकारात्मनि कर्तरि चतुर्थी विभक्तिर्विधीयते। पाणिनिमतेन सह स्थूलदृष्ट्या वैपरीत्यम् आवहति। 'क्लृपि संपद्यमाने च' इति वार्तिकबलेन क्लृपिधातोर्योगे विकारवाचकाच्चतुर्थी विधीयते। पाणिनिमतेन त्वत्र केवलं विभक्त्यर्थो विराजते न तु कारकार्थः।

परन्तु सूक्ष्मदृष्ट्या पाणिनिमतेऽप्यत्र कर्तृकारकत्वं विलसति। अत्र प्रमाणं हि तत्त्वबोधिन्यां राजते ''प्रकृतिविकृत्योर्भेदविवक्षायां विकृतिवाचकाच्चतुर्थी। अभेदविवक्षायां तु परत्वात्प्रथमैव भक्तिर्ज्ञानं कल्पते''[4] इति। अर्थात्प्रथमाचतुर्थ्योः द्वयोः प्राप्तयोः परत्वात्प्रातिपदिकार्थे प्रथमा। 'भक्तिः ज्ञानाय कल्पते' इत्यत्रोत्पत्तिरूपव्यापाराश्रयात् कर्तुः विद्यमानात् कर्तरि चतुर्थीति भोजमतम्। पुनश्च भोजपाणिन्योः सूत्रानुसारं कर्तरि चतुर्थीति प्रमाणं दुष्करम्। परन्तु तात्पर्यानुसारं कर्तरि चतुर्थी भवत्येव।

**पञ्चमीवाच्यम्**

क्वचित्स्थलेऽनभिहिते कर्तर्यपि पञ्चमी विभक्तिरपि जायते। एवञ्च ग्रन्थकृत्स्वयमेव दृष्टान्तम् अयच्छत्– 'उपाध्यायादधीते' इति। प्रकृते च ''आख्यातोपयोगे'' (भो.सू.–1.1.71) इति प्रमाणम्। अत्र हि योगार्थः–

नियमपूर्वकविद्यास्वीकारे प्रतिपादयिता यः तदपादानं भवति। एवञ्च ''अपादाने पञ्चमी'' इति योगेनानभिहित उपाध्यायाख्येऽपादानकारके पञ्चमी विभक्तिर्जायते। भोजप्रवर 'उपाध्यायादधीत' इत्यत्र कर्तरि पञ्चमीति प्राह। कर्त्रर्थे कथं पञ्चमी इति पृच्छा। किं नामाध्ययनम्। टीकाकारा ब्रुवन्ति– ''अध्ययनं तु गुरुच्चारणोत्तरोच्चारणं नियमपूर्वकम्''[5] इति। अर्थाद् उपाध्यायः स्वयमेव उच्चारयति, ततः परम् अध्येतारः अनूच्चारयन्ति। तत्कारणादेवोपाध्यायस्यापि उच्चारणकरणादेवोपाध्यायस्य कर्तृत्वं विराजते। यद्यपि केनापि शास्त्रेण कत्रर्थे पञ्चमीविधानस्य ससूत्रं प्रमाणं नैव राजते भोजशास्त्रे पाणिनिशास्त्रे वा तथापि उपाध्यायादिष्वन्तर्गतां कर्तृत्वशक्तिमादाय कर्तरि पञ्चमीति फलितार्थकथनम्। तद्धेतोः अनुक्ते उपाध्यायरूपे कर्तरि पञ्चमीविभक्तेरपि दृष्टान्तोऽयम्।

**षष्ठीवाच्यम्**

क्वचित्स्थलेऽनभिहिते कर्तरि षष्ठ्यपि विधीयते। एवञ्च ग्रन्थकृत्स्वयमेव दृष्टान्तम् अयच्छत्– 'कृष्णस्य कृतिः' इति। तत्र प्रमाणं शास्त्रम्– ''कर्तृकर्मणोः कृति'' (भो.सू.–3.1.291) इति। अस्य हि अर्थः– कृद्योगेऽनभिहिते कर्तरि कर्मणि च षष्ठी विधीयते। यथा– 'कृष्णस्य कृतिः' इत्यत्र भावार्थे क्तिन्प्रत्ययविधानसामर्थ्यात् कृष्णाख्यः कर्तानुक्तः। अत एव कृदन्तर्गतक्तिन्प्रत्यययोगेऽनभिहिते कृष्णाख्ये कर्तरि षष्ठी विधीयते। सिद्धान्तोऽयं पाणिनेः शास्त्रादनुकृतः। यतो हि अनभिहिते कर्तरि कर्मणि च षष्ठीति पाणिनिरपि। तत्र मानम्– ''कर्तृकर्मणोः कृति'' (पा.सू.–2.3.65) इति। अर्थाद् अनुक्ते कर्तरि षष्ठीविधानं भोजपाणिनिसम्मतमेव।

## सप्तमीवाच्यम्

क्वचित्स्थलेऽनभिहिते कर्तरि सप्तम्यपि विधीयते। एतादृशस्य दृष्टान्तं प्राह श्रीमद्भोजप्रवरः– ''ब्राह्मणेषु भुञ्जानेषु वृषला आसते'' इति। तस्य च प्रमाणकं शास्त्रम्– 'यस्य च भावेन भावलक्षणम्' (भो. सू.–3.1.268) इति। अस्य हि योगस्यार्थः– यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यादिति। प्रकृते च दृष्टान्ते ब्राह्मण इति कर्तृपदम्। तस्मिन् ब्राह्मणाख्ये कर्तृपदे ''यस्य च भावेन भावलक्षणम्'' इति योगेन सप्तमी विधीयते। किन्तु पाणिनिनये प्रकृते च ब्राह्मणपदे केवलं विभक्त्यर्थो विद्यते। यतो हि प्रकृतसूत्रेण सप्तमीविभक्तिर्विधीयते न तु कारकम्। अत्र पाणिनिमतेन सह वैपरीत्यम् आवहतीति न मन्तव्यम्। पुनश्च बालमनोरमायामपि प्राह– ''कर्तृगतक्रियायास्तु ब्राह्मणेष्वधीयानेषु गत इत्युदाहार्यम्''[6] इति। इदमेव समर्थयति तत्त्वबोधिनीकार इति।[7] अर्थाद् ब्राह्मणादिशब्देषु सप्तम्यां जातायामपि कर्तृत्वकर्मत्वशक्तिर्नितरां विद्यते। एतेन स्पष्टं प्रतिपन्नं भवति यत्कर्तरि कारके सप्तमी विभक्तिरपि सम्भवति। अत्रापि कर्तरि सप्तमीविधानं पाणिनेः भोजस्य च मतसिद्धम्।

## कर्मकारकम्

कारकस्य षट्सु प्रभेदेषु कर्मकारकम् अन्यतमम्। क्रियतेऽसौ इति कर्म। पाणिनिपरम्परायां च कर्मसंज्ञाविधायकं शास्त्रम् ''कर्तुरीप्सिततमं कर्म'' (पा.सू.–1.4.49) इति। भोजप्रवरोऽपि स्वग्रन्थे सममेव योगं ससर्ज। तेनापि ''कर्तुरीप्सिततमं कर्म'' (भो.सू.–1.1.38) इति योगः प्रत्यपादि। एवञ्च तस्य योगार्थो भवति– कर्ता क्रियया यं कारकविशेषम् अतिशयेन आप्तुमिच्छति, तत्कर्म। अर्थात् प्रकृतधातुनिष्ठप्राधानीभूतव्यापाराश्रयः कर्ता क्रियाद्वारा यं कारकविशेषम् अतिशयेन प्राप्तुमिच्छति, तस्यैव कारकविशेषस्य कर्मसंज्ञा जायते। कैश्चित्तु– फलाश्रयः कर्म इति। केचित्तु प्राहुः– प्रकृतधातुनिष्ठप्रधानीभूतव्यापारजन्य-प्रधानीभूतफलाश्रयः कर्म। यथा– 'देवदत्तो ग्रामं गच्छति' इत्यादौ गमनरूपव्यापाराश्रयकर्ता देवदत्तो गमनक्रिययातिशयेन ग्रामं प्राप्तुमिच्छति। तस्मादेव ग्राम इति कर्म। अपरञ्च प्रकृतगमिधातुनिष्ठप्रधानीभूतपादविक्षेपरूपव्यापारजन्यप्रधानीभूतोत्तरदेशसंयोगरूपफलाश्रयो ग्रामः। तस्माद्धेतोः ग्राम इति कर्म। तत्र चानभिहिते कर्मकारके ''कर्मणि द्वितीया'' इति भोजयोगेन द्वितीया जायते। तत्र चाभिहिते कर्मणि ''अर्थमात्रे प्रथमा'' इति भोजसूत्रेण प्रथमा। यथा– 'देवदत्तेन ग्रामो गम्यत' इत्यत्र गमिधातूत्तरताद्याख्यातप्रत्ययेन कर्मण उक्तत्वादभिहिते कर्मणि ''अर्थमात्रे प्रथमा'' इति योगेन प्रथमा विधीयते। एवञ्च कर्मणि आधिक्येन द्वितीया भवतीति राद्धान्तः। अत्र न केवलं कर्मकारके प्रथमाद्वितीयेऽपि त्वन्याः सर्वा अपि विभक्तयः प्रायः सञ्जायन्ते।

**प्रथमावाच्यम्**

अभिहिते कर्मणि प्रथमा। तत्र प्रमाणम् ''अर्थमात्रे प्रथमा'' (भो.सू.–3.1.275) इति। यथा– 'देवदत्तेन ग्रामो गम्यत' इत्यत्र गमिधातूत्तरताद्याख्यातप्रत्ययेन कर्मण उक्तत्वाद् अभिहिते ग्रामरूपे कर्मणि 'अर्थमात्रे प्रथमा' (भो.सू.–3.1.275) इति योगेन प्रथमा विधीयते। तद्धेतोः ग्राम इत्यत्र प्रथमा। समसिद्धान्तो राजते पाणिनावपि। तत्राप्यभिहिते कर्मकारके प्रातिपदिकार्थे प्रथमा विधीयते। अत्र कारकमपि प्रातिपदिकार्थ इति पक्षः। तत्र मानम्– 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' (पा.सू.–2.3.46) इति। एवञ्च अभिहिते कर्मणि प्रथमेति सर्वसम्मतम्।

**द्वितीयावाच्यम्**

अनभिहिते कर्मणि द्वितीया विभक्तिः बहुलं प्रशस्तिः। तत्र प्रमाणम्– ''कर्मणि द्वितीया'' (भो.सू.–3.12.199) इति योगः। एतद्योगे 'अनभिहिते' इत्यधिक्रियते। ग्रन्थकारः स्वयमेव दृष्टान्तम् अयच्छत्– 'कटं करोति' इति। अत्र च कृधातूत्तरतिबाद्याख्यात-प्रत्ययेन कर्तुः अभिहितत्वाद् अनुक्ते कटरूपे कर्मणि ''कर्मणि द्वितीया'' इति सूत्रेण द्वितीया। अनभिहिते कर्मणि द्वितीयेति आधिक्येन प्रशस्तिः। एतन्मतं पाणिनि-सकाशादेवानुकृतम्। तन्नयेऽपि ''कर्मणि द्वितीया'' इति योगबलेनानभिहिते कर्मणि द्वितीया विधीयते। अर्थाद् भोजपाणिन्योरपि मतसाम्यं प्रत्यक्षीभवति।

**तृतीयावाच्यम्**

क्वचित्स्थलेऽनभिहिते कर्मणि तृतीयापि विधीयते। तत्र हि मानम्– ''संज्ञश्च'' (भो.सू.–3.1.218) इति। एतद्योगस्यार्थः सम्पूर्वकस्य ज्ञाधातोः कर्मणि तृतीया विकल्पेन भवति। अत्र भोजप्रवरः स्वयमेव दृष्टान्तं प्रददाति– 'मात्रा सञ्जानीते' इति। प्रकृते च सम् इति उपसर्गपूर्वकस्य ज्ञाधातोः कर्म माता। तस्याश्च मातुः विकल्पेन तृतीयापि विधीयते। तद्धेतोः मात्रा इति रूपं सेत्स्यति। कर्मणि तृतीयाविधानस्य दृष्टान्तोऽयम्। पाणिनिनयेऽप्यनभिहिते कर्मणि तृतीया विभक्तिर्जायते। तत्र मानम्– ''संज्ञोऽन्यतरस्यां कर्मणि''(पा.सू.–2.3.22) इति। अत एव कर्मकारके तृतीयापि जायत इत्यत्र भोजपाणिन्योर्मतसाम्यम्।

**चतुर्थीवाच्यम्**

अनभिहिते कर्मणि चतुर्थ्यपि विधीयते। तत्र प्रमाणं शास्त्रम्– ''मन्यतेः प्रतिकृष्य कुत्सायाम् उपमानेभ्यः'' (भो.सू.–3.1.238) इति। अस्य च योगस्यार्थो भवति–

कुत्सात्वे अवगम्यमाने मन्यधातोः उपमानवाचकेभ्यः कर्मभ्यः चतुर्थी विकल्पेन भवति। तथाहि ग्रन्थकृत्स्वयमेव दृष्टान्तं व्यरचयत्– 'न त्वां शुने मन्ये' इति। प्रकृते च मन्यधातोः उपमानवाचकं कर्म शुनः। पुनश्च निन्दायाम् अवगम्यमानायां शुनरूपे कर्मणि विकल्पेन चतुर्थी। तेन शुन इत्यत्र ङेविभक्तिर्जाता। एतद्विषये पाणिनिसम्मतिरपि दरीदृश्यते। तथाहि शास्त्रम्– ''मन्यकर्मण्यनादरे विभाषाऽप्राणिषु'' (पा.सू.–2.3.17) इति। अत्रापि निन्दात्वे द्योत्ये मन्यधातोः कर्मणि विकल्पेन चतुर्थी जायते। तस्मादेवानभिहिते कर्मणि चतुर्थी जायत इति सिद्धान्तः प्रायः सर्वाचार्यमतसिद्धः। पुनश्च भोजपाणिन्योर्मतेनाप्यनभिहिते कर्मणि चतुर्थी भवति।

**पञ्चमीवाच्यम्**

क्वचिदनभिहिते कर्मकारके पञ्चमी जायते। तत्र प्रमाणम्– ''ल्यब्लोपे कर्माधिकरणयोः'' (भो.सू.–3.1.242) इति। अस्य हि योगस्यार्थः– ल्यबन्तस्याप्रयोगे सति गम्यमानस्तदर्थं प्रति कर्मण्यधिकरणे च पञ्चमी विभक्तिर्जायते। अस्य हि दृष्टान्तः– 'प्रासादात्प्रेक्षते' इत्यस्यार्थः प्रासादम् आरुह्य प्रेक्षत इति। अत्र ल्यबन्तस्यादर्शनवशाद् अनभिहिते प्रासादरूपकर्मणि पञ्चमी जायते। इदमपि मतं पाणिनिशास्त्र उपलभ्यमानम्। अत्रापि अनभिहिते कर्मणि पञ्चमीविधानाय ''ल्यब्लोपे कर्मण्यधिकरणे च'' इति वार्तिकम्। तस्मादेव अनभिहिते कर्मणि पञ्चम्यपि जायत इत्यत्र नास्ति सन्देहः। पुनश्च भोजमते पाणिनिमते चानभिहिते कर्मकारके पञ्चमी जायते।

**षष्ठीवाच्यम्**

क्वचित्स्थलेऽनभिहिते कर्मणि षष्ठ्यपि विधीयते। तत्र हि मानं शास्त्रम्– ''कर्तृकर्मणोः कृति'' (भो.सू.–3.1.291) इति। अस्य हि योगस्यार्थः– कृद्योगेऽनभिहिते कर्तरि कर्मणि च षष्ठी विधीयते। तथाहि दृष्टान्तः– 'जगतः कर्ता कृष्णः' इति। प्रकृते च कर्त्रर्थे ण्वुल्प्रत्ययस्य विधानात् कृष्णाख्यः कर्ताभिहितः। पुनश्च जगदाख्यकर्म अनुक्तम्। तस्मादेव प्रकृतयोगेन अनभिहिते जगदाख्ये कर्मणि षष्ठी विभक्तिर्विधीयते। इदमपि मतं पाणिनिमतेन सह साधर्म्यम् आवहति। अत्र पाणिनिनयेऽपि प्रमाणम्– ''कर्तृकर्मणोः कृति'' (पा.सू.–2.3.65) इति। अर्थादनभिहिते कर्मण्यपि षष्ठी भवतीति सिद्धान्तः। अर्थाद् अनभिहिते कर्मणि षष्ठीविधानाय साक्षादेव सूत्रं राजतेतराम्।

**सप्तमीवाच्यम्**

अनभिहिते कर्मणि सप्तमी तत्र प्रमाणभूतं हि शास्त्रम्– ''क्तस्येन्विषयस्य कर्मणि''

(भो.सू.–3.1.256) इति। भोजप्रवरेणापि कात्यायनोक्तवार्तिकमेव अनुकृतम्। तस्य च योगस्यार्थो भवति– इन्प्रत्ययान्तर्गतो यः क्तप्रत्ययान्तः, तस्य कर्मणि सप्तमी विधीयते। अत्र ग्रन्थकृत्स्वयमेव दृष्टान्तम् अरचयत्– 'अधीती व्याकरणे' इति। एवञ्च अधीती इत्यत्र इन्प्रत्ययान्तस्य अन्तर्भूतः क्तप्रत्ययान्तः। एवञ्च तस्मिन् चानुक्ते व्याकरणाख्ये कर्मकारके प्रकृतयोगेन सप्तमी विधीयते। सिद्धान्तोऽयं पाणिनिशास्त्रान्तर्गतः। तत्र प्रमाणं शास्त्रम्– ''क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्'' इति वार्तिकम्। एतेन परिज्ञातं भवति यदनभिहितेऽधिकरणकारके सप्तम्यपि जायत इत्यत्र नास्ति कश्चिदपि सन्देहावसरः।

**उपसंहृतिः**

शोधेऽस्मिन् केवलं कर्तृकर्मणोः सर्वाः सप्त विभक्तयो विधीयन्ते। करणादिष्वपि एताः सर्वा विभक्तयोऽपि भवन्त्येव। अत्र ग्रन्थकलेवरवृद्धिभयादेव नैव चर्चितम्। भोजमतेन करणे, सम्प्रदाने, अपादाने, अधिकरणे च प्रथमादयः सर्वाः सप्त विभक्तयो विधीयन्ते एव। सर्वत्र दृष्टान्तेषु पाणिनेः सम्मतिरस्ति इति ससूत्रं मानं नैव प्रदातुं शक्यते। भोजमतेन तु सर्वैव विभक्तिः कारकार्थबोधिका। पुनश्च 'प्राधान्येन व्यपदेशा भवन्ति' इति नयेन तृतीया करणार्थबोधिका। यतो हि अधिकस्थले करणकारके तृतीया विधीयते। तत्र हि भोजमते मानम्– 'कर्तृकरणयोश्च' इति। पुनश्च पाणिनिमते मानम्– 'कर्तृकरणयोस्तृतीया' इति। अत्रेदमपि बोध्यम्– बहुत्र भोजराजविरचितयोः सरस्वतीकण्ठाभरणशृङ्गारप्रकाशयोः मतपार्थक्यं स्पष्टमेवानुभूयते। यथा– 'मासेनाधीते' इत्यत्र करणे तृतीया इति भोजः शृङ्गारप्रकाशे। यतो हि बाह्याख्यकरणस्य क्रियाश्रितस्य भेदस्य दृष्टान्तत्वेनेदमेव प्रावोचद्भोजप्रवरः। परन्तु 'मासेनाधीते' इत्यत्र केवलं तृतीयेति भोजः सरस्वतीकण्ठाभरणे। तथाहि भोजप्रवरः सरस्वतीकण्ठाभरणे प्राह– ''मासादेर्व्याप्यमानतैव न साधकतमत्वमिति करणत्वं न भवति'' इति। अर्थात् प्रकृतस्थले एकस्यैव द्विधा मतं दरीदृश्यते। एवञ्च करणे, सम्प्रदाने, अपादाने, अधिकरणे च प्रथमादिसप्तविभक्तिविधानमेव शृङ्गारप्रकाशग्रन्थस्याभिनवत्वं विदधाति। एवञ्च सर्वकारकाणां सर्वविभक्तिवाच्यम् इति अभिनवविचाराः कियत्साफल्यं प्राप्नुवन्तीत्यत्र विद्वांस एव मानम्।

*

## सन्दर्भाः


1. शृङ्गारप्रकाशः, पृ.222
2. गत्यर्थज्ञानार्थभोजनार्थानां शब्दक्रियाणामकर्मकाणां श्रुदृशोरप्यणौ यः कर्ता णौ स कर्मसंज्ञो भवति। गच्छति माणवको ग्रामं, गमयति माणवकं ग्रामम्। सरस्वतीकण्ठाभरणम्, हृदयहारिणी वृत्त्युपेतम् - 1, पृ. 14
3. एवं यदा चैत्रो मैत्रेण तण्डुलं पाचयतीति प्रयोगः, तत्रापि पूर्ववदन्वयबोधः। मैत्रस्य व्यापारापेक्षया कर्तृत्वं चैत्रव्यापारापेक्षया कर्म्मत्वञ्च, अतः द्वितीयातृतीययोः वैकल्पिकमिति बोध्यम्। सारमञ्जरी, पृ. 23
4. वैयाकरणसिद्धान्तकौमुदी, बालमनोरमातत्त्वबोधिनीसहिता -1, पृ. 651
5. वैयाकरणसिद्धान्तकौमुदी, बालमनोरमातत्त्वबोधिनीसहिता -1, पृ. 662
6. वैयाकरणसिद्धान्तकौमुदी, बालमनोरमातत्त्वबोधिनीसहिता -1, पृ. 698
7. निर्ज्ञातकाला हि क्रिया अनिर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदकत्वाल्लक्षणं, तत्र प्रसिद्धकर्तृकर्मणोर्वाचकाद् ब्राह्मणादिशब्दाल्लक्ष्यलक्षणभावसम्बन्धषष्ठ्यां प्राप्तायामियं सप्तमी। वैयाकरणसिद्धान्तकौमुदी, बालमनोरमातत्त्वबोधिनीसहिता -1, पृ. 697
8. सरस्वतीकण्ठाभरणम्, हृदयहारिणीवृत्त्युपेतम् - 3, पृ. 41


*

## किञ्चिद् रामायणीयम्

*** सुरम्यः चित्रकूटः सुतीर्था च नदी माल्यवती –**

सुरम्यमासाद्य तु चित्रकूटं नदीं च तां माल्यवतीं सुतीर्थाम्।
ननन्द हृष्टो मृगपक्षिजुष्टाम्।। अयोध्या 56.35

### अयोध्याकाण्डम् , सर्गः 100

चित्रकूटे जटिलं चीरवसनं रामं भरतो ददर्श। रामः पाणिना विवर्णवदनं भ्रातरं भरतं परिजग्राह। रामं तं भ्रातरं मूर्ध्नि आघ्राय अङ्के आरोप्य सादरं परिपप्रच्छ। तस्य कुशलप्रश्नेषु **'कच्चित्'** इत्यव्ययेन प्रारब्धाः प्रश्नाः इत्थम् आसन्–

**''कच्चित्''**

1. तात! यत् त्वं राजा इहागतः (तद्) धारयते (राज्यम्)?
2. न दीनः राजा सहसा लोकान्तरं गतः?
3. सौम्य! बालस्य ते शाश्वतं राज्यं न भ्रष्टम्?
4. सत्यपराक्रम! पितुः शुश्रूषसे?
5. राजसूयाश्वमेधानाम् आहर्ता धर्मनिश्चयः सत्यसंगरः राजा दशरथः कुशली?
6. तात! इक्ष्वाकूणाम् उपाध्यायः धर्मनित्यः महाद्युतिः विद्वान् ब्राह्मणः यथावत् पूज्यते?
7. तात! कौसल्या च प्रजावती सुमित्रा च आर्या देवी कैकेयी च सुखिनी नन्दति?
8. विनयसम्पन्नः कुलपुत्रः बहुश्रुतः अनसूयुः अनुद्रष्टा पुरोहितः ते सत्कृतः?
9. ते अग्निषु युक्तः विधिज्ञः मतिमान् ऋजुः सदा काले हुतं च होष्यमाणं च वेदयते?
10. तात! त्वं देवान् पितॄन् भृत्यान् पितृसमानपि गुरून् वृद्धान् वैद्यान् च ब्राह्मणान् च अभिमन्यसे?
11. तात! त्वम् इष्वस्त्रवरसम्पन्नम् अर्थशास्त्रविशारदं सुधन्वानम् उपाध्यायं मन्यसे?

*

# हेतुमण् णिचोऽर्थः प्रेषणादिः

डॉ. अवधेश कुमारः

**प्रस्तावना**

प्रयोज्य–प्रयोजकभावसम्बन्धप्रकटनाय णिच्–प्रत्ययस्य प्रयोगो भवति, परं णिच्-प्रत्ययस्य व्यवस्था कथं भवति, कश्च तस्यार्थः? अयं स्वार्थिको वा अर्थवान् वा इति विचारः कार्यः। णिच् चापि द्वाभ्यां सूत्राभ्यां पाणिनीये तन्त्रे संकेत्यते–एकः चौरादिकः अपरः हेतुमण्णिच् इति। चौरादिकः णिच् प्रकृतेरेवार्थमाह, न ततो भिन्नतामुपपादयति, परं हेतुमण्णिच् प्रकृतेः भिन्नमर्थमाह। तथा हि प्रकृत्या स्वतन्त्रकर्त्तुरेव व्यापारः अभिधीयते। परम् अनेन प्रयोजककर्तुः व्यापारः प्रकट्यते। अतः वाक्यद्वयेन स्फुटः 'देवदत्तः ग्रामं गच्छति'। 'देवदत्तं ग्रामं गमयति'। इति चरमस्य हेतुमण्णिचोर्थविचाराय एष लेखः प्रस्तूयते।

**उद्देश्यम्–**

अस्य शोधपत्रस्य उद्देश्यम् अस्ति प्रयोगकाले प्रयुक्तस्य णिचः प्रत्ययस्य अर्थविभेदविज्ञानम्। अन्यथा विवेकाभावे सांकर्येणार्थबोधो जायते। अथ च 'हेतुमत्' इति पदस्य तदर्थस्य च ज्ञानेनैव अर्थस्फुटप्रतिभासः खलु, अतस्तस्यापि बोधः साध्यते।

'हेतुमति च'[1] इति सूत्रे पूर्वं संदेहो भवति यत् किं पारिभाषिकस्य हेतोर्ग्रहणम् आहोस्वित् लौकिकस्य। तत्प्रयोजको हेतुश्च[2] इति सूत्रेण स्वतन्त्रकर्तुः प्रयोजकः हेतुसंज्ञक उक्तः। अथ च लौकिकः फलसाधनयोग्यो हेतुरुच्यते अर्थात् फलस्य साधने सम्पादने यः योग्यो भवति सः हेतुरुच्यते। अधुना अस्मिन् सूत्रे कः हेतुर्ग्राह्यः इति विचारः क्रियते।

एका परिभाषा अस्ति ''कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः''[3] तेन कृत्रिमस्य अकृत्रिमस्य च ग्रहणे प्राप्ते कृत्रिमस्य ग्रहणं न्याय्यं भवति। अतः पारिभाषिकस्य हेतोरेव ग्रहणमत्र युक्तं परमन्या एका परिभाषा अस्ति सा खलु 'उभयगतिरिह भवति'[4] तया परिभाषया व्याकरणे उभयगतिरुच्यते अर्थात् कृत्रिमस्य अकृत्रिमस्य चेति उभयोर्ग्रहणं

दृश्यते तेन अत्र जायते सा शङ्का। 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे'[5] इति सूत्रात् करणे इति पदस्य अनुवर्तनात् अयं सूत्रार्थो भवति हेतुमति करणे णिच् प्रत्ययो भवतीति। सर्वासां क्रियाणां हेतुमत्त्वाद् विशेषणसामर्थ्यात् पारिभाषिकस्यैव[6] ग्रहणं युक्तम्। अधुना सिद्ध्यति यत् लौकिकः हेतुः न ग्रहीतव्यः।

अधुना अपरा शङ्का जायते– यं प्रति पितृत्वं स एव पितृमान् उच्यते। एवं यं प्रति हेतुत्वं स एव हेतुमान् इति–उच्यते? ततः स्वतन्त्रकर्तुः प्रयोजकस्य हेतुमत् इति शब्देन ग्रहणं प्राप्नोति इष्यते च प्रयोजककर्तुः व्यापारः। हेतुमत्–शब्देन उच्यते तदर्थं 'करणे' इति अनुवृत्तेः तद्व्यापारः अधिश्रयणादिः हेतुमान् उच्येत हेतुमति करणे इति विज्ञानात्। अत्र हेतुमच्छब्दे नित्ययोगे मतुप् विज्ञेयः। यतोहि क्रियाकारकयोः नित्ययोगो भवति। येन करणेन हेतोः नित्ययोगः स हेतुमान्। स च पुनः प्रेषणाध्येषणादिः न प्रयोज्य-व्यापारः। विनापि तेन प्रवृत्तिदर्शनात्। अतः हेतुः अस्ति (कर्ता) अस्य (प्रेरणादेः) करणस्य=तत् हेतुमत् तत्र णिच्। तेन पाकाद्यपेक्षया हेतुत्वेनोपलक्षितः स्वव्यापार एव मतुपोच्यते। अत्र पक्षद्वयं सम्भवति एकः प्रकृत्यर्थविशेषणपरो द्वितीयश्च प्रत्ययार्थपक्षः। प्रकृत्यर्थविशेषणं तद्भवति यत्र धातोः अर्थः केनचिदन्येनार्थेन विशेष्यते। अथ च प्रत्ययार्थपक्षः स भवति यत्र प्रत्ययः उत्पाद्यते अर्थात् प्रत्ययस्य वाच्यः अर्थः संकेत्यते चेत् प्रकृतिविशेषणपक्षे अयं सूत्रार्थः– हेतुमति यद्धातुर्वर्तते ततो णिच्। प्रत्ययार्थपक्षे च अयं सूत्रार्थः हेतुमति वाभिधेये णिच्। अधुना एतत् विचार्यं यत् प्रथमपक्षः सभवति न वा।

सम्भवति हि प्रकृत्यर्थविशेषणत्वम्, तद्यथा–इह पचेः कः प्रधानार्थः? यासौ तण्डुलानां विक्लित्तिः। कथम्? तदर्थत्वात् कारकग्रामस्य, तथा हि पदमञ्जर्याम्, कारके सूत्रे–सा च सकलकारकजन्या फलभूता विक्लित्त्यादिरूपा क्रिया प्रधानक्रिया तदनन्तरं फलोत्पादात् इति भावः 'काष्ठं पचति' देवदत्तः पचति, स्थाली पचति इत्यादीनामन्यथा अनुपपत्तेः विक्लित्त्यर्था या अपि क्रिया ताः सर्वाः तादर्थ्यात् पच्यनुवाच्याः भवन्ति। उक्तमपि भर्तृहरिणा–

**अनन्तरं फलं यस्याः कल्प्यते तां क्रियां विदुः।**

**प्रधानभूता तादर्थ्यात् अन्यासां तु तदाख्यता।।**[7]

अत एव उदकमाहरति, विक्रयार्थो हि काष्ठान्याहरति नासौ पचतीत्युच्यते। तत्कस्य हेतोः? विक्लित्तिं प्रति तादर्थ्याभावात्। अतः यथा तादर्थ्यात् आहरणज्वलनादिक्रिया पचतिवाच्या भवति तथा तुल्यहेतुत्वात् प्रयोजकव्यापारः प्रेषणादिरपि पचिवाच्यो भविष्यति। णिच्प्रत्ययस्तु द्योतकः। अस्मिन् पक्षे स्वार्थिकत्वात्[8] उक्तार्थेऽपि प्राप्नोति– उक्तः करोति। प्रेषितः करोति

इति? तत्र द्योत्यस्य शब्दान्तरेण द्योतितत्वात् द्योत्याभावान्न स्यात्। पुनर् उच्यते यदि च पचतिः तादर्थ्याद्, उभयप्रयोज्यप्रयोजकयोः व्यापारमाचष्टे, तर्हि धातुवाच्यव्यापारसाम्यात् द्वयोः कर्त्रोः, प्रयोज्य–प्रयोजकयोः लेनाभिधानं[9] प्राप्नोति– देवदत्तयज्ञदत्तौ पाचयतः इति प्राप्नोति? प्रत्ययार्थपक्षे नायं दोषः प्रकृत्यर्थोपसर्जनस्य ण्यर्थस्य प्राधान्यात्[10] तस्यैव वाच्ये लकारः। नैष दोषः–पचतिः अर्थात् विक्लित्त्यनुकूलो व्यापारः। अत्र यदा काष्ठं पचति इति प्रयुज्यते तदा काष्ठं विक्लित्त्यनुकूलं व्यापारं करोतीत्यर्थः। तस्य च विक्लित्त्यनुकूलव्यापारः ज्वलनमेव। अतः अन्यकारकाणाम् अविवक्षातोऽभावात् पचतेः लकारेण काष्ठं तद्व्यापारज्वलनाभिधानं भवति? अत एव ज्वलतेः पच्व्यपदेशः। परं यदा देवदत्तः काष्ठैः पचति इत्यत्र यथा प्रधानः देवदत्तः प्रयुज्यते तथा प्राधान्यात् तस्यैवाभिधानम्, न अप्रधानस्य काष्ठादेः। उक्तं चैतत् कारके सूत्रे–पदमञ्जर्याम् अपादानस्यावधिभावोपगमनं व्यापारः करणस्य काष्ठादेः ज्वलनम्, अधिकरणस्य सम्भवनधारणादिः कर्तुः प्रसिद्ध एव प्रयोजकस्य प्रेरणादिः। न चैवं करणादीनामपि कर्तृसंज्ञाप्रसङ्गः परतन्त्रत्वात्। प्रधानेन हि कर्त्रा समवाये करणादीनि परतन्त्राणि, तद्यथा–अमात्यानां राज्ञा सह समवाये पारतन्त्र्यम्, व्यवाये स्वातन्त्र्यम् इति प्रधाननिमित्तकर्त्रा सन्नियोगे काष्ठादीति निमित्तमात्राणि न तेषां लेनाभिधानं युक्तम्। अतः 'देवदत्तः काष्ठेन पचति' इत्यस्यार्थः– स्वतन्त्रः देवदत्तः काष्ठं स्वाधीनं कृत्वा, तेन ज्वलता काष्ठेन विक्लित्त्यनुकूलं व्यापारं करोति। (स्वतन्त्रः कर्ता) इत्यत्रोक्तं सर्वकारकेषु कर्तुः प्राधान्यम्-

**प्रागन्यतः शक्तिलाभान् न्यग्भावापादनादपि।**
**तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात्॥**[11]

यदा तु देवदत्तादिः चेतनोऽपि अप्रधानम्, न तत्र लेन तस्याभिधानं भवति। पारतन्त्र्यात् तद्यथा– भोगा न भुक्ता वयमेव भुक्ता[12] इति। अतो निश्चितं यत् प्रधानस्यैव आख्यानम्। अधुना यदा वाक्ये प्रयोजकः प्रयुज्यते तदा स्वतन्त्रप्रयोज्यता अपि तदधीनत्वात् प्रयोजकः प्रधानतरः संपद्यते। अत एव धातुवाच्यव्यापारवैषम्यात् न द्वयोः कर्त्रोः लेनाभिधानम्। अपितु प्रधानस्य प्रयोजकस्यैव। तेन देवदत्तः यज्ञदत्तेन काष्ठेन पचति इत्यस्य अयमर्थः सम्पद्यते– देवदत्तः प्रयोजककर्ता यज्ञदत्तप्रयोज्यकर्तारं ज्वलता काष्ठेन विक्लित्त्यनुकूलव्यापारं कुर्वन्तं प्रेरयन् प्रधानः सन् विक्लित्यनुकूलं व्यापारं करोतीत्यर्थः। अतः न प्रकृत्यर्थविशेषणपक्षेऽपि कश्चिद् दोषः इति सर्वमभिप्रेतम्।

अयमेव पक्षः भाष्यकारकैयटनागेशैः सर्वसम्मततया अभिमतम्। यदाह भाष्यकारः– इह पचेः कः प्रधानार्थः यासौ तण्डुलानां विक्लित्तिः। अथेदानीं तदभिसन्धिपूर्वकं युक्तं

यत् सर्वः पच्यर्थः स्यात् (महा.), एतं विवृण्वन् कैयट आह ''प्रकृत्यर्थविशेषणपक्षोऽपि भाष्यकारेण व्यवस्थापितः तद्दोषाणां सुपरिहारात्। प्रकृत्या प्रयोज्यव्यापारस्योपसर्जनस्य प्रयोजकव्यापारस्याभिधानात् तस्यैव णिचा द्योतनात् प्रधाने एव कर्तरि लो भविष्यति नाप्रधाने।' नागेशोऽपि वाचकतापक्ष इव द्योतकतापक्षेऽपि द्वयोः व्यापारयोः गुणप्रधानभावेनैवोपस्थितेः प्रधानकर्तुरेव तेनाभिधानमिति अप्रधाने कर्तरि तृतीयादिः भवति इति। भट्टोजिदीक्षितस्तु असाधुमेव इमं पक्षमाह। स मन्यते यदाह शब्दकौस्तुभे, इह यद्यपि फलव्यापारयोः धातुवाच्यत्वात् विक्लित्त्यनुकूलव्यापारत्वस्य च प्रेषणादावपि सुलभत्वात् तस्यापि पच्यर्थताम् आश्रित्य णिचो द्योतकतेति वर्णितं भाष्यादौ तथापि प्रौढिवादमात्रमेतत्। न तु ततः प्राचीनोऽपि क्रियाद्यवस्थायां क्वाचित्कप्रयोगस्य भाक्तत्वेनाप्युपपत्तेश्च पचतिपाचयत्योः अर्थवैलक्षण्यस्य अनुभवसिद्धत्वाच्च, अणौ कर्तुः णौ कर्मत्वमित्यादिव्यवस्थाभ्युपगमाच्च प्रणाययति, अभिषावयति इत्यादौ उपसर्गस्य प्रकृत्यर्थविशेषद्योतकत्वे णत्वषत्वे स्तः, णिचा सम्बन्धे तु नेत्यष्टमे स्फुटत्वाच्च। अतोऽत्र पक्षे नातीवाभिनिवेष्टव्यम्।

पचतीत्यप्रयोगात्, अन्यथातिप्रसङ्गात् इत्यादिः।[13] द्वयोः कर्त्रोः लेनाभिधानमित्यादयस्तु उपक्रममात्रैकदेशिदोषाः अन्यथा मन्यमानेऽपि हेतुमति प्रत्ययार्थविशेषणत्वे 'देवदत्तः यज्ञदत्तेन पाचयति' इति तु यद्यपि सिद्ध्यति तथा ज्वलनाधिश्रयणादीनां देवदत्तकाष्ठादीनां तादर्थ्यात् पचतिवाच्ये सति धातुवाच्यव्यापारसाम्यात् विशेषणविशेष्यभावानापन्नानां स्वातन्त्र्यात् लेनाभिधाने ''देवदत्तः काष्ठं पचतः'' इत्यनिष्टं प्रसज्येत। न कदापि ''देवदत्तः काष्ठेन पचति'' इति स्यात्। अतः येन हेतुना (प्रधानाप्रधानभावेन) द्वयोः काष्ठदेवदत्तयोः साम्येनाभिधाना-भावात् देवदत्तः काष्ठेन पचतीति भवति तेनैव हेतुना न प्रयोजकप्रयोज्ययोः तुल्यतयाभिधानमिति। दोषश्चास्मिन् पक्षे दीक्षितप्रदर्शितं षत्वणत्वम्। ण्यन्ते अण्यन्ते वा उभयत्रापि प्रकृत्या सम्बन्धात् षत्वणत्वे प्राप्नुतः। किञ्च भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानाम् इति तृतीयावदुभयत्रापि प्रधानाप्रधानयोः एकशब्दवाच्यत्वाभावाद्[14] विरोधाभावात् षष्ठी भवति इत्युक्तम्। तन्नोपपद्येत। एकशब्दवाच्यत्वात् प्रधाने एवेति परिभाषितत्वात्। अत उभयत्रापि प्रकृत्यर्थप्रत्ययार्थपक्षे दोषदर्शनाद् अदुष्टतरपक्षः ग्राह्यः।

### सक्रियप्रेरणे णिच् निष्क्रियप्रेरणे च लोट्।

णिच्प्रत्ययः हेतुमति विधीयते। हेतुमान् च हेतुकर्तुः व्यापार उच्यते। स च व्यापारः प्रेषणादिः। प्रेषणम्, अध्येषणम्, तत्समर्थाचरणं च खलु उच्यते। प्रेषणं च निकृष्टस्य भृत्यादेः क्वचित् कार्ये नियोजनम्। अध्येषणम्– गुर्वादेः मित्रस्य च क्वचित् कार्ये नियोगः। तत्समर्थाचरणं च खलु तदनुकूलाचरणम्। उदाहरणं च क्रमशः देवदत्तो भृत्येन कटं

कारयति। देवदत्तः पितरं मित्रं वा गुरुकुलं प्रेषयति। भिक्षा वासयन्ति। अधुना विचार्यते यत् सक्रियप्रेरणं किं भवति? स्वतन्त्रस्य कर्तुः प्रयोजको हेतुरुच्यते। तस्यैव स्वतन्त्रस्य कर्तुः प्रेरणे णिच् भवति। स्वतन्त्रः कर्ता च क्रियां कुर्वाण उच्यते। यदा स क्रियां करोति तदा यदि प्रेर्यते तदा णिच् भवति। अत एव विग्रहो लभ्यतेऽस्य– कुर्वन्तं प्रयुङ्क्ते कारयति। पठन्तं प्रयुङ्क्ते पाठयति। यतः स्वतन्त्रः कर्ता प्रयुज्यते अतः सक्रियप्रेरणं कथ्यते। निष्क्रियप्रेरणं च लोटा उच्यते। तत्र च प्रैषे लोट् विधीयते विध्यादौ च। तत्र अकुर्वाणं भृत्यादिकं कार्ये नियोज्यते। कुरु कटमिति। अत्र शङ्का भवेद् यत् गमयतु अत्र लोट् कथं? चेदुच्यते नात्र स्वतन्त्रकर्तुः प्रैषः अपितु प्रयोजककर्तुः प्रैषो वर्त्तते। प्रयोजकः कर्ता बलात् प्रेष्यते भव त्वं प्रयोजक इति। महाभाष्ये च उक्तम्– यत्र च द्वितीयः प्रयोज्यो भवति भवति तत्र लोट् आसय, शायय इति। वाक्यपदीयेऽपि द्रव्य-मात्रस्य प्रैषे लोट् विधीयते। द्रव्यमात्रमिति क्रियारहितं निष्क्रियमिति यावत्। सक्रियस्य यदा प्रैषः क्रियावद् द्रव्यं प्रेष्यते तदा तु णिच्। यदि पुनः प्रैष इष्यते प्रयोजकस्तरे तदा लोट्।

अथ विचार्यते यत् णिच् हेतोः प्रैषे भवति लोट् चापि प्रैषे चेत् कोऽस्ति विवेकः? उच्यते–

**द्रव्यमात्रस्य प्रैषे पृच्छ्यादेर्लोड् विधीयते।**
**सक्रियस्य यदा प्रैषस्तदा स विषयो णिचः॥**[15]

यदा क्रियारहितं=निष्क्रियं द्रव्यं क्वचित् कार्येषु प्रेष्यते नियोज्यते तदा लोट्प्रयोगः। यथा–अकुर्वाणं कटं देवदत्तमाह–कुरु कटम् इति।

यदैव च सक्रियः कश्चन प्रेष्यते क्वचित् कार्ये तदा णिच्–प्रयोगः। यथा–कुर्वाणं कटं प्रयुङ्क्ते–कारयति कटम् इति।

अत्र पूर्वत एव कटं कुर्वाणः प्रयुज्यते, अत्र शङ्का उदियात् यत् यदि पूर्वत एव स कुर्वाणः खलु आस्ते चेत् कथं प्रेरणम्? उच्यते–विरामाशङ्कया मा स्म विरंसीत् इति। कुर्वाण एव भवेत् इति।

**सारांशः**

अस्मिन् शोधपत्रे एष विचारः कृतः 'हेतुमति च' सूत्रे हेतुशब्देन कः हेतुः ग्राह्य? पारिभाषिकः (तत्प्रयोजको हेतुश्च) उत वा लौकिकः (कारणम्, निमित्तमिति)? अनेकविधतर्केण पारिभाषिकः गृहीतः। पुनरत्र हेतुमत् इति कस्मिन्नर्थे मतुप् तस्य विचारः। पुनः णिच्–

प्रत्ययः स्वार्थिकः उत अर्थवान् इति सम्पूर्णः विचारः। पुनः हेतुमति – सूत्रस्य द्विविधार्थ–विचारः। मध्ये–मध्ये कारकाणां प्रवृत्तौ विचारः। प्रयोज्य – प्रयोजक विचारः। एवम् एतेषां विषयाणां विचारः अत्र वर्त्तते।

**निष्कर्षः**

'हेतुमति च' सूत्रे नित्ययोगे मतुप् खलु। हेतुशब्देन च पारिभाषिकः हेतुः गृह्यते, न लौकिकः। अनेन सूत्रेण विधीयमानः णिच् सार्थकः खलु न निरर्थकः। हेतुमति च सूत्रस्यार्थः– हेतुमति अभिधेये धातुमात्रात् णिच्। सक्रियस्य प्रेरणे एव णिच्, न निष्क्रियप्रेरणे। अत एव लोटो णिचो परस्परं बाध्यबाधकभावो न भवति। सर्वेषु कारकेषु प्रधानः कर्त्ता। तदधीनानि च अन्यानि कारकाणि।

*

## सन्दर्भाः


1. अष्टाध्यायी 3.1.26
2. अष्टा. 1.4.55
3. परिभाषाप्रकाशः, पृ. 29
4. परिभाषाप्रकाशः, पृ. 30
5. अष्टा. 3.1.17
6. अष्टा. 1.4.55
7. वाक्यपदीयम् - 3.8.15
8. स्वस्याः- प्रकृतेः अर्थः = स्वार्थः तत्र भवः स्वार्थिकः।
9. लः कर्मणि च भावे चाकर्मकेभ्यः। अष्टा. 3.4.69
10. प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः। परिभाषेन्दुशेखरः 11
11. वाक्यपदीयम् 3.7.101
12. वैराग्यशतकम् - 7
13. शब्द कौ., पृ. 343
14. पदमञ्जरी 2.3.65
15. पदमञ्जरी 3.1.26


*

# पतञ्जलिकृते महाभाष्ये निग्रहस्थानम्

**रिशित देसाई, डॉ. भाग्यश्री बवरे च**

**शोधसारः**

व्याकरण–महाभाष्यम् इति पाणिनिप्रणीतानां सूत्राणां महर्षिपतञ्जलिना रचितं विस्तृतं प्रामाणिकं च भाष्यम्। विशेषतः महाभाष्ये पूर्वपक्ष–सिद्धान्तपक्षयोः समावेशः गुरुशिष्ययोः संवादरूपेण वर्तते। पुनः एकस्य संशयस्य आक्षेपस्य वा अनेकानि समाधानानि दत्तानि। पुनरपि अधिकरणेषु अनेकेषु स्थानेषु भाष्यं क्रमबद्धं नास्ति। अतः सिद्धान्तपक्षस्य अवगमनं कठिनतरम्। महाभाष्यस्य अध्ययनं सामान्यक्रमेण (linear) कर्तुं न शक्यते।

एतस्मिन् प्रबन्धे व्यतिक्रमाणां (non–linear) भाष्याणां चर्चा दृष्टान्तैः सह कृता। पुनः वादशास्त्रेषु निग्रहस्थानविषये द्वौ प्रकारौ प्रधानतया प्रचलितौ। यथा अनुयोज्यस्याननुयोगः अननुयोज्यस्यानुयोगः च। एतयोः सन्दर्भयोः भाष्यस्थितनिग्रहस्थानानां अवलोकनम् एतस्मिन् प्रबन्धे कृतम्। एतादृशी अध्ययनपद्धतिः महाभाष्यस्य प्रबोधनं सरलं समीचीनतरं च करिष्यति।

**कूटशब्दाः –** अष्टाध्यायी, निग्रहस्थानम्, पतञ्जलिः, महाभाष्यम्।

**प्रस्तावना**

पतञ्जलिना रचितं व्याकरणमहाभाष्यम् इति अष्टाध्यायीग्रन्थस्य विस्तृतं भाष्यम्। अस्मिन् ग्रन्थे सूत्राणां सविस्तरं स्पष्टीकरणार्थं कात्यायनमुनेः अन्यवार्त्तिककाराणां च वार्त्तिकेषु भाष्यं कृतम्। व्याकरणं भाषाविज्ञानम् इत्येतेषां ग्रन्थेभ्यः नियमान् स्वीकृत्य तुलनात्मकं व्याख्यानं कृतं पतञ्जलिना। भाष्येषु पूर्वपक्षसिद्धान्तपक्षयोः समावेशः बहुलतया दृश्यते। विशेषतः महाभाष्ये पूर्वपक्षसिद्धान्तपक्षयोः समावेशः गुरुशिष्ययोः संवादरूपेण वर्तते। महाभाष्यस्य विविधेषु संस्करणेषु भाष्यवार्त्तिकयोः द्वैविध्यं द्रष्टुं शक्नुमः।

लक्षणस्य रचनात्मिका सूक्ष्मता तथा च शब्दस्य शुद्धरूपं लक्ष्यम् इति मनसि निधाय सूत्रस्पष्टीकरणं विवृणोति महर्षिः पतञ्जलिः। भाष्यकारेण सिद्धान्ताः आक्षेपस्य

च समाधानं व्याकृतम्। एतस्य स्पष्टीकरणार्थं तार्किकं समर्थनं प्रयुक्तं महर्षिणा। अतः अलब्धगाधगाम्भीर्यः इति[1] महाभाष्यस्य विशेषणम् इति ज्ञायते। सामान्यतया भाष्ये सूत्रस्य विवरणं व्याख्यानेन च आक्षेपस्य समाधानं कृतम्। अन्येषु भाष्यग्रन्थेषु आक्षेपाणां योग्यता-निर्धारणं सीमाङ्कनेन भवति यथा ननु इति चेत् इत्येतेषां प्रयोगेण पूर्वपक्षस्य निर्धारणं सरलं भवति। किन्तु साधारणतया महाभाष्ये एतेषां प्रयोगः नित्यत्वेन न वर्तते तथा च पूर्वपक्षस्य निर्धारणं न सिध्यति। अन्येषु भाष्यग्रन्थेषु सामान्यरूपेण प्रथमतः प्रश्नानाम् आक्षेपाणां च पृच्छा, तदनन्तरम् उत्तराणि इति क्रमेण स्पष्टीकरणं वर्तते। किन्तु महाभाष्ये प्रथमं तु सिद्धान्तस्य विवरणम्, अनन्तरम् आक्षेपाणां विमर्शनम् इत्यपि क्रमेण व्याख्यानं प्रचलति।

महाभाष्यस्य बहवः विद्वांसः समन्वयं कर्तुं प्रयतन्ते। एतेषु निर्णयसागर-संस्करणम् इति जोशी-महोदयेन लिखिता कृतिः प्रारम्भिकप्रयत्नः। एतादृशः प्रयासः कतिपयानाम् आह्निकानां कृते जोशी–रुद्रर्जनाभ्याम् अभवत्। उभे संस्करणे महाभाष्यस्य अध्ययनस्य साहाय्यं कुरुतः। तथा चेदं स्पष्टं भवति – महाभाष्यस्य अध्ययनं सामान्यक्रमेण कर्तुं न शक्यते। अर्थात् भाष्ये स्थितम् अन्तिमविधानं सिद्धान्तः अस्ति इति।

सर्वे अधिकरणाः न सन्ति। बहुधा भाष्ये सिद्धान्तः अग्रे प्रचलति तथा अन्ते अनुचितः पक्षः दर्श्यते। एतस्याः संवादपद्धतेः केचन दृष्टान्ताः यत्र आद्यसंवादस्य प्राधान्यं द्रष्टुं वर्णिताः।

**महाभाष्यस्य व्यतिक्रम–अध्ययनपद्धतिः**

व्याख्यानस्य सामान्या अध्ययनपद्धतिः क्रमेण प्रथमतः प्रश्नं संशयं आक्षेपं वा, अनन्तरं तस्य उत्तरं समाधानं वा अवोचत्। समाधानस्य परिशीलनमपि भवति यदि तत्र कोऽपि दोषः दृश्यते। यदि दोषः अस्वीकृतः तर्हि मूलं समाधानं स्वीकर्तव्यम्। किन्तु महाभाष्ये एतादृशी पद्धतिः नित्यत्वेन न दृश्यते। बहवः दृष्टान्ताः सन्ति यत्र प्रयोजनं समाधानं सिद्धान्तः वा प्रथमः उपस्थापितः अनन्तरं व्यतिक्रमेण तस्य अयोग्या अस्वीकृतिः निन्दा च कृता। कदाचिद् बहूनि उत्तराणि अपि एकस्य प्रश्नस्य वर्तन्ते। अतः क्रमबद्धया पद्धत्या महाभाष्यस्य अध्ययनं कुर्मः तर्हि विषयस्य अवगमनं भवितुं न अर्हति। कानिचन उदाहरणानि अधः सन्ति।

कदाचिद् आद्यसिद्धान्तः तस्य व्यतिक्रमेण अस्वीकृतस्य विधानस्य अयोग्यप्राधान्यं दर्शयति। यथा एरनेकाचोऽसंयोगपूर्वस्य (6.4.82) इति सूत्रस्य भाष्ये गतिकारकपूर्वस्यैवेष्यते (कीलहॉर्न 3.210.1–2) इति इष्टिः आरम्भे एव उक्ता। भाष्यस्य उत्तरभागः वार्तिकद्वयं

च एतां इष्टिं प्रति प्रत्याख्यातपक्षः अनुसरति। नागेशः एतं विशदीकरोति यत् वार्तिकसन्दर्भे तेन प्रत्याख्यातप्रायमेव इति।[2]

कदाचिद् अन्तिमविधानं पक्षाभासः दृश्यते। तेन इष्टसिद्धान्ताः निरस्ताः भवन्ति यथा अचि र ऋतः (7.2.100) इति सूत्रस्य भाष्ये न वा अनवकाशत्वात् रस्य (कीलहार्न 3.308.11) इति सिद्धान्तः अस्ति। तथापि तस्मात्सुष्ठूच्यतेऽचि रादेशे जस्युपसङ्ख्यानं गुणपरत्वादिति (की. 3.308.22) इत्यनेन भाष्ये उपसंहरति। एतस्य प्रतिपक्षस्य टीका नागेशः एकदेश्युक्तिः इति[3] एवमुक्त्वा करोति। पुनः उदोष्ठ्यपूर्वस्य ( 7.1.102) इति सूत्रसन्दर्भे नित्यो गुणः (की. 3.277.8) इति अन्तिमविधानस्य टीका एकदेश्युक्तिः इत्यपि[4] करोति नागेशः।

क्वचिद् भाष्ये सिद्धान्तानाम् अयोग्यं प्रत्याख्यानं कृतम्। अङ्गस्य (6.4.1) इति सूत्रस्य भाष्ये पञ्चतः दशपर्यन्तं षड् वार्तिकानि एतस्य अधिकारसूत्रस्य प्रयोजनं प्रदर्शयन्ति। एतानि प्रयोजनानि निराकृतानि नैतानि सन्ति प्रयोजनानि (की. 3.180.16) इत्युक्त्या। किन्तु एतं पक्षं नागेशः एकदेश्युक्तिः इति[5] उक्त्वा न स्वीकरोति, पाणिनीयाः चापि तस्य खण्डनं कुर्वन्ति।

कुत्रचित् सम्पूर्णवितर्कस्य अस्वीकरणं दृश्यते। अत्वसन्तस्य चाधातोः (6.4.14) इति सूत्रस्य भाष्यान्तर्गतं 19 अन्तिमवाक्यानां एकदेश्युक्तिः इत्येव[6] निर्देशः कृतः।

प्रायः एतेषु उदाहरणेषु अनुचितानां विधानानां निर्देशः एकदेशिना उक्तम्। एतानि उदाहरणानि महाभाष्यस्य अध्ययनपद्धतेः स्पष्टीकरणं कुर्वन्ति। निश्चयेन एतद् अध्ययनं विशिष्टेन क्रमेण कर्तुं न शक्यते।

**निग्रहस्थानम्**

गौतमेन रचितन्यायसूत्रानुसारेण यत्र संवादे विप्रतिपत्तिः अप्रतिपत्तिः वा दृश्यते एतत् निग्रहस्थानम् इति उच्यते। सरलतया निग्रहस्थानम् अर्थात् पराजयस्य आधारः इति वक्तुं शक्यते। न्यायसूत्रे निग्रहस्थानानां अनेकाः प्रकाराः सन्ति। तेषु प्रकारद्वयं अस्माकं विषये महत्त्वपूर्णम् अस्ति। यथा (1) पर्यनुयोज्योपेक्षणम्[8] (2) निरनुयोज्यानुयोगः[9] च।

एषः विचारः चरकसंहिता इत्येतस्यामपि दृश्यते। अत्र निग्रहस्थानस्य लक्षणस्य स्पष्टीकरणसमये (1) अनुयोज्यस्याननुयोगः (2) अननुयोज्यस्यानुयोगः चेति[10] एतयोः निर्देशः अस्ति।

धर्मकीर्तिः वादन्यायः इत्यस्य ग्रन्थस्य रचनाम् अकरोत्। अस्मिन् ग्रन्थे उपर्युक्तविचारः अत्युच्चस्थाने विराजते। धर्मकीर्तिः निग्रहस्थानस्य वर्गीकरणं कृतवान् यथा (1) असाधनाङ्गवचनम् (2) अदोषोद्भावनम् च इति।[11] अस्माकं विषये अदोषोद्भावनम् इति प्रयोज्यम्। अदोषोद्भावनम् इत्युक्ते (1) न दोषम् उद्भावयति इति[12] अर्थात् अनुयोज्यस्याननुयोगः (2) यो न दोषः तस्यापि उद्भावनम् च इति[13] अर्थात् अननुयोज्यस्यानुयोगः इति एतयोः विश्लेषणं वादन्यायग्रन्थे दृश्यते।

एतत् तु निश्चयेन वक्तुं शक्यते यथा निग्रहस्थानस्य कल्पना न केवलं महाभाष्यशास्त्रेषु आसीत् किन्तु तस्मिन् समये अनन्तरकाले चापि एतस्य चिन्तनं मननं च अभवत्। अन्येषु ग्रन्थेषु अपि तस्य परिसङ्ख्यानं प्राप्तं यथा नागार्जुनकृते उपायहृदये इति वसुबन्धुकृते तर्कशास्त्रे इति च।

निग्रहस्थानम् अर्थात् पराजयस्थानम्। पक्षस्य अनौचित्यं अवैधता च एतस्य कारणम्। यतः महाभाष्यस्य अध्ययनपद्धतिः क्रमबद्धा नास्ति अतः पराजयस्य सीमाङ्कनं कथं कर्तव्यम् इत्यपि आवश्यकम् अस्ति। आगामिनि विभागे अननुयोज्यस्यानुयोगः अनुयोज्यस्याननुयोगः च एतयोः निग्रहस्थानयोः दृष्टान्ताः प्रदर्शिताः सन्ति।

**दृष्टान्तावलोकनम्**

**( 1 ) अननुयोज्यस्यानुयोगः-** पूर्वोक्ते द्वितीये खण्डे पञ्च दृष्टान्ताः उल्लेखिताः यत्र भाष्यं न क्रमबद्धम् अस्ति। एते सर्वे अननुयोज्यस्यानुयोगस्य निग्रहस्थानस्य दृष्टान्ताः। एतेषाम् आधारः नागेशस्य टीका अस्ति। एतस्यां टीकायां अयोग्यपक्षविषये एकदेश्युक्तिः इत्युक्ता। अयोग्यपक्षस्य खण्डनमपि टीकायाम् उक्तम्। महाभाष्ये एतादृशाः बहवः दृष्टान्ताः प्रदर्शिताः। अथ केचन अन्याः दृष्टान्ताः।

स्वमोर्नपुंसकात् (7.1.23) इति त्यदादीनामः (7.2.102) इति द्वयोः सूत्रयोः मध्ये विप्रतिषेधस्य प्रसङ्गः अस्ति। परत्वान्नित्यत्वं बलवत्तरम् इति परिभाषया स्वमोर्नपुंसकात् इति सूत्रे लुक् नित्यत्वेन प्राप्नोति। भाष्ये नित्यो लुक् (की. 3.248.25) इत्येषः सिद्धान्तः निर्दिष्टः। सिद्धे विधौ भाष्ये तस्मात् त्यदादिभ्यश्चेति वक्तव्यम् (की. 3.249.1) इत्युक्त्वा अननुयोज्यस्यानुयोगस्य उदाहरणं दर्शितम्।

युष्मदस्मद्भ्यां ङसोऽश् (7.1.27) इत्यस्मिन् सूत्रे अश् आदेशस्य शित्करणं सर्वादेशार्थम् (की. 3.250.20) इति। भाष्ये एतत् प्रयोजनं व्याख्यातम्। तस्य औचित्यमपि भाष्ये निरूपितम्। तथापि भाष्ये शित्करणम् अनावश्यकम् उक्त्वा आदेशे प्रश्लिष्टनिर्देशोऽयं अ अ अ इति (की. 3.251.15–16) इत्यस्य अयोग्यपक्षः स्थापितः। पुनः

उचितसिद्धान्तस्य वृथा प्रत्याख्यानं करोति। इहापि अननुयोज्यस्यानुयोगस्य उदाहरणं दर्शितम्।

अच उपसर्गात्तः (7.4.47) इति सूत्रस्य भाष्ये स्थानिविषये चर्चा वर्तते। द्वितकारको निर्देशः (की. 3.351.15) इत्यनेन आक्षेपस्य समाधानम्। अच इति वर्तते (की. 3.351.17) इत्यनेन अचः पदस्य अनुवर्तनमपि स्पष्टीकरोति। काशिकावृत्तौ अपि एतौ सिद्धान्तौ उक्तौ।[14] किन्तु भाष्यान्ते त्रितकारको निर्देशः करिष्यते (की. 3.351.17–18) इत्यनेन विसंगतपक्षस्य अनुचितः निर्देशः वर्तते। एषः अपि अननुयोज्यस्यानुयोगस्य दृष्टान्तः एव।

**( 2 ) अनुयोज्यस्याननुयोगः-** अनुयोज्यस्याननुयोगस्य चत्वारः दृष्टान्ताः अधः दर्श्यन्ते।

शास इदङ्हलोः (6.4.34) इति सूत्रस्य भाष्ये आर्यशीः मित्रशीः इति एतयोः शब्दयोः रूपसिद्धिप्रक्रियाविषये चर्चा वर्तते। पुनश्च आशास्ते आशास्यमानः एतयोः शब्दयोः कृते सूत्रं न प्रयुक्तं इत्यपि व्याख्यानं वर्तते। आर्यशीः मित्रशीः इति प्रत्ययलक्षणम् आश्रित्य एतयोः रूपे क्विबन्ते स्तः। किन्तु अग्रे भाष्ये (की. 3.195.22–23) योगविभागस्य पक्षः उक्तः। पाणिनीयाः तु योगविभागं न स्वीकुर्वन्ति। यतः भाष्यस्य आरम्भे एव शासु अनुशिष्टौ इत्येतस्य ग्रहणं सूत्रे अस्ति इत्यपि स्पष्टम्। अतः योगविभागस्य ग्रहणम् अनुचितम् एव तथापि भाष्ये (की. 3.195.20) एतस्य पक्षस्य न उपालम्भः। एषः अनुयोज्यस्याननुयोगस्य उदाहरणम्।

निष्ठायां सेटि (6.4.52) इति सूत्रस्य भाष्ये सेटि इति पदस्य प्रयोजनविषये व्याख्यानम् अस्ति। तथापि णेरध्ययने वृत्तम् (7.2.26) इति सूत्रस्य योगविभागेन अन्यपक्षः भाष्यान्ते (की. 3.203.1–6) प्रदर्शितः। एतस्य पक्षस्य विषये नागेशः एकदेश्युक्तिः इति[15] उक्तवान्। एषः अपि अनुयोज्यस्याननुयोगस्य दृष्टान्तः।

ऊदुपधाया गोहः (6.4.89) इत्यत्रापि गोहः इति पदस्य प्रयोजनविषये भाष्ये (की. 3.212.16–19) व्याख्यानम् अस्ति। किन्तु प्रश्लिष्टनिर्देशात्सिद्धम् प्रश्लिष्टनिर्देशोऽयम् उ ऊत् ऊदिति (की. 3.211.3–4) इत्यनेन प्रयोजनस्य अनावश्यकता दर्शिता। एषः पक्षः निन्दनीयः अयोग्यः चैव। अनुयोज्यस्याननुयोगस्य एतद् अन्यम् उदाहरणम्।

विदेः शतुर्वसुः (7.1.36) इत्यस्य सूत्रस्य भाष्ये वसु क्वसु वा एतयोः प्रत्यययोः ग्रहणं व्याख्यातम्। एषः पक्षः बहुषु ग्रन्थेषु अपि प्राप्तः। यथा काशिकावृत्तौ[16] प्रदीपे[17]

उद्द्योते[18] न्यासे[19] च। प्रतिपक्षे आक्षेपस्य अयोग्याश्रयः एषः, परिभाषा– अननुबन्धकग्रहणे हि सानुबन्धकस्य ग्रहणम् इति। अतः भाष्यस्य उत्तरभागे (की. 3.258.8–9) एतयोः प्रत्यययोः अग्रहणम् इत्युक्तम्। प्रतिपक्षे सूत्रे द्विसकारको निर्देशः (की. 3.258.12–13) इत्यस्य अयोग्यस्थापनं करोति। एषः पक्षः अनावश्यकः। भाष्ये एतदपि अनुयोज्यस्याननुयोगस्य उदाहरणम्।

**उपसंहारः**

महाभाष्यस्य प्रणयनं संवादात्मकम् अस्ति। अतः विषयस्य अवगमनार्थं प्रकाशनम् आवश्यकम् एव। पक्षस्य द्वन्द्वात्मकताविषये वादशास्त्रेषु न्यायशास्त्रेषु च निग्रहस्थानम् इत्यनेन पराजितपक्षस्य निदर्शनं कृतम्। यथा चरकसंहिता न्यायसूत्रं वादन्यायः च। एतेषु ग्रन्थेषु निग्रहस्थानस्य द्वौ प्रकारौ प्रधानतया स्वीकृतौ स्तः। एतौ अननुयोज्यस्यानुयोगः अनुयोज्यस्याननुयोगः च।

भाष्ये न केवलं दृष्टान्तरूपेण निग्रहस्थानं दर्शितं किन्तु एतस्य प्रकारद्वयम् अपि प्रदत्तम्। एतयोः बहूनि उदाहरणानि प्रागुक्तानि। यतः भाष्यं क्रमबद्धं नास्ति तत्र अनुयोज्यपक्षस्य अनुयोगः कदाचिद् न उक्तम्। भाष्यान्ते वा योग्यपक्षः कदाचिद् नास्ति। एतेषु अधिकरणेषु निग्रहस्थानम् इत्यस्य कल्पना तस्याः च निर्णयपूर्वकं प्रतिपादनं करणीयम्। निग्रहस्थानस्य अभिज्ञानेन न केवलं महाभाष्यस्य अपितु सूत्रस्य प्रबोधनं समीचीनतरं भविष्यति।

*

## सन्दर्भाः

1. अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात्। तस्मिन्नकृतबुद्धीनां नैवावास्थित निश्चयः।। – वाक्यपदीयम् 2.486
2. तेन स्वरपूर्वग्रहणं प्रत्याख्यातप्रायमेव। – उद्द्योतः।
3. एवञ्च बाध्यविशेषचिन्ताश्रयणेऽत्रापि तथैव दोषस्तस्माज्जस्युपसंख्यानं कर्तव्यमिति चोद्यान्तमेवेदमेकदेश्युक्तिरूपं भाष्यम्। – उद्द्योतः।
4. तथा चात्रत्यविप्रतिषेधखण्डनमेकदेशिन इति भावः। – उद्द्योतः।
5. नैतानीत्यादिग्रन्थ एकदेश्युक्तिरिति तात्पर्यम्। – उद्द्योतः।
6. न सिध्यति इत्यादिः तस्मादुपसंख्यानं कर्तव्यम् इत्यन्ता एकदेशियुक्तीति तदाशयः।

7. विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्। न्यायसूत्रम् 1.2.19

8. निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम्। न्यायसूत्रम् 5.2.22

9. अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः। न्यायसूत्रम् 5.2.23

10. अथ निग्रहस्थानम् – यद्वा अननुयोज्यस्यानुयोगोऽनुयोज्यस्य चाननुयोगः। – विमानस्थानम्, चरकसंहिता।

11. असाधनाङ्गवचनमदोषोद्भावनं द्वयोः। निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते। -वादन्यायः

12. वादिनः साधने प्रत्युक्तेऽभ्युपगतोत्तरपक्षो यत्र विषये प्रतिवादी यदा न दोषमुद्भावयति, तदा पराजितो वक्तव्यः। - वादन्यायः।

13. यो न दोषः साधनस्य तद्भावेऽपि वादिना तदसाधयितुम् (तदा साधयितुम्?) इष्टस्यार्थस्य सिद्धेर्विघाताभावात् तस्योद्भावनं प्रतिवादिनो निग्रहाधिकरणं मिथ्योत्तराभिधानात्। – वादन्यायः।

14. द्वितकारो वा संयोगोऽयमादिश्यते सोऽनेकाल्त्वात्। सर्वस्य भविष्यति। अपो भि इत्यत्र पञ्चम्यन्तम् अचः इत्यनुवर्त्तते तेन पकारमात्रस्य भविष्यति। - काशिकावृत्तिः।

15. वस्तुतः एवं तर्हि नार्थः सेग्रहणेन इति भाष्यस्यै... तदुत्तरं भाष्यं त्वेकदेश्युक्तिरिति बोध्यम्। - उद्द्योतः।

16. स्थानिवद्भावादुगित्कार्ये सिद्धे वसोरुकारकरणं वसोः सम्प्रसारणम् इत्यत्र क्वसोरपि सामान्यग्रहणार्थम्। एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य इत्येतदपि न भवति तथा सत्युकारकरणमनर्थकं स्यात्। – काशिकावृत्तिः।

17. स्थानिभावादुगित्कार्यस्य सिद्धत्वादुकार उच्चारणार्थो नानुबन्ध इति मन्यते। सत्यपि वाऽस्य सानुबन्धकत्वे तदनुबन्धकग्रहणपरिभाषया क्वसोरग्रहणप्रसङ्गः। परिभाषोपादानं त्वग्रहणोपलक्षणम्। - प्रदीपः।

18. उपलक्षणमित्यस्य तथा भाष्यं व्याख्येयमित्यर्थः। – उद्द्योतः।

19. तस्मादुकारकरणसामर्थ्यादियं परिभाषा नोपतिष्ठते। – न्यासः।

*

## किञ्चिद् रामायणीयम्

### अयोध्याकाण्डम्, सर्गः 100

चित्रकूटे श्रीरामम् अयोध्यां प्रतिनेतुं भरतो मिमेल। तदा श्रीरामः भरतं कुशलक्षेमं पप्रच्छ। तस्य कुशलप्रश्नेषु '**कच्चित्**' इत्यव्ययेन प्रारब्धाः प्रश्नाः इत्थम् आसन् –

''**कच्चित्**''

1. आत्मसमाः श्रुतवन्तो जितेन्द्रियाः शूराः (चिताः)?
2. तात! कुलीनाः इङ्गितज्ञाश्च ते मन्त्रिणः कृताः? हि हे राघव! राज्ञां शास्त्रकोविदैः मन्त्रिधुरैः अमात्यैः सुसंवृतो मन्त्रो हि विजयमूलं (भवति)।
3. त्वं निद्रावशं न एषि?
4. त्वं काले अवबुध्यसे?
5. त्वम् अपररात्रेषु अर्थनैपुण्यं चिन्तयसि?
6. त्वम् एकः न मन्त्रयसे?
7. त्वं न बहुभिः सह (अपेक्षानुसारं मन्त्रयसे?)
8. ते मन्त्रितो मन्त्रः राष्ट्रं न परिधावति?
9. त्वं लघुमूलं महोदयम् अर्थं विनिश्चित्य क्षिप्रं न आरभसे? त्वं न दीर्घयसि?
10. कृतरूपाणि सुकृतान्येव पुनः कर्तव्यानि सर्वकार्याणि पार्थिवाः न विदुः?
11. तर्कैः युक्त्या वा ये चापि न अपरिकीर्तिताः त्वया तव अमात्यैः वा मन्त्रितं बुध्यते?
12. त्वं मूर्खाणां सहस्रान् एकं पण्डितम् इच्छसि, हि पण्डितः कृच्छ्रेषु महत् निःश्रेयसं कुर्यात्। मूर्खाणां सहस्राणि अपि यदि महीपतिः उपास्ते अथवा अयुतान्यपि, तेषु सहायता नास्ति।
13. एकोऽपि मेधावी शूरः दक्षः विचक्षणः अमात्यः राजानं राजपुत्रं वा महतीं श्रियं प्रापयेत्।

*

# भाष्यचतुष्टयानुरोधेन सन्ध्याधिकरणसमीक्षणम्

**बुद्धदेव दासः**
**डॉ. शान्तनु अयाचितश्च**

(कुञ्चिकाशब्दाः – ब्रह्मसूत्रम्, सन्ध्याधिकरणम्, शाङ्करभाष्यम्, बलदेवभाष्यम्, निम्बार्कभाष्यम्, रामानुजभाष्यम्)

### 1. सन्ध्ये सृष्टिराह हि[1]

श्रीबलदेवाचार्यः तृतीयाध्यायस्य द्वितीयपादस्य अवतरणिकायां वदति यत्, अत्र प्राप्यरूपस्य ब्रह्मणः अनुरागहेतुभूतायाः भक्तेः निरूपणम् अस्तीति। ब्रह्मणि भक्त्यर्हत्वमुपपादयितुं तस्य स्वप्नकर्तृत्वसर्वदातृत्वपरानन्दत्वभक्त्येकग्राह्यत्वादिगुणनिचयो निरूप्यते। भक्तीच्छुर्जीवो भगवतः तादृशगुणसमूहप्रतीतेः एव भक्त्यां प्रवर्तते नान्यथा। इदानीं प्रथमतो भगवतः स्वप्नादिकर्तृत्वं कथ्यते। ब्रह्मभिन्नः कश्चिद् यदि स्वप्नादिसृष्टिकर्ता भवेत्तदा ब्रह्मणः सर्वकर्तृत्वबाधः। यदि च भगवान् यत्किञ्चित्कर्ता भवेत्तथापि भक्तिरसम्भवा। अतः स्वप्नादिकर्तृत्वेन तस्य ब्रह्मणो महिमा प्रदर्शितः। बृहदारण्यकोपनिषदि प्रोक्तं यत्, 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान्पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्त्यथानन्दान्मुदः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्तान्पुष्करिणीः स्रवन्तीः सृजते स हि कर्ता'[2] इति। इदानीं सा स्वाप्नसृष्टिः जीवकृता अथवा ईश्वरकृता इति सन्देहः।

तत्र जीवस्य सत्यसङ्कल्पत्वश्रुतेः स्वप्नसृष्टिः जीवकर्तृका इति प्राप्तम्। तन्निराकरणार्थं सूत्रमिदं पठितम्। सन्ध्यम् इत्यस्य स्वप्नस्थानम् इत्यर्थः। जागरसुषुप्त्योः मध्यवर्तिस्थानं स्वप्नः इत्युच्यते। अस्मिन् स्वप्नस्थाने रथादिसृष्टिः ईश्वरकृता, यतो हि वेदे तस्यैव कर्तृत्वम् उक्तम्। अर्थाद् अल्पकर्मानुसारिफलभोगाय परमात्मा स्वप्नद्रष्टृपुरुषमात्रद्रष्टव्यानाम् अत्यल्पक्षणस्थितरथादीनां सृष्टिं करोति। सत्यसङ्कल्पस्य अचिन्त्यशक्तेः ईश्वरस्य कृते तादृशं कर्तृत्वं नासम्भवम्। किन्तु जीवस्य सत्यसङ्कल्पता मोक्षावस्थायामेव भवतीत्यतः जीवेन स्वप्नसृष्टिर्न सम्भवा।

निम्बार्काचार्यैः प्रकृतसूत्रस्य व्याख्यां कुर्वद्भिः प्रोक्तं यत्, स्वप्नसृष्टिकर्ता जीवः ईश्वरो वेति सन्देहे सति, स्वप्नद्रष्टा जीव एव स्वप्नस्रष्टा इति श्रुतेः प्राप्तम् इति पूर्वपक्षमतं प्रकृतसूत्रेण वर्णितम्।

अत्र श्रीरामानुजमतमपि अविशिष्टं, सन्ध्यसृष्टिः स्वप्नदृशो जीवस्यैवेति। यतो हि सन्ध्यं नाम स्वप्नस्थानं यद् जीवेनैव क्रियते। इत्येवं पूर्वपक्षमतम् उन्नीतम्।

शङ्करभगवत्पादाः सन्ध्यशब्दं व्युत्पादयन्तः प्रोक्तवन्तो यत्, द्वयोः लोकस्थानयोः प्रबोधसम्प्रसादस्थानयोः वा सन्धौ भवति इति सन्ध्यमिति। सन्ध्यं तृतीयं स्वप्नस्थानम् इति श्रुतेः सन्ध्यं स्वप्नस्थानम्। तत्र सन्ध्यस्थाने सृष्टिः तथ्यरूपा एव भवितुम् अर्हति यतो हि प्रमाणभूता श्रुतिः प्रतिपादयति यत् यः एव जीवः स्वप्नद्रष्टा सृजति स एव कर्तेति। साक्षाद् इन्द्रियगोचरं यद् अस्ति तत्सर्वं जाग्रद्विषयाः भवन्ति। स्वप्ने ते एव स्मरणात्मकाः स्वप्नविषयाः। स्मरणविषयाः स्वप्नविषयाः वा तथ्यरूपाः उतातथ्यरूपाः इति विचार्यते। श्रुतौ यथा आत्मनः आकाशादीनां सृष्टिः उक्ता तथा स्वप्ने रथादीनां सृष्टिः उक्ता। अतः उभयत्र सृष्टिः तथ्यरूपा स्यात् श्रुत्यनुसारम्। तथाहि स्वप्नसृष्टेः श्रुतिप्रामाण्यं 'अथ रथान् रथयोगान्पथः सृजते'[3] इति। अत्र साक्षात् सृजते इति उक्तं न तु कल्प्यते इति। तथा च जीवब्रह्मणोः ऐक्यात् तयोः सृष्टिरपि समानरूपा स्यात्। अतः जाग्रत्सृष्टेः तथ्यरूपत्वात् स्वप्नसृष्टिः तथ्यरूपा स्यात्। अपि च अनुभवात् सिद्धं भवति। सर्वैः हि गजं पश्यामि इत्येवम् अनुभवन्ति न तु स्मरामि इत्येवम्। कठोपनिषदि 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः'[4] इति वाक्यं स्वप्नद्रष्टारं निर्मातृत्वेन प्रतिपादयति। अतः निर्मातुः तथ्यरूपत्वात् सृष्टवस्तुनः तथ्यरूपता स्यात् कुलालघटवत्। किन्तु सत्यरूपत्वेऽपि न ब्रह्मसदृशी सृष्टिः भवेत्, तद्रूपसमानत्वात् द्वैततापत्तेः। अद्वैतशास्त्रे एकं हि वस्तु ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावम्। तस्मात् परमार्थरूपा सृष्टिः न जाग्रति नापि स्वप्ने भवितुमर्हति। जाग्रत्सृष्टिः आपेक्षिकसत्यरूपा भवति यावद्ब्रह्मज्ञानस्थितेः। स्वप्नसृष्टिस्तु प्रतिदिनं बाध्यते। तस्मात् जाग्रदपेक्षयापि न्यूनसत्ताकत्वं स्वप्नस्य निश्चीयते। एकस्याम् अवस्थायां स्थित्वा कदाचिद् अन्यावस्था स्मर्यते। यथा जाग्रति स्वप्नावस्था अथवा स्वप्ने जाग्रदवस्था। जाग्रति स्वप्नविषयाः स्वेच्छया स्मर्यन्ते कदाचिद्वा उद्बोधकं प्राप्य स्मृताः स्युः। स्वप्ने च स्वतः स्मर्यन्ते इति चेन्न, स्वप्नेऽपि कारणं भवति। जाग्रत्काले याः वासनाः भवन्ति ताः कारणभूताः भवन्ति। अपि च पूर्वसंस्काराः कारणानि भवन्ति। अलौकिकस्वप्नदर्शने च संस्कारमिश्रणं कारणं भवति। तस्मादेव अदृष्टमपि वस्तु स्वप्ने दृश्यते। अत्र स्मरणशब्देन जाग्रत् स्मरणं गृह्यते। जाग्रति ये विषयाः अनुभूयन्ते ते

जाग्रत्येव स्मर्यन्ते चेत् स्मृतिः उच्यते, निद्रायां तु स्वप्नः उच्यते। उभयत्र स्मरणसामान्यत्वेऽपि स्वप्नेऽभिमानाभावत्वं भिन्नम्। स्वप्ने पश्यामीत्यनुभवः।

**समीक्षणम्**

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च सन्ध्यं तृतीयं स्वप्नस्थानं तस्मिन्सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थानं च। (बृहदारण्यकोपनिषत्)

सर्वमतपर्यालोचनं समीक्षणम् उच्यते। अत्र तावच्चतुर्णाम् अपि भाष्याणां पर्यालोचनेन सन्ध्य इत्यादिसूत्रे भिन्नं भिन्नं मतं प्राप्तम्। यद्यपि सर्वैः अपि आचार्यैः सन्ध्यशब्दस्य स्वप्नार्थः, सृष्टिशब्दस्य स्वप्नस्थितरथादिसृष्ट्यर्थः, आह इत्यस्य श्रुत्युक्तार्थश्च स्वीकृतः। तथापि मतभिन्नता अस्ति। अनुभवेन वक्तुं नैव शक्यते कः स्वप्ने स्रष्टेति। अनुमातुं शक्यते यत्, पूर्वानुभूतविषयाः वासनाविषयाः वा स्वप्ने भासन्ते इति। द्रष्टा तु जीवो भवतीत्यत्रानुभवः अस्ति। तथाहि प्रोक्तं बलदेवविद्याभूषणैः स्वप्नद्रष्टृपुंमात्रानुभाव्यान्... इति। अर्थात् स्वप्नद्रष्टृभिन्नपुरुषाननुभाव्याः रथादयः विषयाः। अतः जीवः स्वप्नद्रष्टा इत्यत्र न कस्यापि विमतमस्ति। प्रकृतसूत्रं बलदेवाचार्यैः सिद्धान्तपरकतया व्याख्यातम्। अतः अत्रैव जीवस्य स्वप्नस्रष्टृत्वं निराकृत्य परमात्मनः स्वप्नस्रष्टृत्वं प्रतिपादितम्। शङ्कररामानुजनिम्बार्काचार्यास्तु सूत्रमिदं पूर्वपक्षरूपेण व्याख्यातवन्तः। तथापि एतेषां पूर्वपक्षोपस्थापने ईषत्पार्थक्यम् अस्ति। रामानुजनिम्बार्काचार्यौ स्वप्नसृष्टेः जीवकर्तृत्वं पूर्वपक्षविषयत्वेन स्वीचक्रतुश्चेदपि शङ्कराचार्यः स्वप्नसृष्टेः तथ्यरूपतां पूर्वपक्षीचकार।

**2. निर्मातारं चैके पुत्रादयश्च**[5]

अचिन्त्यभेदाभेदसिद्धान्तपक्षसुबद्धाय प्रकृतसूत्रस्य व्याख्या सम्पादिता। प्रकृतसूत्रार्थम् एवं वर्णयति बलदेवाचार्यः, कठोपनिषदि परमात्मा एव स्वाप्नकामानां पुत्रादीनां च निर्माता उच्यते इति। यदा जीवाः निद्रिताः भवन्ति तदा परमात्मा एव जागर्ति। अपि च जीवानां कामनानुसारं पुत्रादिकामान् निर्माति। 'सर्वान्कामांश्छन्दतः प्रार्थयस्व'[6] इत्यादिश्रुतिवाक्ये कामशब्देन पुत्रपौत्रादयः एव बोध्यन्ते। तस्मादेव कामात् पुत्रो जायते। एवं भ्राता, भार्या, माता, पिता च जायन्ते। अर्थात् स्वप्ने यः पुरुषः सुप्तजीवेषु स्वेच्छया काम्यान् पदार्थान् उत्पाद्य स्वयं च जागर्ति स एव ज्ञानिभिः शोकरहितं ब्रह्म अपि च अनश्वरम् इति स्तूयते। एवं श्रुत्याम् ईश्वरः स्वप्नदृष्टपदार्थानां पुत्रादीनां च निर्मातृरूपेण श्रूयते।

निम्बार्काचार्यस्तु पूर्वपक्षमेव योजयति यत्, इन्द्रियेषु सुप्तेषु अपि जीवः एव पुत्रादिरूपाणां कामानां कर्तेति एके शाखिनः आमनन्तीति।

रामानुजभाष्येऽपि प्रकृतसूत्रे स्वाप्नसृष्टेः जीवकर्तृत्वप्रतिपादकाः एके शाखिनः इति पूर्वपक्षसङ्ग्रहः कृतः।

शाङ्करभाष्ये तु स्वाप्नसृष्टेः तथ्यरूपता पूर्वपक्षीकृता, सूत्रव्याख्यानेन च पुनः समर्थिता। पुत्रादीनां काम्यत्वात् कामशब्देन तेषामेव उल्लेखः 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः'[7] इत्यादिश्रुतौ। इदं च श्रुतिप्रकरणं प्राज्ञविषयकम् अस्ति। अतः प्राज्ञः एव स्वाप्नसृष्टिकर्ता। प्राज्ञस्य सृष्टिः तथ्यरूपा एव भवेद् जागरिताश्रयसृष्टिः इव। एवं पूर्वपक्षमते युक्त्याभासः प्रदर्शितः। जीवेश्वरयोरभेदे अपि यथा भेदः अनुभूयते, तथा एकस्य ब्रह्मणः सत्त्वादपि अवस्थाभेदः अनुभूयते। अत्रोभयत्रान्यत्र च सर्वत्र मायाकृतोपाधयः एव कारणभूताः। तेन जीवस्याल्पज्ञत्वं तथेश्वरस्य सर्वज्ञत्वं सम्भवतः। तस्मात् सृष्टावपि भेदस्तयोः। किन्तु तथापि वियदादीनां न पारमार्थिकसत्यत्वं ब्रह्मवत्। उभयोः जाग्रत्स्वप्नयोः मायामात्रत्वात् मिथ्यात्वमेव। तथा च जीवेश्वरयोः भेदे सिद्धे बन्धमोक्षव्यवस्थापि सम्भवति। देहयोगाद्वा जीवः ईश्वरात् भिद्यते। ईश्वरस्य शरीरं न भवति। मायाकृतमेव शरीरं भवति। तस्मात् जीवस्य ऐश्वर्यादिधर्माः न प्रकाशन्ते। मायाकृतं यथा जीवस्य शरीरं तथा सम्पूर्णा सृष्टिः मायाकल्पिता। शरीरं नाम मनोबुद्धीन्द्रियसमूहः। चैतन्यस्यानेन सम्बन्धत्वमेव जीवत्वम्। अतः यस्मात् शरीरत्वाशरीरत्वात् जीवेश्वरयोः अल्पज्ञत्वसर्वज्ञत्व-विषयकभेदः तस्मात् सृष्टिभेदोऽपि।

**समीक्षणम्**

पूर्वापरक्रमप्राप्ते प्रकृते सूत्रे पूर्वसूत्रव्याख्यानमिव अस्यापि व्याख्याने सादृश्यवैसादृश्ये भवतः। परमात्मा एव स्वाप्नसृष्टेः निर्माता इति शाखिनो वदन्तीति सिद्धान्तीकृतं बलदेवाचार्यैः। अन्ये च शङ्कररामानुजनिम्बार्काचार्याः सूत्रव्याख्याने पूर्वपक्षम् उपस्थापयन्ति। शङ्कराचार्यः 'य एष सुप्तेषु' इत्यादिश्रुत्यर्थे स्वाप्नसृष्टेः परमात्मकर्तृकत्वं प्रतिपाद्य तस्या एव तथ्यरूपतां पूर्वपक्षीचकार। रामानुजनिम्बार्कौ तु स्वाप्नसृष्टेः जीवकर्तृत्वं पूर्वपक्षत्वेन स्वीचक्रतुः।

**3. मायामात्रं तु कात्स्र्न्येनानभिव्यक्तस्वरूपत्वात्[8]**

अथ अस्मिन् सूत्रे बलदेवाचार्यः प्रस्तौति, स्वाप्निकपदार्थसमूहस्य निर्मातुर्भगवतः करणम् उपकरणं वा किमिति। केवलं मायैव उपकरणं भवितुं योग्या। यतो हि हरिशक्तिः माया एव दुर्घटनापटीयसी। एवम् अनियमितदेशकालादयः सम्भवन्ति। सर्वानुभाव्यतयेति प्रोक्तम्। अर्थात् प्रजापत्यादिकृतं कार्यं सर्वैः जीवैः अनुभूयते न तु मायामात्रकृतं कार्यम्। यतो हि स्वप्नद्रष्टा जीवः एव रथादीनां द्रष्टा भवति नान्यः, यथा शुक्तिरजतभ्रमस्थले भ्रान्तः एकः एव शुक्तौ रजतं पश्यति नान्यः, तस्मात् सर्वानुभाव्यतया अनभिव्यक्तस्वरूपत्वात्

स्वाप्नसृष्टेः मायामात्रोपकरणत्वम्। स्वाप्नदेशकालरथादीनां पदार्थानाम् अनुपपत्तिरेव कात्स्र्न्यानभिव्यक्तस्वरूपत्वम्। कात्स्र्न्यानभिव्यक्तस्वरूपत्वहेतोः मायामात्रम् उपकरणम् अस्ति। अत्र मात्रच्–प्रत्ययस्य अवधारणार्थत्वे पञ्चीकृतभूतानां चतुर्मुखादीनाञ्च करणत्वनिराकरणं सिद्धम्। मायोपकरणत्वात् परमात्मकर्तृका स्वाप्नसृष्टिरित्यपि सिद्धम्।

निम्बार्कभाष्यानुसारं मायाशब्दस्य आश्चर्यमिति अर्थः उक्तः। यतो हि मायया असम्भवम् अपि सम्भाव्यते तस्मान्मायाशब्दस्य आश्चर्यमित्यर्थः युक्तः। स्वाप्नजगद् मायामात्रम् अस्ति। अर्थात् किञ्चिदंशः सत्यभूतः किञ्चिदंशश्च मिथ्याभूतः। एवं सत्यमिथ्योभयसमन्वितं जगज्जीवः निर्मातुं न शक्नोति, अपि च सत्यसङ्कल्पत्वादीनां धर्माणां कात्स्र्न्येनाभिव्यक्त-स्वरूपत्वं जीवस्य न सम्भवति। तस्माद् अवश्यं सर्वज्ञः सत्यसङ्कल्पः परमेश्वरः एव स्वप्ने रथादीनां निर्माता। एवं निम्बार्कभाष्यानुसारम् अस्मिन् सूत्रव्याख्याने सिद्धान्तः उपस्थापितः।

रामानुजाचार्योऽपि मायाशब्दस्य आश्चर्यम् इत्यर्थं प्रतिपादयति। वाल्मीकिरामायणात् श्लोकांशम् उद्धृतवान् जनकस्य कुले जाता देवमायेव निर्माता इत्यादिम्। तादृशमेव स्वाप्नजगद् आश्चर्यमात्रम् अस्ति। स्वाप्नकाले ये रथादयः दृश्यन्ते ते जागरे न सम्भवन्ति इत्येतदेव मायामयत्वम्। असम्भवस्य सम्भवः एव आश्चर्यम्। तदेव मायाशब्देन प्रोक्तम्। अत्र प्राप्तं यत्, निम्बार्करामानुजयोः मायामतं प्रायेण समानम्।

शाङ्करभाष्यम् अवलोक्य बुध्यते यत्, सिद्धान्ते मायामात्रत्वं स्वाप्नसृष्टेः प्रतिपादितम् इति। सूत्रस्थ–तुशब्देनात्र पूर्वपक्षः निराक्रियते। पारमार्थिकी सृष्टिः नास्ति। अतः परमेश्वरः सृष्टिकर्ता इत्यपि नास्ति। परमार्थवस्तुविषयाणि देशकालादिनिमित्तानि न सम्भवन्ति स्वप्ने, अतः कात्स्र्न्येनानभिव्यक्तस्वरूपः स्वप्नः। न ह्युचितो देशः कालः वा रथादीनां सम्भवति। न च रथादयः अवकाशं लभन्ते। यदि बहिर्देहाद् रथादयः स्युः तर्हि देशकालादीनां सम्भावना स्यात्। या तु 'बहिष्कुलायादमृतश्चरित्वा। स ईयतेऽमृतो यत्र कामम्।'[१] इति श्रुतिः सा गौणी व्याख्येया। यतो हि 'स्वे शरीरे यथाकामं परिवर्तते' इति श्रुतिः स्वप्नस्य शरीरवर्तित्वं प्रतिपादयति। न हि सुप्तस्य क्षणमात्रेण बहुदूरं गन्तुम् आगन्तुञ्च सामर्थ्यं सम्भवति। क्वचिच्च प्रत्यागमनं विहायैव स्वप्नभङ्गः श्रूयते। पाञ्चालदेशे सुप्तः कश्चित् बङ्गदेशं गत्वा पुनः क्षणाभ्यन्तरे पाञ्चाले स्वदेहे उत्तिष्ठति। किन्तु कथं पाञ्चालदेशे सुप्तः बङ्गदेशं गतः स्वप्ने पुनः पाञ्चालदेशम् अप्राप्यैव स्वप्नभङ्गे सत्यपि पाञ्चालदेशे स्वशरीरेण उत्तिष्ठति। एतेषां देशकालादिनिमित्तानां विषयाणां सामञ्जस्यं न सम्भवतीत्यतः स्वप्नस्य कार्यानभिव्यक्तस्वरूपत्वम्। तस्माद् एव मायामात्रत्वम् अपि। यन्न सम्भवं तत्सम्भावयति

माया। तस्मान्मायाकृतं सर्वमपि मिथ्याभूतम्। तत्र भगवच्छङ्कराचार्यः तुशब्दस्य तथ्यरूपार्थनिराकरणार्थत्वम् उक्त्वा कात्स्न्यर्शब्दार्थं निरुपितवान् 'देशकालनिमित्तसम्पत्तिः अबाधश्च'[10] इति। देशसम्पत्तिः कालसम्पत्तिः निमित्तसम्पत्तिः अबाधश्चेत्येते स्वप्ने न सम्भवन्ति। अतः एतैः अनभिव्यक्तस्वरूपत्वं स्वप्नस्य। स्वप्ने देशः सूक्ष्मशरीरे तथा चान्तःकरणे अनुभूयते। किन्तु वस्तुतः प्रसिद्धतया देशः बहिरेव विद्यते उज्जयिन्यादिः। स्वप्ने कश्चिद् देशं गत्वा स्वप्नोत्तरकाले स्वगृहे एव तिष्ठति। अपि च यश्च देशः यादृशः नास्ति, सः तादृशः दृश्यते। तस्मात् देशासम्पत्तिः। कालस्यापि स्वप्ने असम्पत्तिः लक्ष्यते। क्षणमात्रं स्वप्नं दृष्ट्वापि युगानि यापितानि भवन्ति। किन्तु स्वप्नोत्थिते सति स एव सायङ्कालः स एव प्रातःकालः भवति। निमित्तानि अपि अनुचितानि भवन्ति। चक्षुरिन्द्रियमन्तरेणापि रूपप्रत्यक्षं स्वप्ने सम्भवति। अर्थात् करणमन्तरेण कार्यं सम्भाव्यते। यतो हि सूक्ष्मशरीरे सूक्ष्मेन्द्रियाणां सत्त्वात् रूपप्रत्यक्षं न स्यात्। किन्तु रथादयः स्वप्ने दृश्यन्ते। तथा च प्रकाशमन्तरेणापि रूपप्रत्यक्षं जायते। तस्मात् निमित्तानि अनुचितानि भवन्ति स्वप्ने। अबाधासम्पत्तिश्च भवति। अतः मिथ्यात्वम्।

**समीक्षणम्**

बलदेवाचार्यैः प्रोक्तं स्वप्ने मायामात्रं करणम् इति। अतः स्वप्ने यदि मायामात्रं करणं भवितुं योग्यं तर्हि जागरे पञ्चीकरणस्य का प्रयोजनीयतेति चिन्त्यम्। यदि उपकरणान्तरं विहायैव स्वप्नसृष्टिः सम्भवति तर्हि जाग्रत्सृष्टिरपि उपकरणानपेक्षा भवेत्। दुर्घटनापटीयसी यदि हरिशक्तिः एव माया अस्ति तर्हि सुघटनापटीयसी केति प्रश्नो भवति। सा एव यदि सुघटनादुर्घटनोभयपटीयसी तर्हि मात्रशब्दस्य किं प्रयोजनम्। केवलं मायैव यदि उपकरणं सर्वत्र स्वप्ने प्रबोधे च भवेत् तर्हि अत्र 'मायामात्रम्' इति मात्रशब्दस्य व्यर्थता। अपि च यदि स्वप्ने हरिः मायाशक्त्यैव रथादीन् सृजति, प्रबोधे च पञ्चमहाभूतैः सृजति। तर्हि पृथगुपकरणेन किं प्राप्तमिति चेत्, मिथ्यात्वं सत्यत्वं चेति। मायामात्रोपकरणत्वात् स्वप्नस्य मिथ्यात्वम् अपि च पञ्चभूतोपकरणत्वात् प्रबोधस्य सत्यत्वम्। प्रबोधे अपि कदाचित् मायासृष्टः रज्जुसर्पः दृश्यते। अर्थात् प्राप्तं सत्यभूते प्रबोधे स्वप्नादिवन्मिथ्यावस्तु सम्भाव्यते। अत एवं वक्तुं शक्यते यत्, मिथ्यावस्तुसर्जने मायामात्रोपकरणम्, अपि च सत्यवस्तुसर्जने पञ्चभूतानि उपकरणानीति। मायामात्रोपकरणम् ईश्वरस्य सम्भवति, मायायाः ईश्वरशक्तित्वात्, तस्मादेव कारणात् माया न जीवशक्तिः न वा जीवकार्ये उपकरणम्। अतः वक्तुं युज्यते यत्रैव भ्रमः तत्रैव ईश्वरकर्तृत्वं, भ्रमस्य मायोपकरणत्वात् मायायाश्च ईश्वरशक्तेः इति। अपि चैवं प्रतिपद्यते रज्जुसर्पादिभ्रमस्थले स्वप्नस्थले वा ईश्वर एव सृष्टिकर्ता, मायामात्रम्

उपकरणं, जीवश्च द्रष्टा इति। अनेन प्रकारेण न सर्वस्यापि ईश्वरकार्यस्य मिथ्याभूतत्वं भ्रमरूपत्वं वा, किन्तु केवलं मायामात्रोपकरणस्य ईश्वरकार्यस्य मिथ्यात्वं भ्रमत्वं वा। अतः पञ्चभूतसहकृतमायया उत्पन्नस्य जगतः न मिथ्यात्वं किन्तु स्वप्नस्य मिथ्यात्वम्। रामानुजनिम्बार्काचार्याभ्यां मायाशब्दस्य आश्चर्यमित्यर्थः प्रोक्तः। आश्चर्यं नाम अपूर्वम्, अद्भुतं, विस्मयं, चित्रविचित्ररूपं वेति पर्यायार्थाः। असम्भाव्यस्य सम्भवनम् एव आश्चर्यम् इत्युच्यते। सर्वैः लोके देशकालादिनिमित्तं वस्तु अनुभूयते। अतः स्वप्नः इव मायाकृतं यद् वस्तु देशकालादिभिः अनियन्त्रितं तद् आश्चर्यमेव। रज्जुसर्पादिभ्रमः अपि तथैव। शङ्कराचार्यैस्तु मायाशब्दस्य भ्रमार्थो मिथ्यार्थो वा स्वीकृतः। मायाकृतं सर्वमपि मिथ्या, स्वप्ने वा भवतु जागरे वा। अपि च तन्मते स्वप्नस्य तथा अखिलप्रपञ्चस्य मायामात्रत्वात् मिथ्यात्वम्। मायामात्रम् उपकरणमस्तु मायासहकृतं वा उपकरणमस्तु तत्कार्यं मिथ्यैव। सत्यं केवलं ब्रह्म ब्रह्ममाययोः अभिन्नता, शक्तिशक्तिमतोरिव। अतः सर्वं ब्रह्मकृतम्। यन्माया तद्ब्रह्मैव। यन्मायाकृतं तद्ब्रह्मकृतमेव। जीवोऽपि ब्रह्मैव। अतः परमार्थतः सर्वं सत्यम्। सत्यभिन्नं मिथ्यावस्तु नास्ति। सर्वम् आदौ सत्यतः जातम्, सत्यसहकृतमेव जीवति, अन्ततः सत्ये लीयते। स्वप्ने वा जागरे वा आपाततः दृश्यमानस्य जगतः सत्यमेव मूलम्। सत्यस्वरूपञ्च ब्रह्म। वस्तुस्वरूपदर्शनं विहाय अन्यात्मना दर्शनमेव भ्रमः। यादृशं ब्रह्मस्वरूपं वेदे समुपलभ्यते तादृशं न पश्यामः। अतः अयं भ्रमः। ब्रह्म सत्यस्वरूपं ज्ञानस्वरूपम् अपि च आनन्दस्वरूपम् अस्ति। अर्थात् सर्वदा विद्यमानं ब्रह्म, सत्यस्वरूपं ब्रह्म, आनन्दस्वरूपञ्च ब्रह्म। गौडपादाचार्याः माण्डूक्यकारिकायां वदति 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते। अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा'[11] इति। अर्थात् कदा माया आरब्धा इति चेत्प्रोक्तम् अनादि इति। आदिः कदेति वक्तुं न शक्यते। तया अनादिमायया जीवः सर्वदा सुप्तः अस्ति, अर्थाद् द्वैतभ्रमे अस्ति। किन्तु यदा प्रबुद्धः भवति, अर्थाद् यदा द्वैतभ्रमात् मुक्तः भवति, तदा अजम् अनिद्रम् अस्वप्नम् अद्वैतं बुध्यते। स्वात्मानं परमात्मत्वेन अनुभवति इत्यर्थः। अजं नाम जन्मरहितम्, अनिद्रं सुषुप्तिरहितम्, अस्वप्नं स्वप्नरहितम्, अद्वैतम् द्वैतरहितम्। जीवयोः मध्ये भेदः, जडजीवयोः मध्ये भेदः, जीवजडपरमात्मसु भेदः इत्यादयः सर्वे भेदाः अपगताः भवन्ति। अपि च ब्रह्ममाययोः भेदः निर्गच्छति। अतः प्राप्तं माया विद्यमानं स्वरूपम् आवृत्य अविद्यमानं रूपं प्रदर्शयति। स्वप्नः अपि अविद्यमानः एव तादृशः एकः मायाकृतः भ्रमः। तस्य स्वप्नस्य मिथ्यात्वं वक्तुम् एव प्रकृतसूत्रे मायामात्रम् इति पदं पठितम्। शङ्कराचार्यमतानुरोधेन माया यथा ब्रह्माभिन्ना तथैव अन्यत् सर्वं मायाकृतम् अपि ब्रह्माभिन्नम् इति। तस्मात् तत् सर्वं ब्रह्माभिन्नात्मना सत्यं किन्तु ब्रह्मभिन्नात्मना मिथ्या।

### 4. सूचकश्च हि श्रुतेराचक्षते च तद्विदः[12]

यथापूर्वम् आदौ बलदेवभाष्यम् अवलोक्यते। यद्यपि शङ्कराचार्यैः सन्ध्याधिकरणे सूत्रम् इदं पठितम्। किन्तु एतन्मते पृथग्रूपेण सूचकाधिकरणे सूत्रम् इदं पठ्यते। इतः पूर्वं स्वप्नसृष्टेः कर्ता परमात्मा उपकरणञ्च मायामात्रम् इति प्रतिपादितम्। इदानीम् अस्मिन् सूत्रे स्वप्नसृष्टेः मिथ्यात्वं सत्यत्वं वेति परीक्ष्यते। किमर्थं परीक्षा कर्तव्या इति चेत् जागरे स्वप्नसृष्टेः बाधात् स्वप्नसृष्टिः मिथ्या इति पूर्वपक्षमतस्य निरसनार्थम्। यतो हि श्रुतिः स्वप्नस्य सूचकत्वं वदति अपि च स्वाप्नतत्त्वविदः बृहस्पत्यादयः तदेव मन्यन्ते, तस्मात् स्वाप्नसर्गः सत्यः इति बलदेवसिद्धान्तः। अत्र भाष्ये स्वप्नसृष्टिसादृश्येन जगत्सृष्टिः उल्लिखिता। यथा जगति सृष्टिः तथा स्वप्ने सृष्टिः सत्यैव।

निम्बार्कभाष्ये तु यथाशङ्करक्रमं सन्ध्याधिकरणे सूत्रम् इदं पठितम्। यतो हि स्वप्नः साध्वागमस्य असाध्वागमस्य च सूचकः अस्ति, अपि च इच्छानुसारं केवलं साध्वागमस्य सूचकं स्वप्नं पश्यामि इति स्वेच्छया द्रष्टुं न शक्यते जीवः अथवा तादृशं स्रष्टुं न शक्यते, इत्यतः परमेश्वरः स्वप्नसृष्टेः कर्तेति सिद्धान्तः। कथं ज्ञायते स्वप्नः शुभाशुभसूचकः इति चेत्, श्रुतिवचनात् स्वप्नविद्वचनाच्च।

रामानुजभाष्यं निम्बार्कभाष्यञ्च समानमेव। रामानुजाचार्यः वदति स्वसङ्कल्पायत्तस्य जीवस्य सूचकत्वं न सम्भवतीति, अतः ईश्वरकृता सृष्टिः।

शङ्कराचार्यस्तु सूच्यमानवस्तुनः आपातसत्यत्वम् अङ्गीकृत्यापि सूचकस्वप्नस्य सत्यत्वम् अङ्गीकर्तुं न प्रवर्तते। सूत्रे केवलं सूचकत्वं प्रतिपादयति, न तु स्वप्नस्य सत्यत्वम्। अतः सत्यवस्तूनां मिथ्यावस्तूनां वा सूचको भवतु नाम स्वप्नः, किन्तु स्वप्नस्य सत्यत्वं नोच्यते। पूर्ववद् अत्रापि स्वप्नस्य मायामात्रत्वमेव प्रोक्तम्। स्वप्नस्य मिथ्यात्वे सूचकत्वानुपपत्तिरपि न भवति, परस्पराविरोधात्। तथाहि श्रुतिवाक्यं 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने।'[13] इति। अतः स्वप्नः जाग्रद्भविष्यतः सूचकः भवति।। अपि च भाष्यकृद्भिरुक्तं स्वप्नविषये 'न परमार्थगन्धोऽप्यस्ति'[14] इति। तस्मात् मिथ्यात्वमेव। कदाचित् स्वप्ने स्त्रियं दृष्ट्वा सम्भोगञ्च कृत्वा सत्यरूपः रेतःपातः जायते। तेन वस्त्रादीनां मलिनतापि जायते। तथैव सत्यमेव भविष्यतः जाग्रदवस्थायाः सूचकः स्यात्। एवमेव ब्रह्मणः निष्क्रियत्वात् सृष्ट्यसम्भवापत्तेः मिथ्यारूपया एव मायया सम्बलितं सत् ब्रह्म सृजते। अतः न विरोधः मिथ्यात्वसूचकत्वयोः।

**समीक्षणम्**

यथा प्रकृतसूत्रस्य स्थानभेदः कल्पितः आचार्यैः, तथैव कश्चन विषयभेदः प्रतिपादितः।

तत्र विषयभेदेषु प्रथमः स्वप्नस्य सत्यमिथ्याविचारः, द्वितीयः स्वप्नस्रष्टृविचारः। बलदेवाचार्यः स्पष्टं वदति स्वप्नसर्गः सत्य इति। अन्येषु रामानुजनिम्बार्काचार्यौ अस्मिन् विषये स्पष्टं किमपि नोक्तवन्तौ। शङ्कराचार्यस्तु स्वप्नस्य सूचकत्वं स्वीकृत्य सत्यत्वं निराकृतवान्। बलदेवमतानुसारेण स्वप्नसत्यतायाः अङ्गीकारेण कश्च लाभः कश्च व्ययः इति चेत्, सर्वसत्यतासिद्धिः। जाग्रत्स्वप्नसुषुप्तयः सत्यस्वरूपाः। यथा शङ्कराचार्यः ब्रह्मभिन्नस्वरूपेण दृश्यमानानां मिथ्यात्वं प्रावदत् तेन स्वप्नस्यापि मिथ्यात्वं सुतरां वक्तव्यम् इति आपतति, तथैव बलदेवाचार्यः विपरीतरीत्या स्वप्नस्य सत्यत्वं प्रावदत्। विपरीतरीत्या नाम सर्वं सर्वात्मना सत्यम् इति। क्षणिकं चेदपि सत्यम्, नित्यम् अपि सत्यम्। रज्जुरपि सत्यः, सर्पः अपि सत्यः। रज्ज्वात्मना सर्पः, सर्पात्मना रज्जुः, रज्ज्वात्मना रज्जुः, सर्पात्मना सर्पः इत्येतत् सर्वं सत्यमेव। समानमेव निम्बार्काचार्यस्यापि मतमस्ति। जगद् अपि ब्रह्मणः अंशरूपम् अस्ति, अतः सर्वं सत्यमेव, ब्रह्मांशत्वात्, ब्रह्मकार्यत्वात्। किमपि कार्यं जीवो न सम्पादयति, परमेश्वरकृपया सर्वं सम्पद्यते। अतः सर्वमेव सत्यम्। यदि जीवकृतं स्यात् तदा तस्य मिथ्यात्वं युक्तम्। जीवः स्वतन्त्रतया न किञ्चित् कर्तुं प्रवर्तते, सर्वत्र परमेश्वरः एव नियन्ता। द्वितीयः विषयभेदः अस्ति स्वप्नस्रष्टा कः इत्यस्मिन् विषये। स्वप्नसृष्टिसत्यवादिभिस्तावत् परमेश्वरकर्तृत्वम् उच्यते। तेषां नये परमेश्वरकृतत्वात् स्वप्नसृष्टिः सत्या। तस्मात् तैः मायाशब्दस्य आश्चर्यम् इति अर्थः प्रोक्तः। आश्चर्यम् अर्थाद् अपूर्वम्। यत्र कार्यकारणसम्बन्धो न ज्ञायते तादृशं कार्यम् आश्चर्यम्। कार्यकारणसम्बन्धं ज्ञात्वापि जीवाः यत्कार्यं कर्तुम् असमर्थाः तदेव मायाकृतम् आश्चर्यम्। यथा स्वप्नसृष्टिः। स्वप्नसृष्टौ न किञ्चिदपि नियन्त्रणम् अस्ति जीवानाम्, न च तस्यां कारणमपि निश्चयेन वक्तुं शक्यते। यत्र जीवानां यावद् अनियन्त्रणं तत्र तावद् गाढम् अज्ञानं भवति। यथा जाग्रदवस्थायां किञ्चित् नियन्त्रणं सम्भवति, स्वप्ने ततो न्यूनं सुषुप्तौ च नैव। तथैव व्युत्क्रमेण तत्र तत्र अविद्यायाः प्रभावः अधिकः भवति। तस्माद् यद्यपि जाग्रत् नियन्त्रकं भवति तथापि स्वप्नः सूचकः एवेति युक्तमेव। सुषुप्तिस्तु न नियन्त्रणं करोति न वा सूचयति।

### 5. पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ[15]

स्वप्नसृष्टिः प्रबोधकाले न तिष्ठतीति कारणेन स्वप्नः मिथ्येति वक्तुं न शक्यते, स्वप्नसृष्टौ तत्तिरोधाने च ईश्वराभिध्यानस्य कारणत्वाद् इति बलदेववचनम्। अग्रे च वदति न रज्जुसर्पवत् स्वप्नसृष्टेः बाधः इति। अर्थाद् यथा रज्जुसर्पस्य सृष्टौ अथवा प्रतीतौ जीवाज्ञानस्य कारणता, अपि च तत्तिरोधाने यथा स्वकीयाज्ञानावरणनाशस्य कारणता,

न तथा स्वप्नसृष्टौ जीवाज्ञानस्य तत्तिरोधाने चाज्ञाननाशस्य कारणता। स्वाप्नरथादीनां तिरोभावः परमेश्वरस्य सङ्कल्पाज्जायते। किन्तु शुक्तिरजतवत् तेषां बाधः नास्ति। यतो हि परमेश्वरस्य स्वप्नकारणत्वं श्रुतौ एव प्रोक्तम्। बन्धमोक्षयोः कर्तुः परमेश्वरस्य स्वप्नकर्तृत्वम् अथवा स्वप्नपरिहारकर्तृत्वं विचित्रं नास्ति। तथा हि श्रुतिः स हि कर्ता इति। अतः स्वप्नस्य तस्मादेव परमेश्वरात् सृष्टिः तिरोभावश्च भवतः।

निम्बार्काचार्यः जीवस्य सत्यसङ्कल्पशक्त्याः तिरोभावं व्याख्याति। स्वप्नदृष्टपदार्थानां निर्माणार्थं सत्यसङ्कल्पादिशक्तिः जीवस्य विद्यते चेदपि, बद्धावस्थायां जीवस्य कर्मानुरूपया परमेश्वरस्य सत्यसङ्कल्पशक्त्या एव स्वप्नपदार्थादिनिर्माणयोग्या सा शक्तिः तिरोहिता भवति। एवमेव जीवस्य बन्धमोक्षौ प्रति जीवकर्मानुरूपा परमेश्वरसत्यसङ्कल्पशक्तिः कारणम्।

रामानुजभाष्ये इदं सूत्रं चतुर्थत्वेन पूर्वमेव पठितम्। किन्तु प्रकृते समानमिव व्याख्यानं रामानुजनिम्बार्काचार्ययोः। जीवस्य स्वाभाविकरूपं परमेश्वरसङ्कल्पात् तिरोहितं भवति। परमपुरुषः जीवस्य अनादिकर्मभिः स्वाभाविककल्याणरूपं तिरोहितं करोति। एवमेव कर्मानुरूपात् परमेश्वरसत्यसङ्कल्पादेव जीवस्य बन्धमोक्षौ अपि।

शाङ्करमतमपि किञ्चित् समानमेव भाति। तथापि पराभिध्यानशब्दस्य विशेषार्थता प्रतिपादिता। परस्य ईश्वरस्य अभिध्यानं यो जीवः करोति तस्यैव ईश्वरप्रसादात् सत्यसङ्कल्पता। अतः पराभिध्यानात् सत्यसाङ्कल्पिकी स्वप्नसृष्टिः जीवस्य भवितुम् अर्हति। किन्तु जीवस्य अविद्याव्यवधानात् ईश्वरसमाना सत्यसङ्कल्पता तिरोहिता भवति। ईश्वरकारणादेव जीवस्य बन्धमोक्षौ अपि भवतः। ईश्वरस्वरूपाज्ञानाद् बन्धः, ज्ञानात्तु मोक्षः।

**समीक्षणम्**

परशब्देन परमेश्वरः सर्वैः भाष्यकारैः स्वीकृतः इति स्फुटम्। इदानीम् अभिध्यानशब्देन कोऽर्थः स्वीकृतः इति समीक्ष्यते। वाचस्पत्यकोशे अस्यार्थः एकमात्रविषयप्रत्ययसन्तानः इत्युक्तः। बलदेवाचार्यः सत्यसङ्कल्पः इत्यर्थम् अन्वसरत्। सः कोशार्थेन प्रायेण समानः इति चिन्त्यते मया। लोके जीवाः एकस्मिन् विषये एव यदा एकाग्रेन्द्रियाः सन्तः ज्ञानविस्तारं कुर्वन्ति, तदा तद्विषयः अवश्यं ज्ञातः भवति। एवं येन सङ्कल्पेन सिद्धिः निश्चिता सः सत्यसङ्कल्पः। अतः अनयोः प्रायेण समानार्थता। रामानुजनिम्बार्काचार्यमतमपि समानम्। शङ्कराचार्यः व्याख्याने यद्यपि एकमात्रविषयप्रत्यय-सन्तानरूपं कोशार्थं नातिरिणक्ति तथापि पराभिध्यानाद् इति सूत्रस्थसमस्तपदस्य भिन्नभाष्यं करोति। अन्ये त्रयः आचार्याः परमेश्वरस्य अभिध्यानं सत्यसङ्कल्पः वा इति अर्थं

व्यञ्जयन्ति। शङ्कराचार्यस्तु परमेश्वरे विषये अभिध्यानम् इति अर्थं प्रस्तौति। तस्माद् उक्तं 'तत्पुनस्तिरोहितं सत् परमेश्वरमभिध्यायतो यतमानस्य जन्तोर्विधूतध्वान्तस्य' इत्यादिभाष्यम्। बन्धविपर्ययौ प्रति अभिध्यानमेव कारणम्। अभिध्यानेन ब्रह्मणि ज्ञाते सति मोक्षः, अविद्याव्यवधानाच्च बन्धः।

**6. देहयोगाद्वा सोऽपि**[17]

पूर्वसूत्रे परमेश्वरकृता स्वप्नसृष्टिः इति मतम् प्रतिपाद्य इदानीं जागरसृष्टिः अपि परमेश्वरकृता इति प्रतिपाद्यते बलदेवाचार्यैः। तथाहि कठोपनिषदि प्राप्यते स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति इत्यादिमन्त्रः। तस्मात् तस्यैव परेशस्य सर्वम्। अतः सः जागरसृष्टिकर्ता। सूत्रस्थेन अपिशब्देन सुषुप्तिः मूर्च्छा चेत्यनयोः सृष्टिः ईश्वरकृतैव इति समुदीरितम्। यतोहि परमेश्वरस्यैव सर्वकर्तृत्वं श्रूयते। एतन्मते सूत्रार्थः भवति यद् देहयोगाद् यः जागरः सः परमेश्वरकृतः स्वप्नान्तम् इत्यादिश्रुतिप्रामाण्यात्, अपि च सुषुप्तिः मूर्च्छावस्था चेत्येते अपि परमेश्वरकृते इति।

निम्बार्काचार्यः 'सः' इति शब्देन तिरोभावं विनिर्दिशति। देहयोगात् तिरोभवति। कस्य तिरोभावः इति चेत् सत्यसङ्कल्पस्य। देहात्मबुद्धियोगेन अर्थाद् अविद्यायोगेन तस्य जीवस्य सत्यसङ्कल्पशक्तिः तिरोहिता भवति। अपिशब्देन अत्र सत्यसङ्कल्पशक्त्या सह स्वप्नसृष्टेः समुच्चयः इति वक्तुं युक्तम्। अतः उभयोः तिरोभावः इष्टार्थः विद्यते।

रामानुजाचार्यः अपि 'सः' इति शब्देन जीवस्य स्वरूपतिरोभावं विनिर्दिशति। देहयोगाद् वा सूक्ष्मजडशक्तियोगाद् वा तिरोभावः। सृष्टिकाले सः स्वरूपतिरोभावः देहरूपाचिद्वस्तु-संयोगाद् अपि च प्रलयकाले नामरूपाविभक्तसूक्ष्मजडवस्तुयोगाद् भवति। अतः अनभिव्यक्तस्वरूपः जीवः सङ्कल्पमात्रेण सृष्टिं कर्तुं न शक्नोति। सर्वेषु सुप्तेषु एकस्य परमेश्वरस्यैव जागरणम्, अपि च सर्वलोकाश्रयत्वं सम्भवति। तस्मात् स एव परमेश्वरः स्वप्नसृष्टिकर्ता भवितुं योग्यः, शरीरायोगाद्वा। जीवानां यथा देहयोगः न तथा ईश्वरस्य शरीरयोगः, नापि सत्यसङ्कल्पतिरोभावः। तथाहि श्रुतिः अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् इति। अत्र सूत्रे अपिशब्देन सृष्टिकाले तिरोभावः प्रलयकाले तिरोभावः चेत्यनयोः समुच्चयार्थः प्रदर्शितः इति वक्तुं शक्यम्।

शाङ्करभाष्ये प्रतिपादितं यत् कथं जीवः परमेश्वरांशः सन्नपि तिरोभूतज्ञानैश्वर्यः भवतीति। अत्र आचार्यैः प्रश्नम् अनूद्य समाधानं प्रोक्तम्। यथा अग्नेः इव विस्फुलिङ्गस्य दहनप्रकाशने तथैव कथं न परेशस्य इव जीवस्यापि ज्ञानैश्वर्ये अतिरस्कृते इति प्रश्नः। समाधानं तु देहयोगादिति। अर्थाद् यद् ज्ञानैश्वर्ययोः अतिरस्कृतत्वम् उक्तं तद्

देहेन्द्रियादियोगाद् तिरस्कृतं भवति। यथा दहनप्रकाशनसम्पन्नस्य अरणिगतस्य अग्नेः दहनप्रकाशने तिरोहिते अथवा यथा भस्माच्छन्नस्य अग्नेः दहनप्रकाशने तिरोहिते तथैव अविद्यापूर्वकनामरूपकृतदेहेन्द्रियाद्युपाधियोगेन अविवेकभ्रमकृता जीवस्य ज्ञानैश्वर्यतिरोहितता। अत्र पुनः प्रश्नः यद् देहयोगकल्पनां विना अपि तिरस्कृतज्ञानैश्वर्यत्वाद् अस्तु जीवः ईश्वराद् अन्य इति। नेति प्रोक्तम् आचार्यैः। न स्वाभाविकतया जीवेश्वरयोः भेदः सम्भवति, न च जीवस्य तिरस्कृतज्ञानैश्वर्यत्वं स्वाभाविकम्। श्रुतिः तयोः ऐक्यं प्रत्यपादयत्। तथाहि छान्दोग्योपनिषदि 'सेयं देवतैक्षत'[18] इत्यादिना उपक्रम्य 'अनेन जीवेनात्मनानुप्रविश्य'[19] इत्यत्र आत्मशब्देन जीवस्य परामर्शः प्राप्यते। तत्रैव ईश्वरात्मत्वोपदेशः जीवाय दृश्यते। अतः देहयोगं विना जीवेश्वरयोः भेदः अनुपपन्नः। तस्माद् देहयोगाद् जीवः तिरस्कृतज्ञानैश्वर्यः भवति। अयं भावो न स्वाभाविकः। न हि ईश्वराद् अन्यः जीवः। अनन्यः सन्नपि देहयोगात् तिरस्कृतज्ञानैश्वर्यः जीवः ईश्वराद् आपाततो भिद्यते। तेन जीवस्य साङ्कल्पिकी स्वप्नसृष्टिर्न युज्यते। यदि साङ्कल्पिकी सृष्टिः स्यात् तदा अनिष्टं स्वप्नं न पश्येत् कश्चिज्जीवः। यस्माद् इष्टानिष्टमिश्रितः स्वप्नः दृश्यते तस्मात् स्वप्नसृष्टिः न जीवस्य सङ्कल्पेन भवति। जागरितदेशादितुल्यवचनं न सत्यत्वाभिप्रायेण प्रोक्तम्। श्रुतिः स्वप्ने रथादीनाम् अभावम् अदर्शयत्। तस्माद् यन्नास्ति तस्य दर्शनं मायामयम् अस्तीत्यतः स्वप्नस्य मायामयत्वम् उपपन्नम्।

**समीक्षणम्**

देहः अथवा शरीरं नाम किम्। श्रीमद्भगवद्गीतायां प्रोक्तम् अन्तवन्त इमे देहाः इति, अर्थाद् देहः अनित्यः विनाशी स्वल्पकालस्थायी। तत्रैव शाङ्करभाष्यवाक्यम् अस्ति बुद्ध्याभासं मनः, तदाभासानि इन्द्रियाणि, इन्द्रियाभासः देहः इति। तथैव एवं वक्तुं शक्यते यद् अस्माकं जीवानां यद् आत्मज्ञानं तद् देहाभासः विद्यते। देहाभासरूपं देहात्मरूपं वा आत्मज्ञानं देहयोगाद् एव सम्भवतीत्यतः प्रोक्तं देहयोगाद्वा इति। देहाभासेन तिरस्कृतस्वरूपज्ञानत्वात् परमेश्वरस्य जीवत्वम्। अस्मिन् सूत्रे 'सः' इति तच्छब्दस्य पुंलिङ्गप्रथमानिर्देशेन जीवः गृह्यते। अपिशब्दस्य 'जीवः परमेश्वरांशः सन्नपि' इत्येवम् अन्वयः। अर्थात् सम्पूर्णस्य सूत्रस्य अर्थः प्राप्यते यत् सः जीवः परमेश्वरांशः सन्नपि देहयोगाद् वा तिरस्कृतज्ञानैश्वर्यः भवति इति। अथवा भिन्नप्रकारेण सः इत्यनेन शब्देन परमेश्वरार्थग्रहणेन समानं मतं वक्तुं शक्यं यत् सः परमेश्वरः अपि देहयोगात् तिरस्कृतज्ञानैश्वर्यः भवतीति। यदुक्तं बलदेवाचार्यैः अस्मिन् सूत्रे जागरसुषुप्तिमूर्च्छावस्थानां सृष्टिकर्ता परमेश्वरः इति तन्नोपपद्यते। यतो हि 'सः' इति तच्छब्दपुंलिङ्गप्रथमैकवचनप्रयोगेण

पूर्वोक्तार्थाभिज्ञानं स्यात्। अतः प्रकृतशब्देन पूर्वोक्ततिरोहितशब्दस्य अभिज्ञानं सम्भवेत्, न तु पूर्वानुक्तशब्दार्थग्रहणम्। पूर्वसूत्रम् अस्ति पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ इति। अत्र जागरशब्दः अनुक्तः, किन्तु तिरोहितशब्दः उक्तः। तस्मात् 'सः' इत्यस्य तिरोभावः इति अर्थग्रहणेन बलदेवाचार्यापेक्षया निम्बार्काचार्यवचनं श्रेयः। प्रोक्तं रामानुजाचार्यैः सृष्टिकाले प्रलयकाले च जीवस्य सत्यसङ्कल्पतायाः तिरोभावः इति। अत्र 'सः' इति तच्छब्दस्य तिरोहितार्थः सम्यक् प्रोक्तः। बलदेवाचार्यः वदति जागरः अपि परमेश्वरकृतः इति। रामानुजाचार्यः वदति सत्यसङ्कल्पतायाः तिरोभावः प्रलयकाले अपि भवति यथा सृष्टिकाले इति। मयि भाति बलदेवमतापेक्षया रामानुजव्याख्यानं युक्तम्, यतो हि पूर्वसूत्रे स्पष्टरूपेण तिरोभावः प्रतिपादितः न तु परमेश्वरस्य सर्वकर्तृत्वम्। तदनुबन्धतया प्रकरणतया वा अत्रापि स्वरूपतिरोभावः युक्ततरः। शङ्कराचार्यस्तु वहु सम्यक् प्रत्यपादयत्। सः इति तच्छब्देन तत्त्वमसि इति महावाक्यवद् अत्रापि परमेश्वरः उद्दिष्टः। सः अपि अर्थात् परमेश्वरः अपि देहयोगात् तिरोहितज्ञानैश्वर्यः भवतीति सूत्रार्थः। एतदेव भाष्यं सर्वतः सिद्धं भाति।

*

## सन्दर्भाः


1. ब्रह्मसूत्रम् 3.2.1
2. बृहदाण्यकोपनिषत् 4.3.10
3. बृहदारण्यकोपनिषत् 4.3.10
4. कठोपनिषत् 2.2.8
5. ब्रह्मसूत्रम् 3.2.2
6. कठोपनिषत् 1.1.25
7. कठोपनिषत् 2.2.8
8. ब्रह्मसूत्रम् 3.2.3
9. बृहदारण्यकोपनिषत् 4.3.12
10. ब्रह्मसूत्रम् 3.2.3
11. माण्डूक्यकारिका 1.16
12. ब्रह्मसूत्रम् 3.2.4
13. छान्दोग्योपनिषत् 5.2.8
14. ब्रह्मसूत्रम् 3.2.3
15. ब्रह्मसूत्रम् 3.2.5
16. ब्रह्मसूत्रम् 3.2.5
17. ब्रह्मसूत्रम् 3.2.6
18. छान्दोग्योपनिषत् 6.3.2
19. छान्दोग्योपनिषत् 6.3.2


*

## किञ्चिद् रामायणीयम्

### अयोध्याकाण्डम्, सर्गः 100

चित्रकूटे भरतः श्रीरामम् अमिलत्। श्रीरामम् अयोध्यां प्रतिनेतुं सः आगतः आसीत्। तदानीं श्रीरामः भरतं कुशलक्षेमगतान् नानाप्रश्नान् अपृच्छत्। ये प्रश्नाः 'कच्चित्' इत्यव्ययेन प्रारब्धाः संक्षिप्ततया ते इत्थं सन्ति–

**''कच्चित्''**

1. हे तात! (त्वया) मुख्याः मध्यमाः मध्यमेषु महत्स्वेव योजिताः?
2. हे तात! (त्वया) जघन्याः भृत्याः जघन्येषु योजिताः?
3. त्वम् उपधातीतान् पितृपैतामहान् शुचीन् श्रेष्ठान् अमात्यान् श्रेष्ठेषु (कार्येषु) नियोजयसि?
4. हे कैकेयीसुत! (तव) उग्रेण दण्डेन प्रजाः भृशम् उद्वेजिताः?
5. तव मन्त्रिणः राष्ट्रे अवजानन्ति?
6. याजकाः त्वाम् उग्रप्रतिग्रहीतारं स्त्रियः काययानमिव पतितं यथा (तथा तु) न अवजानन्ति?।
7. त्वया हृष्टः शूरः धृतिमान् मतिमान् शुचिः कुलीनः अनुरक्तः दक्षश्च सेनापतिः कृतः?
8. तव बलवन्तः मुख्याः युद्धविशारदाः दृष्टापदानाः विक्रान्ताः सत्कृत्य मानिताः?
9. बलस्य संप्राप्तकालं दातव्यं भक्तं च यथोचितं वेतनं च ददासि, न विलम्बसे? (यतो हि) कालातिक्रमणात् भक्तवेतनयोः भृताः भर्तुः अतिकुप्यन्ति, सः सुमहान् अनर्थः इति स्मृतः?
10. त्वां सर्वे अनुरक्ताः, प्रधानतः कुलपुत्राः (अनुक्ताः) तव अर्थेषु समाहिताः प्राणान् सन्त्यजन्ति?

*

# बौद्ध–वैशेषिकयोः कारणवादः

**राजेशः रमणः राणुः**

संसारोऽयं परिवर्तनशीलः परमस्य आधारविषये मतान्तरं विद्यते यत् सः आधारः अपि परिवर्तनशीलः वर्तते उत वा नित्यः। तथापि मूलाधारविषये मतान्तरे सति अस्य संसारस्य परिवर्तनशीलतायाः विषये कोऽपि प्रश्नः न अस्ति। अस्मिन् मूले विद्यमानं कार्यकारणसिद्धान्तं समग्रदर्शनानि यया कयापि रीत्या स्वीकुर्वन्ति एव। अपि च सर्वाः दार्शनिकचिन्तनधाराः अनेन कार्यकारणस्वरूपविवेचनेन विकसिताः।

एतादृशी पूर्ववर्तिसत्ता, या परिवर्तनं करोति, कारणमिति कथ्यते। या परिवर्तिता भूत्वा नवीनरूपेण उपस्थिता भवति, सा सत्ता कार्यनाम्ना अभिधीयते। वैशेषिकदर्शनस्य कार्यकारणवादः '**आरम्भवादः**' इति नाम्ना ज्ञायते। बौद्धदर्शनस्य कार्यकारणवादः '**प्रतीत्यसमुत्पादवादः**' इति नाम्ना प्रसिद्धः।

शोधपत्रेऽस्मिन् बौद्ध–वैशेषिकयोः कारणवादसिद्धान्तः विवेच्यविषयो वर्तते। अस्मिन् पत्रे विवेचनात्मक–तुलनात्मक–प्रविधिभ्यां विषयप्रस्तुतिः भविष्यति। अनेन शोधपत्रेण दर्शनद्वयस्य कारणवादसम्बद्धमतानां विश्लेषणमभीष्टमस्ति।

प्रायः समस्तदर्शनानाम् इयं मान्यता वर्तते यत् प्रत्येककार्यस्य किमपि कारणमवश्यं भवति। विभिन्नदर्शनेषु स्वविशिष्ट–चिन्तनधारानुसारं कार्य–कारणयोः स्वरूपविषयकः मतभेदः विद्यते। जगति मूलकारणं किमस्ति, तेन उद्भूतकार्याणां स्वरूपं किं वर्तते, कार्य–कारणयोः कोऽपि सम्बन्धः अस्ति चेत् कीदृशः सम्बन्धः भवति, इत्यादयः प्रश्नाः चिन्तनीयाः सन्ति।

कार्यकारणसिद्धान्तविषये चिन्तनं कुर्मः चेत् चिन्तनस्य आधारद्वयं भवितुं शक्यते- कार्यं कारणं च। कारणं कार्यस्य पूर्ववर्ति भवति एव इत्येषा सामान्यतया समस्तदर्शनेषु मान्यता वर्तते, तथैव कार्यं कारणस्य पश्चाद्वर्ति भवतीति। कार्यस्य उत्पत्तिनिमित्तभूतं कारणं सत् वर्तते असत् वा? अस्मिन् आधारे यः सिद्धान्तः विकसितः सः कारणवादः।

अस्यां चिन्तनधारायां मतद्वयं प्रवर्तते– **सत्कारणवादः असत्कारणवादः च।** उत्पत्तेः प्राक् कार्यस्य सत्ता कारणे भवति न वा?– अस्मिन् आश्रित्य यः सिद्धान्तः विकसितः सः **कार्यवादः।** अस्मिन् विवेचने द्विविधप्रकारकं मतं वर्तते– **सत्कार्यवादः असत्कार्यवादः च।**

'सत्कारणवादम्' अद्वैतवेदान्तदर्शनं स्वीकरोति। 'असत्कारणवादः' बौद्धदर्शने स्वीक्रियते। 'सत्कार्यवादः' सांख्यदर्शने स्वीकृतः। 'असत्कार्यवादं' प्रामुख्येण न्याय–वैशेषिकदर्शनं स्वीकरोति।

बौद्धदर्शनम् असत्कारणवादं स्वीकरोति। अत्र कारणम् असत् मन्यते। कारणस्य विनाशानन्तरमेव कार्यस्य उत्पत्तिः भवति अर्थात् यदा पर्यन्तं कारणं नष्टं न भवति तदा पर्यन्तं कार्योत्पत्तिः भवितुं न शक्यते। अतः कारणं पूर्वस्मिन् क्षणे नष्टं भूत्वा कार्यम् उत्पादयति। अनेन 'कारणम्' असत् वर्तते। बौद्धमतानुसारं किमपि वस्तु एकक्षणाधिकं न तिष्ठति, यथा– यदा कारणम् आसीत् तदा कार्यं न आसीत्, यदा कार्यं प्रकटीभवति तदा कारणं न विद्यते। यावत् कार्यम् उत्पद्यते तावत् कारणम् असत् जातम्। अभिप्रायोऽस्ति असत्कारणेन सत्कार्यस्य उत्पत्तिः भवति। बौद्धदर्शने सातत्यं नैरन्तर्यं च वर्तते, यद् क्षणसन्तानं कथ्यते। अत्र क्षणानां प्रवाहः विद्यते। प्रथमक्षणं द्वितीयक्षणं जनयति, द्वितीयक्षणस्य जन्मनः पूर्वमेव प्रथमक्षणस्य नाशः जातः, एवमेव द्वितीयक्षणं तृतीयक्षणम् उत्पादयति। तृतीयक्षणस्य उत्पादनकालात् प्राक् द्वितीयक्षणस्य नाशः जातः। एषः सिद्धान्तः प्रतीत्यसमुत्पादः कथ्यते। शब्दरूपेण चिन्तयामः चेत् प्रतीत्यसमुत्पादः, 'प्रतीत्य' इत्यस्मिन् शब्दे ल्यप् प्रत्ययः वर्तते। 'ल्यप्' प्रत्ययः पूर्वकालिकक्रियां बोधयति सूचयति वा। अभिप्रायः जातः– प्रतीतं भूत्वा **समुत्पादः** = उत्पद्यते। कारणस्य संस्कारः कार्ये संक्रान्तः भवत्येव। अत्र कारण–कार्ययोः सातत्यसम्बन्धः विद्यते। बौद्धदर्शने केऽपि द्वे वस्तुनी सहवर्तिनी न भवितुं शक्येते।

बौद्धदर्शनस्य मुख्यविषयेषु अन्यतमं वर्तते **आर्यसत्यचतुष्टयम्**[1]–

* दुःखमस्ति।
* दुःखसमुदयः।
* दुःखनिरोधः।
* दुःखनिरोधमार्गः।

बौद्धानां कार्यकारणसिद्धान्तः आर्यसत्यचतुष्टये विद्यते। अस्य चतुष्टयस्य द्वितीयम्

आर्यसत्यमस्ति– '**दुःखसमुदयः**'। अस्य अभिप्रायो वर्तते – दुःखं जायते। दुःखस्य कारणं भवति, द्वितीय–आर्यसत्यस्य विवेचने दुःखस्य कारणानां बृहती शृङ्खला वर्णिता। अस्यां शृङ्खलायां बौद्धदर्शनस्य कार्यकारणसिद्धान्तस्य कार्यान्वयनं प्रतिपादितम्।

दुःखम् उत्पद्यते, अस्य समुदयः भवति। यत् उत्पद्यते तत् कार्यम्। प्रत्येकं कार्यस्य किमपि कारणम् अवश्यं विद्यते। कारणेन विना कार्यं भवितुं न शक्यते। कार्यं सदा कारणसापेक्षं भवति। एषः निश्चितः नियमः अस्ति– कारणे सत्येव कार्यं भवति। कार्योत्पत्तये हेतुः प्रत्ययसामग्री आवश्यकी। अत्र कारणकार्याणां सुदीर्घा परम्परा अस्ति, शृङ्खला एव विद्यते, या द्वादशाङ्गचक्ररूपेण परिभ्रमति। एतत् प्रतीत्यसमुत्पादचक्रम् एव दुःखसमुदयस्य कारणमस्ति, अविद्या च अस्य जननी विद्यते। अविद्याजन्यया तृष्णया संसारे आसक्तिः जायते, तया भवचक्रं च क्रामति।

महात्मबुद्धस्य उपदेशानाम् आधारभूतसिद्धान्तः '**प्रतीत्यसमुत्पादः**'[2] अस्ति। अयं बौद्धदर्शनस्य केन्द्रीयः सिद्धान्तः वर्तते। अयं द्वितीय–तृतीय–आर्यसत्ययोः समाहितः। बौद्धमतानुसारेण दुःखस्य उत्पत्तेः कारणम् अस्ति (दुःखसमुदयः) तथा च अस्य कारणस्य निरोधे सति दुःखं न अवतिष्ठति (दुःखनिरोधः)। प्रतीत्यसमुत्पादः कार्यकारणवादः अस्ति। 'प्रतीत्य' इत्यस्य अर्थः अस्ति– **अपेक्षां कृत्वा, आश्रित्य** वा; 'समुत्पादः' इत्यस्य अर्थः अस्ति– उत्पत्तिः। कार्यं सदा कारणसापेक्षं विद्यते। कारणे सति कार्यं भवति, अपि च कारणे असति कार्यं न भवति। दुःखं 'संसारः', दुःखनिरोधः 'निर्वाणम्'। सापेक्षदृष्ट्या प्रतीत्यसमुत्पादः दुःखसमुदायरूपः संसारः वर्तते, पारमार्थिकदृष्ट्या प्रतीत्यसमुत्पादः प्रपञ्चोपशमः, शिवं निर्वाणं च मन्यते। सापेक्षदृष्ट्या अयं कारणकार्यवादः अस्ति। अस्मिन् नियमः अस्ति– 'अस्मिन् कारणे सति इदं कार्यं भवति'।

यदपि उत्पद्यते, तत् कार्यम्। यत् कार्यं तत् सापेक्षम्। यत् सापेक्षं तद् वस्तुतः न सत् वर्तते, न असत् वर्तते, न असत् वर्तते, प्रतीतिमात्रं वर्तते। महात्माबुद्धस्य इयं मध्यमा प्रतिपद् अस्ति, या इन्द्रियैः बुद्धिविकल्पैः च अनुभूतसमस्तलौकिकपदार्थान् सापेक्षं प्रातीतिकं च मन्यते। कार्यभूतं सापेक्षं जगत् न सत् अस्ति, न असत् अस्ति, न अस्ति वर्तते, न नास्ति वर्तते, न शाश्वतं वर्तते, न उच्छेदरूपं वर्तते। पारमार्थिकदृष्ट्या अयमेव प्रतीत्यसमुत्पादः निर्वाणम् अस्ति, कीदृशं निर्वाणम्– प्रपञ्चोपशमः, शिवम् अमृतं च। अत एव भगवता बुद्धेन प्रतीत्यसमुत्पादः 'बोधि' इति कथ्यते, यस्य साक्षात्कारः महात्मबुद्धेन गयाप्रदेशे बोधिवृक्षस्य अधः कृतः, येन सिद्धार्थगौतमः अमरः महात्मा बुद्धः जातः। बुद्धः एतस्मै '**धर्म**' इति संज्ञां दत्तवान्।

महात्मबुद्धेन अनुलोम–प्रतिलोमरीतिभ्यां प्रतीत्यसमुत्पादः विचारितः विमृष्टश्च। प्रतीत्यसमुत्पाद–कारणकार्यशृङ्खलायाः द्वादशाङ्गचक्रं वर्तते। इदं भवचक्रं, संसारचक्रं, जन्म–मरण–चक्रं, धर्मचक्रं च अपि कथ्यते। अस्य चक्रस्य द्वादशाङ्गानि निदानानि वा कारण–कार्यरूपेण चक्रवत् परिभ्रमन्ति। प्रथमम्–अङ्गं द्वितीयाङ्गस्य कारणमस्ति, द्वितीयम् अङ्गं तृतीयाङ्गस्य कारणं भवति, एतेन क्रमेण एव इदं चक्रं नैरन्तर्येण चलति। द्वादशाङ्गानि सन्ति–

**अविद्या –** अविद्या अनादिः अस्ति। अस्य चक्रस्य मूलकारणमस्ति। एषा तत्त्वस्य वास्तविकरूपम् आवृत्य विकृतरूपेण दर्शयति। असीम–निर्विकल्प–अद्वैततत्त्वं बुद्ध्या विकल्पेषु सीमितद्वैतप्रतीतिं कारयति। अविद्या एतत् कार्यं कर्मसंस्कारैः निष्पादयति।

**संस्कारः –** अविद्यायाः संस्कारः उत्पद्यते। संस्कारः इत्युक्तेः सञ्चितकर्मसंस्कारः।

**विज्ञानम् –** संस्कारात् विज्ञानं प्रभवति। विज्ञानस्य तात्पर्यं वर्तते – अविद्यया कलुषितं विज्ञानम्।

**नामरूपम् –** विज्ञानात् नामरूपं च जायते। 'नाम' = मानसिकम्, 'रूपम्' भौतिकम्। अभिप्रायो वर्तते मानसिकभावानां भौतिकपदार्थैः संघीभूतं शरीरम्। विज्ञानेन अनुप्राणितं मनोभौतिकं शरीरम्।

**षडायतनम् –** नामरूपात् षडायतनम् उत्पद्यते। पञ्च बाह्येन्द्रियाणि मनश्च मिलित्वा षडायतनम् उच्यते। इदं भोगोपकरणानि भवन्ति।

**स्पर्शः –** षडायतनात् स्पर्शः जायते। विज्ञानानुप्राणितेन्द्रियाणां विषयैः सम्पर्कः स्पर्शः मन्यते।

**वेदना –** स्पर्शात् वेदनायाः उत्पत्तिः भवति। वेदनायाः तात्पर्यमस्ति इन्द्रियसंवेदनम्।

**तृष्णा –** वेदनायाः तृष्णा उत्पद्यते। इन्द्रियोपभोगाणां तीव्रेच्छा तृष्णा भवति।

**उपादानम् –** तृष्णायाः उपादानस्य उत्पत्तिः भवति। विषयसुखेषु अत्युग्रासक्तिः उपादानम् अस्ति।

**भवः -** उपादानात् 'भवः' जायते। प्रारब्धकर्माणि यानि फलभोगार्थं जन्म ग्रहीतुं (पुनर्जन्म प्रति) प्रेरयन्ति।

**जातिः –** भवात् जातिः उत्पद्यते। जन्म पुनर्जन्म च जात्यां समाविष्टमस्ति।

**जरा–मरणम् –** जात्याः जरा–मरणं जायते। दुःखानां प्रतीकरूपेण अत्र 'जरा–मरणम्' इति प्रयुक्तम्।

वृद्धावस्था 'जरा' कथ्यते। बुद्धचरितमहाकाव्ये अश्वघोषकविना उक्तम्–

**रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम्।**

**नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः।।**[4]

मरणं तु परं कष्टकरम् अस्ति एव। 'मरणम्' अस्य चक्रस्य अन्तं नास्ति। मरणानन्तरम् अविद्या कर्मसंस्काराः च अवशिष्टाः भवन्ति, ये नवीन–जन्मनः कारणभूताः भवन्ति। अनेन क्रमेणेव एतत् चक्रं चलति–

**पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम्।**

एतेषु द्वादशाङ्गेषु प्रारम्भिके द्वे अङ्गे (अविद्या संस्कारश्च) पूर्वजन्मनः सम्बद्धौ स्तः, अन्तिमे द्वे अङ्गे (जातिः मरणं च) भावि–पुनर्जन्मना सम्बद्धे स्तः। मध्ये विद्यमानानि अष्टाङ्गानि (विज्ञानम्, नामरूपम्, षडायतनम्, स्पर्शः, वेदना, तृष्णा, उपादानम्, भवः च) वर्तमानजन्मना सम्बद्धानि सन्ति। अत्र अङ्गेषु पूर्वम् अङ्गं उत्तराङ्गस्य कारणमस्ति, उत्तराङ्गं च पूर्वाङ्गस्य कार्यमस्ति। पूर्वम् अङ्गं वर्तते चेत् ततः उत्तराङ्गस्य उत्पत्तिः निश्चिता, अनया रीत्या एतत् चक्रं सरति। अस्य चक्रस्य मूलकारणम् अविद्या विद्यते। यावत् अविद्या वर्तते तावत् एतत् चक्रं चलिष्यति। अविद्यायाः नाशः अपरोक्षानुभूत्या भवति, यस्य अर्थः निर्वाणमस्ति।

अत्र अनुलोमरीत्या 'कारणेन कार्यस्य उत्पत्तिः' इति वर्णितम्। यस्मिन् अविद्याप्रभृति जरा–मरणपर्यन्तं दुःखानां चक्रं प्रतिपादितम्। अस्य विवेचनम् प्रतिलोमरीत्या 'कार्येण कारणस्य निरूपणम्' अपि भवितुं शक्यते यस्मिन् 'जरा–मरणम्' इत्यस्मात् मूलकारणम् अविद्यापर्यन्तं चक्रं चलति। अविद्या–निवृत्तिः एव निर्वाणम् अस्ति, एतत् बौद्धदर्शनस्य मतमस्ति।

माध्यमिकशून्यतावादानुसारेण[5] प्रतीत्यसमुत्पादः व्यावहारिकस्तरे सत्यं परं पारमार्थिकदृष्ट्या अस्वीकार्यः अस्ति। अयम् अजातिवादरूपेण परिणतः। योगाचारविज्ञानवादे[6] प्रतीत्यसमुत्पादः गतिः इत्यस्य पर्यायः अस्ति। सर्वास्तिवादे (सौत्रान्तिकः वैभाषिकश्च)[7] प्रतीत्यसमुत्पादस्य वस्तुतः कार्यकारणवादः इति अर्थं स्वीकरोति। यं क्षणभङ्गवादेन प्रतिपादयति।

'**असत्कार्यवादः**' कार्यमाश्रित्य अन्यतमः कार्यसिद्धान्तः वर्तते। अस्य मुख्यसमर्थकः न्यायवैशेषिकदर्शनम् अस्ति। अस्य दर्शनस्य कार्यकारणसिद्धान्तः **आरम्भवादः उत्पत्तिवादः** वा कथ्यते। अनेन वादानुसारेण कारणं कार्यं च नितान्तं भिन्ने स्तः, न

तु रूपदृष्ट्या, आकारदृष्ट्या वा अपितु तात्त्विकदृष्ट्या अपि भिन्ने वर्तेते। अस्य वादस्य सिद्ध्यर्थं न्यायवैशेषिकदर्शनं युक्तिद्वयं प्रस्तौति–

यदि कारणं कार्यं च अभिन्ने वस्तुनी स्तः तर्हि कार्यम् उत्पादयितुं कारणव्यापारस्य आवश्यकता न भवेत्। परन्तु कारणव्यापारस्य आवश्यकता तु भवत्येव। अतः कारणं कार्यं च भिन्ने वस्तुनी स्तः।

कार्यं कारणं च भिन्नप्रयोजनं सिद्ध्यतः। यथा– यत् कार्यं घटेन भवितुं शक्यते तत् मृत्तिकया न भवितुं शक्यते। अतएव एते भिन्ने वस्तुनी स्तः।

अत्र कार्यकारणयोः स्वरूपं विवेचनीयम्, तदा एव तयोः सम्बन्धस्य बोधः भवितुं शक्नोति। सप्तपदार्थिग्रन्थे आचार्यशिवादित्यः कथयति– 'कार्योत्पादकत्वं कारणत्वम्।'[8] भारतीयदर्शने ये केऽपि कार्यकारणसम्बन्धं स्वीकुर्वन्ति ते सर्वे कारणस्य स्थितिं कार्यात् पूर्वं मन्यन्ते, उक्तं च '**अनन्यथासिद्धनियतपूर्वभावित्वं कारणत्वम्।**'[9] अस्य अभिप्रायो वर्तते यत् कारणं कार्यस्य अनन्यथासिद्धं नियतरूपेण पूर्वभावि वर्तते। कारणस्य भेदाः सन्ति–समवायिकारणं, असमवायिकारणं, निमित्तकारणं च। न्यायदर्शने कार्यस्य परिभाषा अस्ति–

**'अनन्यथासिद्धनियतपश्चाद्भावित्वं कार्यत्वम्।'**[10]

इयं परिभाषा कारणपरिभाषानुसारिणी एव प्रतीयते। उपर्युक्तविवेचनानुसारं स्पष्टमस्ति यत् कारणकार्ययोः आनन्तर्यसम्बन्धः भवति। कारणं कार्यस्य पूर्ववृत्ति भवति कार्यं च कारणस्य उत्तरवृत्ति भवति। परं कारणकार्यभावाय इदम् आनन्तर्यं नियतं निश्चितं च भवेत्। अपि च इदम् अनन्यथासिद्धं भवेत्।

तर्कसंग्रहे अन्नम्भटेन उक्तम्– '**कार्यं प्रागभावप्रतियोगि।**'[11] कार्यं स्वप्रागभावस्य प्रतियोगि भवति। अभिप्रायोऽस्ति– कार्यम् उत्पत्तेः पूर्वं कारणे सत् न भवति। कार्यं नवीना सृष्टिः अस्ति। कार्यस्य सत्तायाः आरम्भः कार्योत्पत्त्या सहैव भवति। कारण–कार्ययोः समवायसम्बन्धः वर्तते। 'कारणे कार्यम् असत् भवति'– अयमेव न्यायवैशेषिकदर्शनस्य असत्कार्यवादः आरम्भवादनाम्ना ज्ञायते।

बौद्ध–न्यायवैशेषिकदर्शनयोः कार्यकारणसिद्धान्तविषयकं विवेचनम् अस्मिन् पत्रे कृतम्। अत्र समाहाररूपेण ज्ञायते यत् बौद्धदर्शनानुसारेण कार्योत्पत्तेः अनन्तरं कारणं विनष्टं भवति। न्यायवैशेषिकदर्शनमते कार्योत्पत्तेः अनन्तरं कारणस्य अपि सत्ता विद्यते। बौद्धदर्शने कारणकार्ययोः मध्ये सातत्य–सम्बन्धः वर्तते। न्यायवैशेषिकानुसारेण कारणकार्ययोः

मध्ये समवायसम्बन्धः भवति। अनयोः दर्शनयोः कार्यकारणवादसिद्धान्तस्य आधारः भिन्नोऽस्ति। बौद्धदर्शनस्य सिद्धान्तः असत्कारणवादः कारणमाश्रित्य वर्तते। न्यायवैशेषिक-दर्शनस्य सिद्धान्तः असत्कार्यवादः कार्यमाश्रित्य विकसितः। बौद्धदर्शने किमपि वस्तुद्वयं सहवर्ति भवितुं न शक्यते। न्यायवैशेषिकमतं व्यावहारिकदृष्ट्याम् आधारितम्।

कार्यकारणसिद्धान्तः तु जगति सर्वत्र प्रवर्तमानः अस्ति, तं द्रष्टुं नानादृष्टिभेदाः सन्ति विचारकाणाम्।

अस्मिन् पत्रे कार्यकारणसम्बन्धिनी बौद्ध–वैशेषिकयोः दृष्टिः संक्षेपेण विवेचिता।

*

## सन्दर्भाः


1. सर्वदर्शनसंग्रहः, स., पृ. 76
2. मा. वृ., पृ. 9
3. सर्वदर्शनसंग्रहः, पृ. 80
4. बुद्धचरितम्, 3.30
5. सर्वदर्शनसंग्रहः, पृ. 54
6. तत्रैव, पृ. 58
7. तत्रैव, पृ. 64
8. सप्तपदार्थी, पृ. 27
9. तर्कभाषा, पृ. 21
10. तत्रैव, पृ. 21
11. तर्कसंग्रहः, पृ. 93


*

## किञ्चिद् रामायणीयम्

### अयोध्याकाण्डम्, सर्गः 100

अयोध्यां प्रतिनेतुं चित्रकूटे भरतः श्रीरामं मिमेल। तदवसरे श्रीरामः भरतं कुशलक्षेमं पप्रच्छ। तस्य ये प्रश्नाः 'कच्चित्' इत्यव्ययेन प्रारब्धाः, ते इत्थं सन्ति –

**''कच्चित्''**

1. हे भरत! तव जानपदो विद्वान् दक्षिणः प्रतिभानवान् यथोक्तवादी पण्डितः दूतः कृतः?
2. हे रिपुसूदन! सर्वदा व्यपास्तान् अहितान् प्रतियातान् च दुर्बलान् अनवज्ञाय वर्तसे?
3. हे तात! लोकायतिकान् ब्राह्मणान् सेवसे, हि एते पण्डितमानिनः बालाः अनर्थ-कुशलाः (भवन्ति)।

   ते मुख्येषु विद्यमानेषु धर्मशास्त्रेषु बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति।
4. ब्राह्मणैः, क्षत्रियैः, वैश्यैः सदा स्वकर्मनिरतैः जितेन्द्रियैः महोत्साहैः सहस्रशः आर्यैः वृताम्, विविधाकारैः प्रासादैः वृताम्, वैद्यजनाकुलाम्, समुदितां स्फीताम् अयोध्यां परिरक्षसि?
5. हे राघव! चैत्यशतैः पुष्टः सुनिविष्टजनाकुलः देवस्थानैः प्रपाभिश्च तटाकैश्च उपशोभितः पापैः नरैः विवर्जितः मम पूर्वैः सुरक्षितः स्फीतः जनपदः सुखं वसति?
6. ते सर्वे दयिताः कृषिगोरक्षजीविनः (सन्ति?)
7. साम्प्रतम् अयं लोकः सुखम् एधते?
8. तेषां गुप्तपरीहारैः त्वया भरणं कृतम्, हि राज्ञा धर्मेण सर्वे विषयवासिनः (भवन्ति।)

*

# समानवाक्योपात्तानां तिङन्तानां परस्परान्वयसमीक्षणम्

प्रलय नन्दी

**प्रबन्धसारः**

धात्वर्थमुख्यविशेष्यकः शाब्दबोधो वैयाकरणानाम्। अतो वाक्याद् जायमाने शाब्दबोधे धात्वर्थव्यापारस्य मुख्यत्वेन प्रतीतिर्भवति। परन्तु एकस्मिन् वाक्ये एकाधिकतिङन्तानां प्रयोगे सति बहूनां व्यापाराणां युगपद् भानं जायते। अथ च एकतिङर्थमुख्यविशेष्यकस्यैव वाक्यत्वात् समानवाक्ये एकाधिकव्यापाराणां युगपत् प्राधान्येन प्रतीतिरपि न सम्भवति। तथा सति वाक्यभेदप्रसङ्गोऽपि स्यात्। अतस्तासु क्रियासु परस्परमन्वयद्वारा एकस्मिन् वाक्ये एकतिङर्थमुख्यविशेष्यको बोधो जायते। तत्र एकस्यैव व्यापारस्य प्राधान्यम् इतरेषाञ्च अप्राधान्यं भवति। समानवाक्ये ईदृशेषु तिङन्तोपस्थाप्यव्यापारेषु कथं परस्परमन्वयः सम्भवतीति प्रकृतप्रबन्धस्य आलोचनबिन्दुः। कर्मणि प्रयोगे नागेशोक्तमतदिशा तिङन्तोपस्थापितेषु धात्वर्थफलेषु च कथं परस्परमन्वय इत्यपि प्रसङ्गतः अत्र विचार्यते।

**मूलशब्दाः**

तिङन्तम्, क्रिया, फलम्, हेतुहेतुमद्भावः, क्रियाकारकभावः, शाब्दबोधः।

**भूमिका**

तिङन्तेषु धातवः प्रकृतित्वेन तिबादयश्च प्रत्ययत्वेन उपयुज्यन्ते। शाब्दिकानां सम्प्रदाये फलव्यापारात्मकस्य धात्वर्थस्य विशेष्यत्वं, तिङर्थानां कर्तृकर्मसङ्ख्याकालानाञ्च विशेषणत्वं स्वीक्रियते। तत्र व्यापारः कर्त्राश्रितः, अत आधाराधेयभावेन कर्ता व्यापारस्य विशेषणम्। फलस्यापि कर्माश्रितत्वात् कर्म फलस्य विशेषणं भवति। सङ्ख्या कर्तरि प्रयोगे कर्तुः कर्मणि प्रयोगे च कर्मणो विशेषणम्। तिङर्थः कालो




1. कर्तरिप्रयोगे शाब्दबोधः

व्यापारस्य विशेषणम्। धात्वर्थो हि फलानुकूलो यत्नसहितो व्यापारः, धात्वर्थयोः फलव्यापारयोः जन्यजनकभावः। एवञ्चानया रीत्या वैयाकरणानां मते धात्वर्थमुख्यविशेष्यकः शाब्दबोधः सम्पद्यते। यथा देवदत्तस्तण्डुलं पचतीत्यत्र शाब्दबोधाकारः देवदत्ताभिन्नैककर्तृनिष्ठः तण्डुलाभिन्नैककर्मनिष्ठ–विक्लित्तिजननानुकूलो वर्तमानकालिको व्यापार इति। अतः प्रकृतिप्रत्ययोभयांशघटितेन तिङन्तेन प्रधानतः क्रियैव उपस्थाप्यत इति लब्धम्।

अथैकत्र अनेकतिङन्तानां प्रयोगे सति तस्मिन् वाक्ये एकाधिकक्रियाणां प्रतीतिर्भवति। परन्तु शाब्दबोधे क्रियाणां युगपत् प्राधान्यं न सम्भवति, एकाधिकतिङर्थानां विशेष्यत्वेन प्रतीत्या भिन्नवाक्यतापत्तेः। तस्मात् परस्परं सम्बद्धत्वेन तासां शाब्दबोधे भानं भवतीति विशेषः। वाक्ये हि सुबन्तानि यथा तिङन्तस्य विशेषणत्वेन प्रयुज्यन्ते तथा तिङन्तान्यपि तिङन्तविशेषणतया उपयुज्यन्ते। तत्र एकस्याः प्राधान्यं तद्भिन्नानाञ्च क्रियाणाम् अप्राधान्यम्, प्रधानक्रियाया विशेष्यत्वम् अप्रधानानाञ्च विशेषणत्वमिति निर्वाहप्रकारः। इत्थं पचति भवतीत्यादिषु वाक्येषु एकाधिकतिङन्तानां विद्यमानत्वेऽपि एकवाक्यत्वम् अक्षुण्णमेव। परन्तु पचति व्रजतीत्यादिषु वाक्येषु निरुक्तम् एकवाक्यत्वं न सम्भवति, उभयोरपि विशेष्यत्वेन भिन्नवाक्यत्वादिति विशेषः। एवञ्च यत्र वाक्ये तिङन्तोपस्थाप्यक्रियाणां परस्परम् अन्वयः सम्भवति तत्रैव एकवाक्यत्वं सिध्यति, यत्र च परस्परान्वयस्य अभावस्तत्र न एकवाक्यत्वमिति ज्ञायते। अथ तिङन्तोपस्थापितक्रियासु अस्य सम्बन्धस्य किं स्वरूपं, कथं च अयं सम्बन्धः सम्भवतीति विषये प्रकृतप्रबन्धे विचार उपस्थाप्यते।

**समानवाक्यम्**

वैयाकरणानां मते धात्वर्थमुख्यविशेष्यकः शाब्दबोधो जायते। वाक्योपात्तानां पदानां समुदितार्थश्च शाब्दबोधः। एकतिङ् वाक्यमिति लक्षणानुसारम् एकस्मिन् वाक्ये एकस्यैव तिङन्तस्य प्रयोगः सम्भवति। ततश्च समानवाक्ये एकाधिकतिङन्तानां प्रयोगासम्भवात् तत्र तिङन्तोपस्थाप्यानाम् अनेकक्रियाणां युगपद् उपस्थितिर्न सम्भवतीति तिङन्तोपस्थापितक्रियासु विशेष्यविशेषणभावस्य कथं प्रसङ्ग इति संशयः स्यात्। परन्तु प्रकृतं वाक्यलक्षणं केवलं व्याकरणशास्त्रीयप्रक्रियाविषयम्। ''समानवाक्ये निघातयुष्मदस्मदादेशाः''[1] इति वार्तिके कीदृशं समानवाक्यमिति शङ्कायां प्रकृतं वाक्यलक्षणम् उपात्तम्। अत एव ओदनं पच तव भविष्यतीत्यत्र समानवाक्यत्वाभावाद् युष्मदादेशो न भवति। प्रकृते तु लौकिकमेव वाक्यं समानवाक्यत्वेन इष्यते। तच्च ''सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता''[2] इति। यदि क्रिया कारकेण अन्विता भवेत् तर्हि सुबन्तसमुदायः, तिङन्तसमुदायः सुबन्ततिङन्तसमुदायश्च वाक्यं भवतीति तदाशयः। एतेन देवदत्तेन शयितव्यम्, पचति

भवति, देवदत्तः पचतीत्यादीनां वाक्यत्वं सम्पद्यते। ईदृशेषु च वाक्येषु एकाधिकतिङन्तानि सम्भवन्त्येव। अथवा पूर्वोक्तस्य लक्षणस्यैव एकतिङ्विशेष्यकं वाक्यमिति परिष्कारः कर्तव्यः। तत एकतिङर्थमुख्यविशेष्यकं वाक्यमिति फलितार्थो लभ्यते। तेन अनेकतिसत्त्वेऽपि पचति भवतीत्यादौ एकतिङर्थस्यैव विशेष्यत्वेन प्रतीतेस्तत्र एकवाक्यत्वं सिध्यति। अतः समानवाक्ये एकाधिकक्रियाणामुपलब्धेः तासु विशेष्यविशेषणभावविचारः प्रासङ्गिक एवेति समायातम्।

**तिङन्तयोः परस्परान्वयः**

समानवाक्योपात्ततिङन्तैः उपस्थापितासु क्रियासु परस्परम् अन्वयद्वारा एकक्रिया-मुख्य-विशेष्यकः शाब्दबोधो जायते, अत एव तत्र एकवाक्यत्वेन व्यवहारः सम्भवति। तादृशक्रियासु दृश्यमानोऽयं परस्परान्वय एकविध एव सम्भवति। स च क्रियाकारकभावः। कर्मत्वेन कर्तृत्वेन वा यत्र एकस्याः क्रियाया अपरत्र अन्वयस्तत्र क्रियाकारकभावरूपः सम्बन्धः। ईदृशः क्रियाकारकभावो यत्र दृश्यते तत्र तिङन्तयोः भिन्नकर्तृकत्वमेव भवति। यथा पश्य मृगो धावतीत्यत्र धावनस्य दर्शने कर्मत्वसम्बन्धेन अन्वयात् तयोः क्रियाकारकभावः। अत्र धावनस्य मृगकर्तृकत्वं दर्शनस्य च त्वत्कर्तृकत्वम् इत्येवं भिन्नकर्तृकत्वमेव सम्भवति।



2. क्रियाकारकभावघटितः शाब्दबोधः

**विशेषः –** तिङन्तयोर्मध्ये हेतुहेतुमद्भावरूपः सम्बन्धोऽपि दृश्यते परन्तु तत्र सर्वत्रापि वाक्यद्वये उपात्तयोः तिङन्तयोर्मध्ये एव एतादृशः सम्बन्धः सम्भवतीति विशेषः। यत्र क्रियाया हेतुत्वेन अपरक्रियायाम् अन्वयस्तत्र हेतुहेतुमद्भावरूपः सम्बन्धो भवति। हेतुहेतुमद्भावेन यत्र क्रिययोरन्वयस्तत्र तिङन्तयोः समानकर्तृकत्वमपि सम्भवतीति विशेषः। अत्रैतदेव तत्त्वं यद् यत्र तिङन्तयोः समानकर्तृकत्वं तत्रैव भिन्नवाक्यत्वमिति। यथा चैत्रः कृष्णं नमेच्चेत् सुखं लभेत इत्यत्र चैत्रः कृष्णं नमेत्, चैत्रः सुखं लभेत इति भिन्नयोः वाक्ययोः चेदिति अव्ययेन योजनं जातम्। अत्र नमनक्रियायाः हेतुत्वेन सुखलाभे अन्वयात् तयोः हेतुहेतुमद्भावः। प्रकृतोदाहरणे नमनस्य यथा चैत्रकर्तृकत्वं तथा सुखलाभस्यापि चैत्रकर्तृकत्वमेवेति अनयोः समानकर्तृकत्वं सम्भवति। हेतुहेतुमद्भावप्रसङ्गे भिन्नकर्तृकत्वमपि सम्भवति, यथा गुरुः पाठयेत् चेत् शिष्यो गुरुकुलं गच्छेद् इत्यत्र पाठनगमनयोः हेतुहेतुमद्भावो



3. हेतुहेतुमद्भावघटितः शाब्दबोधः

भिन्नकर्तृकत्वञ्चेति उभयमपि दृश्यते।

**तिङन्तोपस्थाप्यक्रियायाः सिद्धत्वापत्तिः**

सम्प्रति तिङन्तयोः क्रियाकारकभावस्य स्वीकारे सति विशेषणभूतक्रियायाः सिद्धत्वम् आपद्यत इत्याशङ्क्यते। तथाहि भाष्यकृता क्रियान्तरसाधनत्वेन अनन्वयित्वमिति साध्यत्वस्य स्वरूपं प्रतिपादितम्।[3] साधनत्वं कारकत्वम्, या क्रिया क्रियान्तरं प्रति कारकत्वेन नान्वेति तस्याः साध्यत्वमिति तदाशयः। पचति भवतीत्यत्र पाकक्रियायाः कर्तृत्वेन भवनक्रियायामन्वये सति इतरक्रियासाधनत्वेन अन्वयित्वमेव पाकक्रियायां समायातमिति तस्याः साध्यत्वं न सिध्यति, सिद्धत्वमेव आपद्यते। अनया रीत्या अत्र तिङन्तोपस्थाप्यक्रियायाः साध्यत्वमिति सिद्धान्तोऽपि अत्र विरुध्येत इति शङ्कितुराशयः।

एवं तिङन्तोपस्थाप्यक्रियाया असत्त्वरूपत्वस्य भङ्गापत्तौ क्रियान्तरसाधनत्वेन अनन्वयित्वमिति भाष्यवचनस्य कर्तृकर्मातिरिक्तकरणादिकारकत्वेन अनन्वयित्वमिति तात्पर्यं गृह्यते। ततो न दोषः। तथाहि, पचति भवतीत्यत्र पाकस्य भवने कर्तृत्वेनान्वयः, पश्य मृगो धावतीत्यत्र धावनस्य दर्शने कर्मत्वेनान्वयो भवति। एवंरीत्या सर्वत्रापि कर्तृत्वकर्मत्वान्यतरेणैव सम्बन्धेन क्रियायाः क्रियान्तरेऽन्वयो दृश्यते, क्रियान्तरेषु च तिङन्तोपस्थाप्यक्रियायाः करणत्वसम्प्रदानत्वादिना अनन्वयित्वं तदवस्थमेव। कर्तृकर्मेतर-करणादिकारकत्वेन अनन्वयित्वमित्यस्य लाघवात् क्रियानाधारकारकत्वेन अनन्वयित्वमिति सारो गृह्यते। क्रियाया आधारभूतं कारकं कर्तृकर्मरूपमेव, क्रियाया अनाधारकाणि तु कर्तृकर्मेतरकारकाणि करणादीनि। कर्तुः धात्वर्थव्यापाररूपक्रियाश्रयत्वात् कर्मणश्च धात्वर्थफलरूपक्रियाश्रयत्वाद्[4] धातुना या क्रियाभिधीयते कर्तृकर्मनिष्ठैव, न तदितरकारकनिष्ठेति आशयः। अतः कर्तृकर्मणोरेवार्थयोः लकारा उत्पद्यन्ते, न कारकान्तरे।

एवञ्च धातूपात्तक्रियानाधारकं करणादि, करणादित्वेनानन्वयित्वं साध्यत्वम्। प्रकृते तु कर्तृत्वेन कर्मत्वेन वा अन्वयित्वम्, कर्तृकर्मणोश्च धातूपात्तक्रियाधारकत्वमेव अस्ति न धातूपात्तक्रियानाधारकत्वमिति पूर्वोक्तं साध्यत्वं तिङन्तोपस्थापितासु विशेषणीभूतासु पाकादिषु क्रियासु अक्षतमेव। अतो न दोषः। चैत्रः कृष्णं नमेच्चेत् सुखं लभेत इत्यादौ तु नमनक्रियायाः लाभक्रियायां हेतुत्वेन अन्वयो न कारकत्वेन। अतोऽत्रापि विशेषणभूताया नमनक्रियायाः साध्यत्वम् अक्षुण्णमिति ध्येयम्।

**क्रियाकारकभावो द्विविधः**

समानवाक्ये उपात्तैः तिङन्तैः याः क्रिया उपस्थाप्यन्ते, तासु परस्परम् अन्वयसाधनेन

एव अखण्डः शाब्दबोधः सिध्यति, सम्पूर्णस्य पदसमुदायस्य च एकवाक्यत्वं सम्पद्यते। अत्र एका क्रिया अपरां प्रति विशेषणत्वेन अन्वेतीति विशेषः। यथा- पश्य नृत्यतीत्यत्र नृत्–धात्वर्थक्रियायाः नर्तनस्य दृशिधात्वर्थदर्शने विशेषणत्वम्। पश्य मृगो धावतीत्यत्र धावनक्रिया दृशिक्रियायां दर्शने विशेषणम्। पचति भवति इत्यत्र च पचिधातुवाच्या पाकक्रिया भूधात्वर्थे भवने विशेषणं भवति। एवञ्च अयमन्वयः कर्तृत्वेन कर्मत्वेनेति द्विधैव सम्भवतीति परिलक्ष्यते। अपि च, तिङन्तोपस्थाप्यक्रियायाः साध्यत्वात् क्रियानाधार–कारकत्वेन क्रियान्तरे अनन्वयिन एव साध्यत्वाच्च अयं क्रियाकारकभावो द्विविध एवेति बोध्यम्। तथा च प्रकृते पश्य नृत्यतीत्यत्र नर्तनस्य कर्मत्वरूपसम्बन्धेन दर्शनेऽन्वयः, पश्य मृगो धावतीत्यत्र धावनस्य कर्मत्वरूपसम्बन्धेन दर्शनेऽन्वयः, पचति भवतीत्यत्र च पाकस्य कर्तृत्वरूपसम्बन्धेन भवनक्रियायामन्वयो भवति।

**परस्परान्वयव्यवस्था**

एकस्मिन् वाक्ये एकाधिकतिङन्तानां विशेष्यत्वेन प्रतीतौ भिन्नवाक्यत्वापत्तिर्भवति, एकतिङर्थमुख्यविशेष्यकस्यैव एकवाक्यत्वात्। अतः समानवाक्ये तिङन्तोपस्थापितक्रियाणां विशेष्यविशेषणभावेनैव अन्वयः सिद्धान्तितः। तत्र विशेषणीभूतायाः क्रियायाः कर्तृत्वाद्यर्थसत्त्वेऽपि तदुपस्थापकेभ्यः तिङन्तेभ्यो विभक्तिविधानं तु न सम्भवति, तिङन्तानां प्रातिपदिकत्वाभावात्। अतो वाक्येषु विशेषणत्वेन उपस्थितानां क्रियाणां कर्तृत्वकर्मत्वरूपयोः अर्थयोः प्रतीतये व्यवस्थाविशेष आश्रयणीयो भवति। पश्य मृगो धावतीत्यत्र शाब्दबोधे धावनक्रियाया दर्शनक्रियायां कर्मत्वेन अन्वयः। एवं तत्र तत्र क्रियायाः कर्तृत्वेन कर्मत्वेन च प्रतीतावपि तेभ्यः तिङन्तेभ्यः तत्तदर्थोपस्थापकविभक्तिविधानं न सम्भवति। अतस्तत्र कर्तृत्वादिरूपस्य तत्तदर्थस्योपपत्तये सम्प्रदायेषु प्रधानतः संसर्गतावादः प्रकारतावादश्चेति मार्गद्वयं समाश्रीयते। सम्प्रति अनयोः मार्गयोरुपस्थापनं क्रियते।

( 1 ) **संसर्गतावादः–** समानवाक्ये एकस्य तिङन्तस्य अपरस्मिन् कर्मत्वेन कर्तृत्वेन वा अन्वयः सम्भवति। तत्र कर्मत्वस्य कर्तृत्वस्य वा संसर्गत्वेन उपस्थितिर्भवतीति संसर्गतावादिनाम् आशयः। शाब्दबोधं प्रतिपदजन्यपदार्थोपस्थितिः कारणमिति शब्दाध्याहारवादे कार्यकारणभावः। एवंविधस्य कार्यकारणभावस्य स्वीकारे सति पश्य मृगो धावतीति वाक्याज्जायमाने शाब्दबोधे प्रतीयमानस्य धावननिष्ठकर्मत्वस्य पदजन्योपस्थितिः आवश्यकी। तिङन्तानां प्रातिपदिकत्वाभावात् तेभ्यः कर्मत्वोपस्थापकस्य अमादेः प्राप्तिर्न सम्भवति। अतस्तत्र तत्र स्थलेषु कर्मत्वादेः संसर्गविधयैव उपस्थितिः व्याख्यायते।

( 2 ) **प्रकारतावादः –** समानवाक्ये तिङन्तयोः परस्परान्वये कर्तृत्वादेः प्रकारतया

भानं भवतीति प्रकारतावादिनाम् आशयः। वाक्यार्थोपस्थितौ सम्पूर्णस्य वाक्यस्यैव कारणत्वमिति अर्थाध्याहारवादे कार्यकारणभावः। वाक्यार्थे वाक्यस्यैव शक्तिरिति भावः। अत्र मते वाक्यार्थं प्रति सम्पूर्णस्य वाक्यस्य यथा कारणत्वं तथा वाक्यैकदेशस्यापि कारणत्वं स्वीक्रियते। अत एव पिण्डीम् इतिमात्रे उच्चारिते आनयपदाध्याहारं विनापि पिण्डीकर्मकं त्वत्कर्तृकं प्रेरणाविषयकम् आनयनमिति शाब्दबोधो जायते। शाब्दबोधे प्रतीयमानस्य कर्मत्वादिपदार्थस्य उपस्थापकं पदं यद्यपि वाक्ये नास्ति तथापि अध्याहारवशात् पदार्थोपलब्धिः सम्भवतीति अस्मिन् मते विशेषः। एवञ्च पदजन्योपस्थितिविषयत्वेन धावनादिनिष्ठस्य कर्मत्वादेरपि प्रकारतया भानं सम्भवतीति प्रकारतावादे प्रतिपाद्यते।

**नागेशाभिमते कर्मणि प्रयोगे विशेषः**

धात्वर्थमुख्यविशेष्यकः शाब्दबोधो वैयाकरणानां सिद्धान्तः। तत्र कर्तरि प्रयोगे धात्वर्थव्यापारस्य मुख्यत्वेन प्रतीतिरिति सर्वेषामभिमतिः। परन्तु कर्मणि प्रयोगे धात्वर्थयोः फलव्यापारयोः मध्ये कस्य प्राधान्येन प्रतीतिरिति विषये मतभेदो दृश्यते। प्राचीनानां मते कर्तरि, कर्मणि भावे चेति सर्वत्रापि प्रयोगेषु धात्वर्थव्यापारस्य मुख्यत्वेन प्रतीतिर्भवति। नवीनानां मते तु कर्तरि भावे च प्रयोगे व्यापारस्यैव प्राधान्यम्, तत्र कर्तरि प्रयोगे व्यापारविशेषणत्वेन फलस्य भानं भवति। कर्मणि तु फलस्यैव प्राधान्यम्, अत्र फलविशेषणत्वेन व्यापारस्य प्रतीतिः। कर्तरि प्रयोगे फलस्य विशेषणत्वं, कर्मणि तु विशेष्यत्वमेव। भावार्थे प्रयोगे च व्यापारस्यैव प्राधान्यं भवतीति नवीनाः प्रतिपादयन्ति। अत एतेषां मते कर्माख्यातस्थले भिन्नो वाक्यार्थो लभ्यते, यथा– देवदत्तेन तण्डुलः पच्यत इत्यत्र देवदत्ताभिन्नैककर्तृनिष्ठवर्तमानकालिकव्यापारजन्या तण्डुलाभिन्नैक-कर्मनिष्ठा विक्लित्तिरिति फलविशेष्यको वाक्यार्थबोधो दृश्यते। कर्त्राख्यातस्थले तु देवदत्ताभिन्नैककर्तृनिष्ठः तण्डुलाभिन्नैककर्मनिष्ठ–विक्लित्तिजननानुकूलो वर्तमानकालिको व्यापार इति व्यापारमुख्यविशेष्यक एव शाब्दबोध इत्यूह्यम्।



4. कर्मणि प्रयोगे शाब्दबोधः

इत्थं नवीनरीत्या कर्मणि प्रयोगे शाब्दबोधस्य स्वीकारे कृते समानवाक्योपात्तानां तिङन्तानां विषये दृश्यते विशेषः। तत्र कर्तरि प्रयोगे तिङन्तैः क्रियाणाम् उपस्थितिर्भवति, कर्मणि तु तैः धात्वर्थभूतानां फलानामेव उपस्थितिर्जायते। ततश्च कर्मणि प्रयोगे समानवाक्योपात्तानां तिङन्तानां परस्परान्वये विचारिते धात्वर्थफलानां परस्परं कः सम्बन्ध

इत्यस्मिन् विषये विचारः कर्तव्यो भवति।

यत्र वाक्ये एकस्य तिङन्तस्य कर्मणि प्रयोगः अपरस्य च कर्तरि प्रयोगस्तत्र न तथा विशेषः। यथा पश्य मैत्रेण तण्डुलः पच्यत इति। अत्र मैत्राभिन्नैककर्तृनिष्ठवर्तमानकालिक–पाकानुकूलव्यापारजन्या तण्डुलाभिन्नैककर्मनिष्ठा या विक्लित्तिस्तत्कर्मकं त्वत्कर्तृकं वर्तमान-कालिकं दर्शनमिति बोधो जायते। अस्मिन् वाक्ये पच्यत इति तिङन्तोपस्थापितस्य विक्लित्तिरूपस्य फलस्य कर्मत्वसम्बन्धेन पश्येति तिङन्तोपस्थापिते दर्शनेऽन्वयो भवति। परन्तु यस्मिन् वाक्ये उभयोरपि तिङन्तयोः कर्मणि प्रयोगस्तत्र तिङन्तोपस्थाप्ययोः फलयोः कथं परस्परम् अन्वय इति विषये एतावतापि वर्तते संशयावसरः। इतः पूर्वं क्रिययोः फलक्रिययोर्वा अन्वयः साधितः, सम्प्रति फलयोरेव अन्वयः सम्पाद्यत इत्यस्ति विशेषः।

**विचाराः**

अत्र विचारत्रयं सम्भवति –

(1) समानवाक्ये समानकर्तृकयोः तिङन्तयोः प्रयोगो न सम्भवति, एकतिङर्थमुख्यविशेष्यकस्य वाक्यत्वेन भिन्नवाक्यत्वापत्तेरिति पूर्वम् उपन्यस्तम्। तुल्यरीत्या अत्रापि कर्मणि अर्थे समानवाक्ये समानकर्मकयोः तिङन्तयोः प्रयोगो न सम्भवति, भिन्नवाक्यत्वापत्तेः। यथा मैत्रेण ओदनः पच्यते प्रदीयते च इत्यत्र समानकर्मकत्वाद् भिन्नवाक्यत्वम्। एवंविधेषु स्थलेषु चकारादिना वाक्यद्वयस्य एकवाक्यत्वेन व्यवहारो भवतीति विशेषः।

(2) नवीनानां रीत्या कर्मणि प्रयोगे धात्वर्थफलस्य मुख्यत्वेन प्रतीतिर्भवति। तेन समानवाक्ये भिन्नकर्मकयोः तिङन्तयोः प्रयोगे सति धात्वर्थफलयोरेव विशेष्यत्वेन उपस्थितिर्भवेत्। अनया रीत्या समानवाक्ये सर्वेषामपि तिङन्तानां कर्मणि प्रयोगे सति फलानामेव मुख्यत्वेन उपस्थितिर्भवति, क्रियायाः क्वापि प्राधान्येन प्रतीतिर्न सम्भवति। ततश्चात्र क्रियाया एव मुख्यत्वेनाविद्यमानत्वात् क्रियाकारकभावोऽपि नोपलभ्यते। इत्थं प्रकृतप्रयोगेषु तिङन्तयोः हेतुहेतुमद्भावेनैव अन्वयः सम्पाद्य इति समायातम्। हेतुहेतुमद्भावस्तु भिन्नवाक्योपात्तयोः तिङन्तयोर्मध्ये सम्भवति। ततश्च ओदनः मैत्रेण पच्यते चेत् चैत्रेण भुज्यते, देवदत्तेन मन्त्र उच्यते चेत् श्यामेन श्रूयते इत्येवं रीत्या प्रयोगेण कर्मणि निर्वाहः कर्तव्य इति बोध्यम्।

(3) समानवाक्ये तिङन्तेषु परस्परान्वयविषये प्रामाणिकेषु प्रौढग्रन्थेषु सर्वत्रापि कर्तरि एव प्रयोगा उदाहृताः। भाष्यकारोऽपि अस्मिन् प्रसङ्गे कर्तरि एव उदाहरणानि प्रयुक्तवान्।

अनेन समानवाक्ये सर्वेषामपि तिङन्तानां कर्मणि प्रयोगस्य अनभिधानमेव इति स्वी-कर्तव्यम्।

**निगमनम्**

(1) वैयाकरणानां मते धात्वर्थमुख्यविशेष्यकः शाब्दबोधो भवतीति सिद्धान्तः। अतः कर्तरि प्रयोगेषु तिङन्तेभ्यः क्रियाया एव मुख्यत्वेन भानं सम्भवति। अथैकत्र वाक्ये एकाधिकतिङन्तानां प्रयोगे सति एकाधिकक्रियाणां प्रतीतिः। तत्र सर्वासामपि क्रियाणां विशेष्यत्वेन भानं न सम्भवति, एकतिङर्थमुख्यविशेष्यकस्य वाक्यत्वेन तदा वाक्यभेदापत्तेः। अतस्तासु क्रियासु परस्परमन्वयः स्वीकर्तव्यः। विशेष्यविशेषणभावेन तासु अन्वयः सिध्यतीति अस्मिन् प्रबन्धे प्रतिपादितम्।

(2) तिङन्तोपस्थाप्यक्रियासु विशेष्यविशेषणभावस्य स्वीकारे सति विशेषणभूतस्य तिङन्तस्य क्रियान्तराकाङ्क्षा भवति। क्रियान्तरसाधनत्वेन अनन्वयित्वस्य च साध्यत्वं प्रतिपादितम्। एवञ्च विशेष्यभूतक्रियायां विशेषणभूतक्रियायाः कर्तृत्वेन कर्मत्वेन वा अन्वये सति तिङन्तोपस्थाप्याया अपि तस्याः क्रियायाः सिद्धत्वापत्तिः। अतोऽत्र क्रियानाधार–कारकत्वेन अनन्वयित्वमिति परिष्कारो विधीयते। कर्तृत्वस्य कर्मत्वस्य च क्रियानाधार–कारकत्वाभावात् तत्त्वेन क्रियान्तरेऽन्वयेऽपि विशेषणभूतक्रियाया न सिद्धत्वापत्तिरिति ज्ञायते।

(3) समानवाक्ये तिङन्तोपस्थापितक्रियासु विशेष्यविशेषणभावस्य स्वरूपं क्रियाकारकभाव एव। क्रियाकारकभावेन यत्र क्रियाणां परस्परम् अन्वयस्तत्र कर्तृत्वेन कर्मत्वेन वेति द्विधैव अन्वयः सम्भवति। अत एव क्रियानाधारकारकत्वेन अनन्वयित्वस्य साध्यत्वमिति निर्वाहः सम्भवति। अन्यथा करणत्वादीनां क्रियानाधारकत्वात् तत्त्वेन विशेष्यभूतक्रियायाम् अन्वये सति विशेषणभूतक्रियायाः सिद्धत्वापत्तिः स्यादिति भावः। चैत्रः कृष्णं नमेच्चेत् सुखं लभेत इत्यादौ नमनक्रियायाः लाभक्रियायां न करणत्वेन अन्वयः, अपि तु हेतुत्वेन अन्वय इति मन्तव्यम्। अत एवात्र नमनक्रियायाः साध्यत्वम् अक्षुण्णं भवति। ईदृशेषु स्थलेषु वाक्यद्वयोपात्तयोः तिङन्तयोर्मध्य एव हेतुहेतुमद्भावरूप-सम्बन्धेन अन्वय इति बोध्यम्।

(4) समानवाक्ये तिङन्तयोः यत्र क्रियाकारकभावेन परस्परं सम्बन्धस्तत्र कर्तृत्वेन अथवा कर्मत्वेनेति द्विधैव अन्वयः सम्भवति। अत एव कर्तृकर्मातिरिक्तकरणादिकारकत्वेन अनन्वयित्वमिति साध्यत्वस्य स्वरूपं लभ्यते। अत्र कर्तृत्वकर्मत्वयोः संसर्गविधया अथवा प्रकारविधयेति द्विधैव प्रतीतिः सम्भवति। शब्दाध्याहारपक्षे कर्तृत्वकर्मत्वयोः संसर्गत्वम्, अर्थाध्याहारपक्षे त्वनयोः प्रकारत्वमिति निर्वाहः क्रियते।

(5) कर्तरि प्रयोगे समानवाक्ये तिङन्तोपस्थाप्ययोः क्रिययोः क्रियाकारकभावेन निर्वाहः भवति। नवीनमते कर्मणि धात्वर्थफलस्य मुख्यत्वेन प्रतीतिः। ततो यत्र वाक्ये एकस्य तिङन्तस्य कर्मणि प्रयोगः अपरस्य च कर्तरि तत्रापि क्रियाकारकभावरूपसम्बन्धेन अन्वयः सिध्यति। परन्तु यत्र वाक्ये उभयोरपि समानकर्मकयोः तिङन्तयोः कर्मणि प्रयोगस्तत्र क्रियायाः प्राधान्येन प्रतीत्यभावात् परस्परं क्रियाकारकभावेन अन्वयो न सम्भवति, तादृशस्थले कथञ्चिद् हेतुहेतुमद्भावेनैव सम्बन्धः सम्पाद्यः। वस्तुतस्तु समानकर्मकयोः तिङन्तयोः कर्मणि समानवाक्यत्वेन प्रयोगो न दृश्यते, अतस्तादृशप्रयोगाणाम् अनभिधानमेव मन्तव्यम्। अथवा, लभ्यते चेदपि तत्र हेतुहेतुमद्भावेनैव निर्वाहः कर्तव्यः, क्रियाकारकभावस्तु कथञ्चिद् न सम्भवतीति बोध्यम्।

**उपसंहारः**

समानवाक्ये तिङन्तयोर्मध्ये परस्परान्वयः अस्य प्रबन्धस्य लक्ष्यविषयः। कर्तरि प्रयोगे तिङन्तयोः समानकर्तृकत्वं भवति चेत्तत्र भिन्नवाक्यत्वम्, नवीनरीत्या कर्मणि प्रयोगे तिङन्तयोः समानकर्मकत्वं भवति चेत्तत्र भिन्नवाक्यत्वमिति अत्र अवधेयो विषयः। एवञ्च भिन्नकर्तृकयोः भिन्नकर्मकयोश्च तिङन्तयोरेव अत्र एकवाक्यत्वेन ग्रहणं कृतम्। कर्तरि प्रयोगेषु समानवाक्ये तिङन्तैः धात्वर्थक्रियाणाम् उपस्थितिर्भवति। तासु क्रियासु क्रियाकारकभाव इत्येकविध एव सम्बन्धः सम्भवतीति आलोचितम्। क्रियाकारकभावेऽपि विशेषणभूतक्रियायाः विशेष्यभूतक्रियायां कर्तृत्वेन अथवा कर्मत्वेन एव अन्वय इत्यस्ति विशेषः। नागेशमते कर्मणि प्रयोगे तिङन्तैः फलानां मुख्यत्वेन उपस्थितिर्भवति। तद्रीत्या अत्र धात्वर्थफलानामेव परस्परान्वयो भवेदिति विशेषः। ईदृशस्थले तथा प्रमाणं नोपलभ्यते, भाष्यादिग्रन्थेषु एकवाक्यत्वेन कर्मणि तथा प्रयोगोऽपि न दृश्यते। तथापि सम्भावनातः तादृशेषु धात्वर्थभूतफलेषु हेतुहेतुमद्भावरूप एव सम्बन्धः सम्भवतीति प्रस्तुतम्। समानवाक्ये एव उपात्तानां तिङन्तानां मध्ये परस्परम् अन्वयः अत्र आलोचितः। भिन्नवाक्योपात्तेषु तिङन्तेषु तु अनेकविधाः सम्बन्धाः सम्भवन्तीति विषयविस्तरात् सोंऽशः अत्र न प्रस्तुतः। अत्र प्रस्तुतानां सर्वेषामपि विचारबिन्दूनां युक्तत्वायुक्तत्वे विद्वांस एव प्रमाणमिति विनिवेद्य अत्रैव विरम्यत इति शम्।

*

## सन्दर्भसूची


1 महाभाष्यम् 8.1.18

2. अमरकोशः 1.7.2

3. द्रष्टव्यम्, वैयाकरणसिद्धान्तभूषणम् (निरञ्जनी–प्रकाश–सहितम्), पत्राङ्कः–399

4. क्रियते असाविति कर्मव्युत्पत्त्या फलपरोऽपि क्रियाशब्दः।


*

# फार्म - ४

## नियमः ८ द्रष्टव्यः

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मौलाबाग आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः

**आरण्यकम्** (XXXIII/1) **मार्च 2025**
**अर्धवार्षिकी सन्दर्भिता संस्कृतशोधपत्रिका** **( UGC Carelisted )**

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) - स्व. पण्डित कमलाकान्त उपाध्यायः
15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
-श्री देवकुमार मिश्रः 'अलमस्त'
15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा -श्री नर्मदेश्वर ओझा
15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
- श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
204 रूप्यकाणि
18. सोमश्रद्धार्णव - डॉ. गोपबन्धु मिश्रः
1000 रूप्यकाणि